# आनंद-रत्नाकरः

## आनंद-लहरी-टिप्पणी-सहितः



प्रकाशिका
श्री आगमोद्धारक ग्रंथमाला
कपडवंज. (गुजरात)

श्रीआगमोद्धारक-ग्रंथमाळा-पुष्प-सं. ५०

॥ नमोनमः श्रीवर्द्धमानस्वामिने ॥

गीतार्थाय जगज्जन्तु-परमानन्ददायिने ।
गुरवे भगवद्धर्म-देशकाय नमोनमः ॥

ध्यानस्थस्वर्गत-आगमोद्धारक-आचार्यदेव-
लिखित-विविधप्रस्तावना-सङ्कलनस्वरूपः

卐 श्री 卐

# आनन्द-रत्नाकरः

[ प्रथमो विभागः ]

सङ्कलयितारः
पूज्यागमोद्धारकाचार्यवर्य-शिष्यरत्नाः
पूज्य-गणिवर्य-श्रीसूर्योदयसागरमहाराजाः

प्रकाशिका
गूर्जरदेशीय-खेडामण्डलान्तर्गतकपडवंजनगरीया
श्री-आगमोद्धारक-जैन-ग्रंथमाला

वीर नि. सं. २४९८
वि. सं. २०२८

निष्क्रयः
५ रुप्यकाः

आगमो. सं. २२
प्रथमावृत्तिः ५००

## पुस्तक-प्राप्तिस्थानानि

रमणलाल जेचंदभाई
कार्यवाहक
श्री आगमोद्धारक जैन ग्रंथमाळा
मु॰ कपडवंज (जि. खेडा)

शाह बाबूलाल केशवलाल
११, नगरशेठ मार्केट
रतनपोळ
अमदावाद

चंपकलाल टी. बोबर
शेषशायी मंदिर पासे
मोल्लोत चोरो, खोखरवाड
ऊंझा (उ. गु.)

### प्रकाशनोमां लाभ लेनार महानुभावो

५००) श्री जैन सोसायटी संघ,
एलिसब्रीज, अमदावाद-६
ज्ञानखातामांथी

५००) श्री ऋषभदेवजी केशरीमलजी
जैन पेढी, रतलाम (म. प्र.)
ज्ञानखातामांथी

### अगाउथी पुस्तकनी प्रतिओ नोंधावनार पुण्यात्माओ

प्रतिओ
१५२ जैन सोसायटी (वि. सं. २०१८ना का. सु. १५ना व्याख्यानमां)
१५० कपडवंजना श्रावक-श्राविकाओ तरफथी

आ महानुभावोने प्रेरणा-उपदेश आपवानुं कार्य पू॰ प्रौढ पुण्यप्रभावी गणिवर्यश्री लब्धिसागरजी म॰, पू॰ गणीश्री सूर्योदयसागरजी म॰, पू॰ गणीश्री यशोभद्रसागरजी म॰ श्रीए कर्युं छे.
ते बदल हार्दिक अनुमोदना

मुद्रक

१ तः ६४ पत्राणि
श्री ज्ञानोदय प्रेस
पिडवाडा (राजस्थान) मध्ये

६५ तः १४४ पत्राणि
नवप्रभात प्रिन्टींग प्रेस
घीकांटा अमदावाद. मध्ये

अवशिष्टं सर्वं
वसंत प्रिन्टींग प्रेस
घेलाभाईनी वाडी
घीकांटा, अमदावाद. मध्ये

पूज्यपादाऽऽगमोद्धारकाचार्यलिखित-प्रस्तावनासंग्रहस्वरूप-

श्रीआनन्दलहरीसंज्ञटिप्पणीसंवलित—

# श्री....आ....न ....न्द....र....त्ना....क....र....

## ग्रंथ-विषयानुक्रमः


प्रकाशकीयं निवेदनम्
सम्पादकीयं वक्तव्यम्
प्रस्तावना-पीयूष-सरणिः

| प्रस्तावनासंग्रहसूचिः | पृ० |
| --- | --- |
| १ श्रीत्रैविद्यगोष्ठ्याः प्रस्तावना | १-५ |
| २ श्रीवीतरागस्तोत्रस्य उपक्रमः | १०-१६ |
| ३ श्रीस्याद्वादभाषा-प्रस्तावना | २२-१६ |
| ४ श्रीपाक्षिकसूत्रस्योपक्रमः | २६-३१ |
| ५ श्रीकल्पसूत्रस्योपक्रमः | ३६-४२ |
| ६ श्रीअध्यात्ममतपरीक्षाप्रस्तावना | ५०-५४ |
| ७ श्रीवन्दारुवृत्ति-उपोद्घातः | ५९-६१ |
| ८A श्रीछन्दोऽनुशासनग्रन्थस्य उपक्रमः | ६८-७० |
| ९B ,, पूर्त्तिः | ७१-७३ |
| १० श्रीजल्पकल्पलता-प्रस्तावना | ७८-८१ |
| ११ श्रीयोगदृष्टिसमुच्चयग्रन्थस्य उपोद्घातः | ८८-९१ |
| ११ श्रीकर्मग्रन्थोपोद्घातः | ९५-१०२ |
| १२ श्रीपंचाशकग्रन्थप्रस्तावना | ११७-१२१ |
| १३ श्रीकर्मप्रकृत्युपोद्घातः | १२९-१३२ |
| १४ श्रीधर्मपरीक्षायाः प्रस्तावना | १४२-१४४ |
| १५ श्रीषड्पुरुषचरित्रोपक्रमः | १५०-१५२ |

| आनन्दलहरीटिप्पणी | पृ० |
| --- | --- |
| १ श्री त्रैविद्यगोष्ठीप्रस्तावना-टि० | ६-९ |
| २ श्री वीतरागस्तोत्रोपक्रम-टि० | [illegible]-२१ |
| ३ श्री स्या०भा० प्रस्ता० टि० | २४-२५ |
| ४ श्री पा०सू० उप० टि० | ३२-३५ |
| ५ श्री कल्प० उप० टि० | ४४-४९ |
| ६ श्री अध्या० परी० उप० टि० | ५५-५८ |
| ७ श्री वंदा०वृ० उपो० टि० | ६२-६७ |
| ८ श्री छंदो० उप० टि० | ७४-९७ |
| ९ श्री जल्प० प्रस्ता० टि० | ८२-८७ |
| १० श्री योग०समु० उपो० टि० | ९२-९४ |
| ११ श्री कर्म० उपो० टि० | १०४-११६ |
| १२ श्री पंचा० प्रस्ता० टि० | १२२-१२८ |
| १३ श्री कर्मप्रकृ० उपो० टि० | १३३-१४२ |
| १४ श्री धर्मपरी० प्रस्ता० टि० | १४५-१४९ |
| १५ श्री षड्पु० चरि० उप० टि० | १५३-१५४ |

स्थलपूर्तिकरणे उपयोगि

## सुभाषितसंचयः


| | पत्रम् |
|---|---|
| १ परमात्मस्वरूपम् आगमस्तुतिश्च | ५ |
| २ जैनागमप्रधानता | २३ |
| ३ जिनशासनाराधक-मनोदशा | २५ |
| ४ अन्तःप्रार्थना | ३५ |
| ५ संसारिजीवेच्छा ममतात्यागशिक्षा | ४३ |
| ६ अध्यात्मप्राप्तिः कदा?? | ५४ |
| ७ गुणपूजामहत्त्वम् | ५८ |
| ८ देवगुरुधर्माणां मार्मिकी व्याख्या | ६१ |
| ९ मुमुक्षूपयोगी संक्षिप्ताक्षरं | |
| सुभाषितचतुष्कम् | |
| १० मोहनीयकर्मप्रबलता | ९१ |
| ११ सम्यग् हृदि धारणीयम् | १४९ |
| १२ गुरुनिश्रयोद्वहनीयं सम्यक् | १५२ |


## हा....र्दि....कं....

## स....म....र्प....ण....म्...

श्रीमतां पूज्यपादानामागमपारदृश्वनां श्रुतज्ञानपारावारपारीणानां
शास्त्रतत्त्वपर्यालोचनक्षमपटुक्षयोपशमवतां
जिनप्रणीतागमतत्त्वतलस्पर्शिव्याख्यासुदक्षाणां
शासनप्रत्यनीकविविधवादिदर्पोद्ध्वंसनक्षमवाग्विलासाञ्चितानां
पूज्यपादानामागमोद्धारकाणाम्
ध्यानस्थस्वर्गतानाम् सूरिशेखराणाम्
श्रीआनन्दसागरसूरीश्वराणाम्
करात्रयोः पदाम्बुजयोः
सा....द....रं....स....प्र....श्र....यं
श्रद्धाञ्जलिपुरस्सरं
प्रस्तुतं पुस्तकरत्नं समर्प्यते
तदीयनामोल्लेखसनाथया
प्रकाशनकारिण्या संस्थया

## प....का....श....क....त ...र....फ....थी....

देवगुरुकृपाए स्वनामधन्य आगममर्मज्ञ आगमसम्राट् **पू. आगमोद्धारक.** स्व. आचार्यदेवश्रीना नामथी संकळायेली अमारी संस्था तरफथी वात्सल्यसिंधु **पू. गच्छाधिपति आचार्यदेव श्री माणिक्यसागरसूरीश्वरजीनी** देखरेखतळे पू. आगमोद्धारकश्रीए अप्रतिम प्रतिभाबळे संस्कृत–प्राकृत–गुजराती–हिंदीमां रचेल विविध नानी–मोटी कृतिओ प्रकाशित करवानुं सौभाग्य मळ्युं छे, जे अमारे मन खूब आनंदनी वात छे.

वि. सं. २०१०मां पू. आगमोद्धारकश्रीना शिष्यरत्न पू. **विद्वद्रत्न गणिवर्यश्री सूर्योदयसागरजी म.**नी प्रेरणाथी आ संस्था गतिशील बनी छे, पण आज सुधीमां प्रकाशित सघळा ग्रंथो करतां सापेक्ष रीते एम कहेवानी धृष्टता अमे करीए छीए के—

"प्रस्तुत "**आनंदरत्नाकर**" ग्रंथ सौथी विशिष्ट छे."

केमके पू. आगमोद्धारकश्रीनी अथाग विद्वत्ता प्रौढ प्रतिभा अने विषयोने संक्षेपवानी उदात्त नीति आ ग्रंथमां संग्रहायेली विशाळकाय प्रस्तावनाओमां स्पष्ट रीते झळके छे.

पूज्य गणिवर्यश्री **सूर्योदयसागरजी म.**नी प्रेरणाथी पूज्य शासनसुभट संघसमाधितत्पर शासनसंरक्षक तपस्वी **उपाध्याय श्री धर्मसागरजी म. गणिवरना** शिष्य **पू. मुनि श्री अभयसागरजी म० गणीए** खूब खंतथी प्रयत्न करी पू. आगमोद्धारक आचार्यदेवश्री ए प्रौढ संस्कृत भाषामां ८२ प्रन्थोनी लखेली प्रस्तावनाओनु व्यवस्थित संपादन अने कठिन शब्दोना अर्थ, अन्वयनी संगति आदि माटे "**आनंदलहरी**" नामे सुंदर टिप्पण लखीने पूज्य आगमोद्धारक आचार्यदेवश्रीनी सर्वतोमुखी प्रतिभाना अंतरंग दर्शन अल्पबोधवाळा संस्कृत भाषाना सामान्य ज्ञानवाळा जिज्ञासुओ पण करी शके तेवी सरळता करी आपी छे.

ते बदल अमे पूज्य महाराजश्रीनी श्रुतभक्तिनी हार्दिक वंदना साथे अनुमोदन करीए छीए.

आ बहुमूल्य ग्रंथना प्रकाशन माटे आर्थिक दृष्टिए अमोने निश्चित बनावनार धर्मप्रेमी ते ते महानुभावोने उपदेश–प्रेरणा आपो प्रकाशन कार्य संबंधी आर्थिक सरळता माटे पुनित प्रेरणा आपनार

पू. आगमोद्धारकश्रीना सर्वप्रथम शिष्यरत्न **पू. स्व. पं. श्री विजयसागरजी म. गणीना** शिष्य रत्न–

प्रौढ पुण्यप्रतापी, शासनप्रभावक, कपडवंज, लुणावाडा, महीदपुरना प्राचीन जीर्ण मंदीरोना जीर्णोद्धार करावनार–

आगम ज्योत ( पू. आगमोद्धारकश्रीना अप्रकाशित व्याख्यानोना प्रकाशन रूप) ना स्थायी कोश, श्रुत संरक्षण समिति (बधा आगमो टीका साथे हाथना बनेल कागळो उपर लहीयाओ रोकी लखावी लेवानी योजना) आदिना संस्थापक-प्रेरक–

पू. गणिवर्यश्री शांतमूर्त्ति श्री लब्धिसागरजी म.

तथा पू. गणिवर्य श्री सूर्योदय सागरजी म. पू. गणिवर्यश्री यशोभद्रसागरजी महाराजश्रीए पू. आगमोद्धारक आचार्यदेवश्रीना विद्वद्भोग्य आ ग्रंथना प्रकाशन माटे धर्मप्रेमी गृहस्थोने उपदेश आपी जे आर्थिक सहयोगनो लाभ अपाव्यो छे, ते बदल अमो श्रद्धावनत मस्तके त्रणे पू. गणिवर्यश्रीओनी गुरुभक्तिनी अभिवंदना करीए छीए.

छेवटे साचा दिलथी निखालसभावे क्षमा याचना करवानी छे के–

आ ग्रंथनुं कार्य पू. महाराजश्रीए वि. सं. २०२० ना चोमासामां तैयार करी प्रेसमां अमारी मारफत आपेल. पण परिस्थितिवश प्रेस बदलाववानी अगवडो तेमज अनिवार्य कारणसर घार्या करतां खूबज मोडुं थयुं छे. जे अमोने पण शल्यनी जेम खूंचे छे. पण साथे ज आवा अनुपम ग्रंथ रत्ननुं प्रकाशन करवानो अमूल्य लाभ मळ्यो, ते बदल अमो अमारी जातने धन्य मानीए छीए.

वधुमां खास जणाववानुं के, आ ग्रंथनुं प्रकाशन अनेक मुश्केलीओमांथी पसार थयुं छे. जेमां खास करीने आ ग्रंथना छापकामनी शरुआत ज्ञानोदय प्रेस पिंडवाडामां थयेल, पण संजोग-वश ८ फर्मा (६४ पानां) थी काम अटक्युं, पछी अमदावाद नवप्रभात प्रेसमां काम शरु थयुं त्यां पण दोढ वर्षमां मात्र बे फर्मा थया, परंतु पछी पू. गणिवर्यश्री अभयसागरजी म.नी सूचनाथी चाणस्मावाळा धर्मप्रेमी श्री बाबुलाल केशवलाल शाह (११-नगरशेठ मार्केट, रतनपोळ, अमदावाद) मारफत काम गोठवायुं अने खूबज चीवट, खंत अने महेनतथी सुंदर कार्य झडपी करवानुं लक्ष्य राखी आ ग्रंथना वर्षो जुना छापकाममां अमारा मंद थयेल उत्साहने वेगवंत बनाव्यो छे.

तेथी बाबुभाई चाणस्मावाळा तथा श्री ज्ञानोदय प्रेस, श्री नवप्रभात प्रेस, तथा प्रस्तावना आदि छापनार वसंत प्रेसना तथा तेमना व्यवस्थापक सहयोगीओनां धर्मस्नेहनी हार्दिक अनुमोदना करीए छीए.

टाईटलनुं छापकाम सुन्दर रंगीन सहीमां आकर्षक रीते करी आपनार दीपक प्रिन्टरी तथा टाइटलनुं सुन्दर चित्र पू. महाराजश्रीनी दोरवणी प्रमाणे बनावी आपनार विशिष्ट कलाकार छतां छूपा रही कलानी साधना करनार मान्यवर श्री दलसुखभाई शाह (आंबावाडी–रामनगर–साबरमती अमदावाद–५) आर्टिस्टना धर्मप्रेमनी हार्दिक अनुमोदना करीये छीए.

प्रांते विविध तबक्काओमांथी पसार थयेल आ कार्यमां दृष्टिदोष के छद्मस्थसुलभ प्रमादादिथी

जे कंई क्षतिओ रही होय, ते सुज्ञ पाठको हंसक्षीरन्याये उदार भावे क्षंतव्य गणी प्रस्तुत ग्रंथनां पठन-पाठन-वाचन-अभ्यास आदि द्वारा पू. आगमोद्धारकश्रीनी अप्रतिम बहुमुखी प्रतिभापूर्वक आलेखायेल विशिष्ट ग्रंथरत्नोना रसास्वादना भागी बनी आत्मकल्याणना पंथे मंगळयात्रा वधावे ए कल्याण कामना.

दलालवाडो, कपडवंज (खेडा)
वी. नि. सं. २४९८
वि. सं २०२८
चै. व. ९.

निवेदक
रमणलाल जेचंदभाई
मुख्य कार्यवाहक
श्री आगमोद्धारक जैन ग्रंथमाळा

मु....मु....क्षु....भा....व....नां सा....ध....नो....
गुणानुराग, स्वदोषदर्शन, ज्ञानीनी निश्रा
कर्त्तव्यनिष्ठा थी मुमुक्षुभावा केळवाय छे.
—पू. आगमोद्धारकश्री



# उ....प....क्र....म....णि....का

**निबन्धयितारः**

**पूज्याचार्यवर्यश्रीविजयधर्मधुरंधर-**

**सूरीश्वरमहाभागाः**

विश्वस्मिन् विश्वेऽस्मिन् प्राणिनां परमात्मपथ-प्राप्तिः परमदुर्लभाऽस्ति, नरभवादिकमवाप्यापि केषाञ्चिदेव पुण्यभाजां भवति तत्त्वबुभुत्सा । तत्त्वं तु भगवद्भिरर्हद्भिः केवलज्ञानतो ज्ञात्वा लोका-ऽलोकस्वरूपमखण्डं देशितमात्महितकरम् । अर्थतो देशितां जिनैर्गणधरैश्शब्दतो ग्रथितां तां तत्त्वपूर्णां द्वादशाङ्गीमवलम्ब्यानेके भव्या भवपारावारस्य परं पारं प्रयातुमुद्यता अभूवन् । परं कालानुभावतः सत्त्वानां सत्त्व-हान्यादि सञ्जातम् । तत एव महाप्रवहणप्रख्या सा द्वादशाङ्गी शीर्णविशीर्णाऽभवत् । एवमपि सन्ति साम्प्रतमुडुपसदृक्षाः शुचिभावभृता आगमादयः सहस्रशो ग्रन्थाः । तेषु तेषु ग्रन्थेषु द्रव्यानुयोग-चरणचकरणानुयोग-धर्मकथानुयोग-गणितानुयोगविवरणं रुचिकरं वरीवर्ति ।

नरजन्मन्यपि प्रायशो जीवास्तीव्रज्ञानावरणीयकर्मोदयवशवर्तिनोऽक्षरश्रुतलाभमपि न लभन्ते; अक्षरश्रुतमधिगत्य व्यावहारिकविज्ञानपङ्के पतिता बहुशो न ततो बहिरागन्तुमलम् । एवञ्च सत्यपिवर्यसाधनजाते

ततश्च भूरिशो मिथ्यात्वोदयेन विपरीततत्त्वशीलन एव स्वसमयं गमयन्ति ।

तथा च जिनवरोपदिष्टं गणधरादिसूरिप्रवरग्रथितं सम्यक् श्रुतमधिगन्तुं भव्यैः साधु यतनीयम् ।

तत्र प्रथमं श्रुतमिदं परमाभीष्टसाधनमस्तीति विश्वासो दृढभूमिमानेयः ।

ततश्च तत्तच्छ्रुतप्राप्तियोग्यं स्वसामर्थ्यमनुसन्धेयम् । गुरवो योग्यतामवबुध्य शिष्यं तत्तदध्ययनाय प्रवर्तयन्ति, परं तत्तद्ग्रन्थपरिचयाद्यापादनयोग्यस्य प्रस्तावनादिकस्य साम्प्रतं शिष्टसम्मतस्य प्रारम्भे लेखनस्य व्यवहारः प्रवर्तते । दृष्ट्वा तद् ग्रन्थं वाचयितुमुत्सहन्ते शतशो जिज्ञासवो जनाः । आनन्द-रत्नाकराख्योऽयं ग्रन्थो न स्वतन्त्रः, अपितु तत्तत्पञ्चदश ग्रन्थानां प्रस्तावनानां सङ्ग्रहात्मकः ।

श्रीत्रैविद्यगोष्ठी-श्रीवीतरागस्तोत्र-श्रीस्याद्वादभाषा-श्रीपाक्षिकसूत्र-श्रीकल्पसूत्र-श्रीअध्यात्ममत-परीक्षा-श्रीवन्दारुवृत्ति-श्रीछन्दोऽनुशासन-श्रीजल्पकल्पलता-श्रीयोगदृष्टिसमुच्चय-श्रीकर्मग्रन्थ-श्रीपञ्चाशक-श्रीधर्मपरीक्षा-श्रीषट्पुरुषचरित्रेतिपंचदश ग्रन्था लब्धप्रतिष्ठाः सूरिप्रवरसन्दब्धाआत्म-बोधदायिनीं शेमुषीं जनयितुमवन्ध्यजननीकल्पा विराजन्ते यथा, तथैवायं प्रस्तावनाकलापोऽपि ।

आसां प्रस्तावनानां प्रथनमानन्दसागरसूरीश्वरैः श्रीमद्भिश्शास्त्रपारावारतलावगाहनावाप्तविशिष्ट-बोधरत्नैश्चक्रे। चिरन्तनाचार्यस्मृतिविधायिनी श्रुतोपासनाऽमीषां विदितप्रायैव। प्रस्तुतप्रस्तावना-कदम्बकात्मक आनन्दरत्नाकरोऽपि विदुषामेतेषामुपरि सद्भावाऽह्लोभावं जनयिष्यत्येव।

प्रस्तावनापञ्चदशकेऽस्मिन् तत्तद्ग्रन्थोपयोगिनी विचारणा प्रौढ्या प्रतिपादिता वर्तते, ततश्च तत्तद्-ग्रन्थाध्ययनाय समुत्सहते चेतो योग्यानाम्। विशिष्टावबोधमन्तरा प्रस्तावनावाचनमपि न सुकरं सामान्यजनतानाम्। प्रस्तावनायाः काठिन्यमपाकर्तुं तत्तत्प्रस्तावनाया अनन्तरं साधीयसी टिप्पणी वितीर्णास्ति। टिप्पणीयं श्रीमता मुनिवराऽभयसागरेण गणिना विदधे, सेयं पिपठिषूणामतिशयेनो-पयुक्ता भाविनीति स्पष्टम्। सर्वा इमाः प्रस्तावना अर्धशतकसंवत्सरपूर्वमाविर्भूताः सन्ति। अन्याः शतशो ग्रन्थानां प्रस्तावना अपि सङ्ग्रहरूपेणेत्थंप्रकटीभवेयुस्तदा श्रुतविवृद्धौ परम-निमित्तं भविष्यन्त्येव, स्यात्समेषामज्ञानतिमिरनिराकरणकुशलः सम्यग्ज्ञानसूर्योदय इति॥

(राजपुर)
(तणसा)
(सौराष्ट्र)

विजयधर्मधुरन्धरसूरिः
पौषशुक्लापञ्चमी
ग्लौतनयः

**श्रामण्यशुद्धिहेतवः**

० आगमपर्यालोचनम्
गीतार्थनिश्राविहृतिः
संयम-यतना परेता
श्रामण्यशुद्धेः प्रधान-हेतवः॥



# सम्पादन-सम्बन्धि............

श्रद्धाभक्तिभरोपनीताऽपूर्वहृदुल्लासपरिपूताऽन्तरङ्गबहुमानगर्भश्रुतभक्तिवरप्रतिभूरुपं सरससुविशद-जिनागम वरश्रुतोभयालम्बनेनापारभववारांनिधितरणेप्सूनां सद्विवेकचक्षुष्कानां सुजनमतल्लिकानां प्रवरकर-कुशेशययोरुपदीक्रियमाणमिदं हि ग्रन्थरत्नमापाततोऽपि सुभगविद्याविलासाञ्चितं सत् प्रवरतात्त्विक-बोधोत्पादनप्रत्यलं प्रतीयमानं सुनिपुणधिया पठनादिषु प्रेरयमाणमन्वर्थाभिधानं सुबहुविवेकभ्राजिनां हि वाचकवर्याणां ग्रन्थस्याऽन्तरङ्गस्वरूपस्य संक्षिप्य दर्शनायोत्कतामुत्पादयेदेव, न हि चित्रमत्र, अत एव तत्सन्तुष्टयेऽल्पो ह्यनल्पार्थशालिगभीरतमरहस्यपरिपूरितग्रन्थवस्तूनां परिचयात्मको ह्येष प्रयासो वितन्यते ।

ग्रन्थो ह्ययं न हि स्वतन्त्रः, न वाऽस्य ग्रन्थरूपेण विरचनाय प्रकृतग्रन्थान्तर्गतनिबन्धकारस्य वा प्रवृत्तिर.प, किन्तु जगज्जन्तुजीवातुभावजीवनोपत्ति-वृध्द्यादिप्रवणजिनशासनापारगगनोद्योतिनां विशिष्टज्योतिष्पिण्डानां समुज्ज्वलश्रुतज्ञानभक्तिसमुपबृंहिताऽऽगमपठनपाठनादिवृद्धिकरणोद्योगाव्युच्छि-त्तिकरणाशयादिभिर्विशिष्टतमैः प्रवरज्योतिष्पिण्डसमैः,भस्मकराशिग्रहावरोधपरिपुष्टविषमदुष्षमारप्रभा-वावष्टब्धजिनशासनप्रथितप्रतापप्रसरवति वैक्रमीये विंशतितमे शतके जीवमात्रस्य विषमदुर्भेद्यकर्म-ग्रन्थिविभेदने क्षमस्य द्वादशाङ्गश्रुतमयवाणेः परिचायकानामागमानां पठन-पाठनादिप्रवृत्तिमन्दतायाः व्यासङ्गहानेश्च पुरातनभाण्डागारस्थितहस्तलिखितप्राचीनप्रतीनां कीटकोपदेहिकादिपरिदष्टत्व-प्रति-दौर्लभ्य-लिप्यनवबोधादिकारणैः सुतरां वृद्धिमति सति विशिष्टपूर्वभवाराद्धश्रुतज्ञानबलेन लघीयसि वयसि सुदीक्ष्यात्यल्पसमयादूर्ध्वं गुरुविरहेऽप्यनन्यलब्धसाहाय्यैः प्रतिसमीक्षण-मुद्रणयोग्यताऽऽपादन-शुद्धिपरिमार्जनप्रभृतिकार्यजातमदम्यश्रुतभक्तिविजृम्भितोत्साहैरखण्डं सम्पाद्य, स्थाने स्थाने विशालागम वाचनासप्तकञ्चायोज्य श्रमणसङ्घे आगमज्ञानपरिपाटिसमुपजीवकाः '**कलिकालेऽप्रतिमश्रुतधरेति** यथार्थबिरूदधारकैरागममर्मज्ञैः ध्यानस्थस्वर्गतैः केनाऽपि विधिपूर्वमदत्तमपि याथार्थ्येन स्वतः लब्धम् "**आगमोद्धारके**"त्युपपदरूपविशेषणं सफलीचक्राणैः **श्रीआनन्दसागरसूरीशैः** भगवद्भिः एकाधिकेन्द्रसंख्यामिते सुदीर्घे संयमपर्याये रत्नत्रयाराधनमक्षुण्णं प्रकुर्वद्भिः प्रतिवादिपराभव-शासनप्रभावना-सत्तीर्थयात्रासङ्घ-सुविशालशिष्यसमुदायपरिकर्मणाऽऽदिविविधधर्मकार्यव्यापृतिमत्त्वेऽपि अस्थिमज्जाऽनुगतश्रुतानुरागपरिप्रेरितधिषणाव्यापारैः पूर्वभवीयविशिष्टक्षयोपशमबलेन पादोनद्विशत (१७५) मितागम--प्रकरण--चरित्र--कथाग्रन्थप्रभृतीनां ग्रन्थरत्नानां सुविशुद्ध--स्वच्छ-सरलबोधानुगुणं सम्पादनं प्रकृत्य विविधधर्मप्रेमिगृहस्थाऽऽदीन् प्रबोध्य सुमहार्घसुन्दरतमपत्रेषु सम्मुद्रय जिन-वाणीसमाराधनसमीहावतां विद्वन्मतल्लजानां प्रकरण--कथाग्रन्थादिसमभ्यासेनाराधनाया पथि भावो-ल्लासप्राप्तीहावतां बालजीवानाञ्च हिताय प्रसिद्धिमानीतम् ।

तेषु च त्र्यशीति (८३) संख्यग्रन्थेषु पूज्यपादैरागमपारदृश्वभिरागमोद्धारकैः बहुश्रुतसूरिपुरन्दरैरागमोद्धारकाचार्यपादैः बालजीवानां संक्षेपतोऽपि समस्तग्रन्थसारतत्त्वपरिचायनक्षमाः विद्वद्भोग्यप्रौढभाषाशैलीनिबद्धाः सुरुचिरहृद्यप्रयोगावलीभ्राजिताः सुन्दरतमाः प्रस्तावनाः प्रस्तावनो-पक्रमोपोद्घातो-पक्रमणिकादिरूपेणालेखिताः ।

ताश्च येषु ग्रन्थेषु सन्ति, तेषां नामानि प्रस्तावनाऽऽलेखनसमयनिर्देशसहितानि त्वेवम्ः—

| सं. | ग्रन्थनाम | कदा लिखिता ? |
|---|---|---|
| १ | श्रीत्रैविद्यगोष्ठी | विक्रम सं. १९६६ आसो सु. ६. |
| २ | श्रीवीतरागस्तोत्रम् | १९६७ पौष कृ. ५ |
| ३ | श्रीस्याद्वादभाषा | १९६७ माघ सु. १५ |
| ४ | श्रीपाक्षिकसूत्रम् | १९६७ जे. सु. ११ |
| ५ | श्रीकल्पसूत्रम् | १९६७ असाड सु. १४ |
| ६ | श्रीअध्यात्ममतपरीक्षा | १९६७ |
| ७ | श्रीवंदारूवृत्तिः | १९६८ |
| ८ | श्रीछन्दोऽनुशाशनम् | १९६८ |
| ९ | श्रीजल्पकल्पलता | १९६८ भा. सु. १५ |
| १० | श्रीयोगदृष्टि—समुच्चयः | १९६८ भा. कृ. १३ |
| ११ | श्रीकर्मग्रन्थः | १९६८ |
| १२ | श्रीपञ्चाशकग्रन्थः | १९६८ |
| १३ | श्रीकर्मप्रकृतिः | १९६९ फा. कृ--१ |
| १४ | श्रीधर्मपरीक्षा | १९६९ |
| १५ | श्रीषट्पुरुषचरित्रम् | १९७१ माग. कृ. १२ |
| १६ | श्रीकल्पसूत्रम् | १९७० श्रा. सु. ४ |
| १७ | श्रीस्थूलभद्रचरित्रम् | १९७१ पौ. सु. ६ |
| १८ | श्रीललितविस्तरा—पञ्जिका | १९७१ श्रा. कृ. २ |
| १९ | श्रीउपदेश—रत्नाकरः | १९७१ श्रा. कृ. ९ |
| २० | श्रीमलयसुन्दरी—चरित्रम् | १९७२ पौ. सु. ५ |
| २१ | श्रीगुणस्थान—क्रमारोहः | १९७२ जे. कृ. ६ |
| २२ | श्रीसम्यक्त्व—परीक्षा— उपदेशशतकौ | १९७३ का.कृ ६ |

| सं. | ग्रन्थनाम | कदा लिखिता ? विक्रम. सं. |
|---|---|---|
| २३ | श्रीधर्मकल्पद्रुमः | १९७३ माग. कृ. १३. |
| २४ | श्रीधर्मसङ्ग्रहः भाग २ | १९७४ फा. सु. ५ |
| २५ | श्रीश्राद्धप्रतिक्रमणसूत्रवृत्तिः | १९७५ जे. कृ. १२ |
| २६ | श्रीप्रश्नोत्तर--रत्नाकरः | १९७५ आसो. सु. १३ |
| २७ | श्रीउपमितिभवप्रपञ्चकथा | १९७६ |
| २८ | श्रीकल्पसूत्र–सुबोधिका | १९७९ श्रा. सु. ११ |
| २९ | श्रीश्रीपालचरित्रम् (प्राकृतम्) | १९७९ आसो कृ. ४ |
| ३० | श्रीविंशतिस्थानकचरित्रम् | १९७९ |
| ३१ | श्रीधर्मबिन्दु–प्रकरणम् | १९८० फा. सु. ५ |
| ३२ | श्रीप्रकरणसमुच्चयः | १९८० फा. सु. ५ |
| ३३ | श्रीसुबोधा समाचारी | १९८० |
| ३४ | श्रीप्रवचनसारोद्धारः | १९८१ आसो कृ. १२ |
| ३५ | श्रीआचारप्रदीपः | १९८१ |
| ३६ | श्रीनवपदप्रकरणलघुवृत्तिः | १९८३ का. सु. ३ |
| ३७ | श्रीपंचवस्तुप्रकरणम् | १९८३ का. सु. ९ |
| ३८ | श्रीनवपदप्रकरणबृहद्वृत्तिः | १९८३ आसाड कृ. ९ |
| ३९ | श्रीनन्द्यादीनाम् अकारादिः | १९८४ पो. कृ. १३ |
| ४० | श्रीयुक्तिप्रबोधः | १९८४ असाड कृ. १ |
| ४१ | श्रीशास्त्रवार्तासमुच्चयः | १९८४ श्रा. सु. ३. |
| ४२ | श्रीजीवसमासः | १९८४ श्रा. सु. ३ |
| ४३ | श्रीनन्दिचूर्णिवृत्तिः | १९८४ |
| ४४ | श्रीमहावीरचरित्रम् | १९८५ |
| ४५ | श्रीवन्दारुवृत्तिः (द्वि. सं.) | १९८५ माग. सु. ५ |
| ४६ | श्रीपञ्चाशकादीनाम् अकारादिः | १९८६ आसो सु. १ |
| ४७ | श्रीउत्तराध्ययनचूर्णिः | १९८९ आसो सु. १ |
| ४८ | श्रीदशवैकालिकचूर्णिः | १९८९ फा. सु. ३ |
| ४९ | श्रीतत्त्वतरङ्गिणी | १९९० भा. कृ. ४ |

| सं. | ग्रन्थनाम | कदा लिखिता ? विक्रम सं. |
|---|---|---|
| ५० | श्रीललितविस्तरा टिप्पणम् | १९९० भा. कृ. ८ |
| ५१ | श्रीसिद्धप्रभाव्याकरणम् | १९९० आसो सु. २ |
| ५२ | श्रीआवश्यकसूत्रं (मलयगिरिवृत्तिः) भा. ३ | १९९२ माह सु. २ |
| ५३ | श्रीतत्त्वार्थहारिभद्रीयवृत्तिः | १९९२ माह सु. ६ |
| ५४ | श्रीषोडशकप्रकरणम् | १९९२ |
| ५५ | श्रीविशेषावश्यकभाष्यम् | १९९३ माग सु. ११ |
| ५६ | श्रीयतिदिनचर्या | १९९३ फा. कृ. १ |
| ५७ | श्रीप्रवचनपरीक्षा | १९९३ वै. सु. १३ |
| ५८ | श्रीबुद्धिसागरः | १९९३ वै. सु. १३ |
| ५९ | श्रीकल्पकौमुदी | १९९३ भा. सु. |
| ६० | श्रीउत्पादादिसिद्धिः | १९९३ आसो कृ. ११ |
| ६१ | श्रीपञ्चवस्तुभाषान्तरम् | १९९३ |
| ६२ | श्रीपुष्पमाला--उपदेशमाला | १९९३ |
| ६३ | श्रीअङ्गाकारादिः | १९९३ |
| ६४ | श्रीप्रवचन परीक्षानी महत्ता | १९९३ |
| ६५ | श्रीतत्त्वार्थकर्तृतन्मतनिर्णयः | १९९३ |
| ६६ | श्रीकथाकोषः | १९९४ का, सु. ५ |
| ६७ | श्रीकल्पसमर्थनम् | १९९४ माग. सु. ४ |
| ६८ | श्रीकृष्णचरित्रम् | १९९४ वै. कृ. ७ |
| ६९ | श्रीश्रेणिक–चरित्रम् | १९९४ जे. सु. १ |
| ७० | श्रीभवभावना | १९९४ जे. सु. १५ |
| ७१ | श्रीप्रवज्याविधानकुलकम् | १९९४ असाड सु. १ |
| ७२ | श्रीनम० माहात्म्यम् | १९९४ असाड सु. १० |
| ७३ | श्रीदेववंदनभाष्यम् | १९९४ भा. सु. २ |
| ७४ | श्रीश्राद्धदिनकृत्यम् भा. १ | १९९४ आसो सु. १५ |
| ७५ | श्रीश्राद्धदिनकृत्यम् भा. २ | १९९५ चैत्र सु. १५ |
| ७६ | श्रीस्वाध्यायप्रकाशः | १९९५ |

| सं. | ग्रन्थनाम | कदा लिखिता ? विक्रम सं. |
|---|---|---|
| ७७ | श्रीप्रशमरति–प्रकरणम् | १९९६ चै. कृ. ६ |
| ७८ | श्रीअध्यात्मकल्पद्रुमः | १९९७ का. सु. ५ |
| ७९ | श्रीपञ्चाशकप्रकरणम् (द्वि. आ.) | १९९७ वै. सु. ३ |
| ८० | श्रीआचाराङ्गचूर्णिः | १९९८ |
| ८१ | श्रीउपाङ्गाकारादिः | २००५ का. सु. १५ |
| ८२ | श्रीलघुसिद्धप्रभा | २००५ माग. सु. २ |
| ८३ | श्रीउपदेश–रत्नाकरः | २००५ |

एतासु च नैकविधा सामग्री पूज्यागमोद्धारकपादैः प्रकृष्टतमशैल्या सङ्कलिता परिदृश्यते । अतः पूज्यागमवाचनादातुः सूरिवर्यस्य व्यक्तित्वमनभिजानानां विदुषां बालजीवानाञ्च मानसे वैक्रमीयविंशतितमशताब्द्या अप्रतिमश्रुतधररूपेणागमोद्धारकस्य परिचायनाय शैलाणानरेश–सेमलिया–पंचेडाप्रभृति–संस्थानाधीशानां हृदि धर्मबीजवपनपटूपदेशलब्धिसम्पन्नानामागमावताररूपाणामेतेषां सूरिवर्याणां परमविनेयानां मुख्येषु द्वात्रिंशच्छिष्येषु लघुतमवयसि दीक्षितत्वेन सुदृढज्ञानार्जनसुसंयमपालनादिगुणकदम्बेन चाऽतिप्रीतिपात्राणां पूज्यवर्याणां गणिवर्याणां **श्रीसूर्योदयसागरजितां** महाभागानां मनसि बहुश्रुतसूरिपुरन्दराणां स्वगुरुवर्याणां निष्प्रतिमाऽगाधवैदुष्यप्रभावनायै हि भक्ति–प्रेरितः शुभोऽध्यवसायो चेतसि प्रादुर्बभूव, यत्—"एतासां समासां प्रस्तावनानां यदि व्यवस्थिता सङ्कलना क्रियेत तर्हि विद्वत्सभामनस्तोषकारिणां विदुषां मनसि पूज्याऽऽगमोद्धारकाऽऽचार्यवर्यस्यागाधाऽद्वितीयाऽनन्यसाधारणी सर्वतोमुखप्रौढवैदुष्यावबोधमूलिका चमत्कृतिः स्यादिति ।"

अज्ञाताऽप्रतर्कितशुभवेलायामुत्पन्नो ह्ययमध्यवसायः गुरुभक्ति–श्रुतोपासनादिप्रबलतमेरणादि-प्रगुणितः शनैः शनैः यथाऽवसरं पूज्याऽऽगमतत्त्वज्ञ ऽऽगमसुगूढमर्मोद्घाटनपटिष्ठक्षयोपशमविभ्राजि पूज्यपादागमोद्धारकश्रीसम्पादितपादोनशतद्वयाधिकविशालग्रन्थवारांराशितः पूज्याऽऽगमवारांनिधि-कुशलपरिकर्मितधीरप्रावदूणिकोत्तंसायमानसूरिभगवद्लिखितप्रस्तावनासनाथग्रन्थरत्नानि विचिनुय तद्गतप्रस्तावनो–पक्रमो–द्घात–भूमिकाऽऽदिविविधशीर्षकरूपेण पूज्याऽऽगमोद्धारकसूरिपादाऽऽलेखितवरनिबन्धानां मुद्रणयोग्यप्रतिलिपिकरणकारणादिरूपेण वर्यसङ्कलनारूपेण मूर्त्तभावमभजत् कतिपयैः वर्षैः ।

एवं सङ्कलनात्मकं पुण्यकार्यं विदधतां सहृदयानां मनीषिसदुत्तमानां पूज्यवर्याणां गणिवर्याणां **श्रीसूर्योदयसागरजीमहाभागानामा**बाल्यतोऽध्ययन-संवसन-विविधविद्याक्षेत्रपरिकर्मणादिषु सहभागित्वरूपं प्रवरभागधेयलभ्यमलभ्यलाभलब्धिमिव सम्प्राप्यात्मनः सुभगत्वमेतत्पंक्तिलेखकेन लब्धमस्ति ।

तेन हेतुना यथाऽवसरं श्रीमद्भिः पूज्यवर्यैः वीतरागोपासना–श्रुतभक्ति–कर्मग्रन्थादिसूक्ष्मतात्त्विकविचारसुदक्षैः धर्मस्नेहप्रपूरितकरुणाप्रेरितैः सद्भिः **सूर्योदयसागरगणिभिः** सुतरां प्रयतनेन राद्धप्रगुणितरसवतीस्थालवत् समस्तं हि सङ्कलनं पूज्याऽऽगमोद्धारकश्रीवर्यकृपाकटाक्षद्रव्यप्रातिलम्भेनाऽपि वञ्चितस्य पूज्यवर्याणामगाधशक्तिप्रसरव्रजाऽपेक्षयाऽतितुच्छशक्तिमतोऽपि प्रकृतपंक्तिलेखकस्य पुरतः समुपन्यस्तं, साग्रहं सानुरोधं चैतत्सङ्कलनं व्यवस्थितरूपेण सम्पादनाय प्रेरितोऽयं जनः, समर्थितं च विशदाऽऽन्तरभावप्रकटीकरणेन यत्–"पूज्याऽऽगमचिरस्थायित्वक्लृप्तिप्रवराध्यवसायवतां बहुश्रुतप्रवराणां वादिमतंगजसिंहानां सूरिवर्याणां प्रवरातिशयितवैदुष्यं यार्थार्थ्येन विद्यावारिधिव्यालोडनक्षमविदुषां मनसि प्रतिबिम्ब्येत, तथाऽयं प्रस्तावनासङ्ग्रहः सुरुचिरशैल्या समुपस्थापनीयः विद्वज्जनसमक्षं" इति प्रबलप्रेरणयाप्रोत्साहितोऽयं सेवकजनः ।

उररीकृतश्चामोदपूर्णहृदयेनैतत्व्याजेन पूज्यपादाऽऽगमोद्धारकश्रीणांद्रव्य तोऽपरिचितव्यक्तित्वस्य याथार्थ्यावबोधेन सता श्रुतज्ञानभक्ति–सद्गुरुवर्यसेवा–धर्मस्नेहिकल्याणमित्रातिगपूज्यवर्याबाल्यसहोषितानां गणिवर्याणामान्तरप्रेरणासफलीभवनाऽऽदिविपुललाभानपेक्ष्य शक्ति–मतिसामर्थ्याननुरुपमति–महाभगीरथप्रयत्नसाध्यमपि एतत् सम्पादनपुण्यकार्यं देवगुरुकृपाकटीक्षकणिकाया अप्यचिन्त्य सामर्थ्यस्यानुभूतत्वात्तदीयोपष्टम्भविश्वासबलेनैतत्पङ्क्तिलेखकेन ।

पञ्चदशाधिकद्विसहस्रमितवैक्रमाब्दीये वर्षे इयं घटना । ततश्चान्यायकार्यव्यापृतिमत्वेऽपि यथावसरं यथानुगुण्यं सम्पादनाय प्रवृत्तिव्यायोगकरणेन मुद्रणयोग्यस्वरूपेणैतं सज्जं विधाय विंशत्यधिकद्विसहस्रतमे वर्षे एतन्मुद्रणं संस्थया प्रारब्धम् । मुद्रणालयविषमतादिहेतुना वर्षाष्टकमितदीर्घसमयेनाऽपि एतत्प्रकाशनस्य सम्पूर्णरूपेणाशक्यप्रतीतेः पञ्चदशप्रस्तावनासङ्ग्रहात्मकप्रथमविभागस्य प्रकाशनं न्याय्यमवसरोचितञ्च संप्रधार्य सङ्कलनाकारकगणिवरानामर्थसहायोपदेशदातॄणां गणीन्द्राणाञ्च प्रेरणया संस्थया लघुतमस्वरूपोऽपि प्रथमो हि विभागः प्रकाश्यते ।

यद्यपि **"आकृतिर्गुणान् कथयती"** त्याभाणकानुसारं समस्ता अपि प्रस्तावना यदि एकस्मिन्नेव ग्रन्थे स्युः तर्हि विशालकायत्वं ग्रन्थस्य प्रभावोत्पादकत्वञ्च स्यात् । परं ! मुद्रणालयाऽननुकूल्यादिविषमताहेतोः तादृशैकविशालकायग्रन्थप्रतीक्षायां कतिपयवर्षाणामद्यापि संभवात् **"अल्पारम्भाः क्षेमकराः"** इति न्यायानुसारं महर्घवस्तूनां च परिचयाय "नमूना" (सेंपल इत्यांगलभाषायां) इति शब्दवाच्यवस्त्वंशानां विक्रयमंजूषा(शो केइस)यां स्थापनस्य व्यापारिणां धोरणमनुसृत्य वैतं ग्रंथरत्नं प्रथमविभागरूपेणाऽपि प्रकटय्य पूज्यागमतात्पर्यज्ञशिरोमणीनां देवसूरतपागच्छसामाचारीसंरक्षकाणां सूरीश्वराणां अप्रतिमवैदुष्यवारानिधिगतविविधरत्नराशिपरिचयः गुणानुरागिनां विदुषां सौकर्येण स्यादिति प्रशस्ताध्यवसायेनैतत्प्रकाशनमुचितज्ञधिया विधीयमानं सत्प्रमोदावहमिति ।

एतस्मिंश्च प्रथमे विभागेऽधोनिर्दिष्टग्रन्थस्थप्रस्तावनाः पूज्याऽऽगमोद्धारकदेवैर्लिखिताः समु-

चिताः सन्ति । तथाहि:—

१ श्रीत्रैविद्यगोष्ठी
२ श्रीवीतरागस्तोत्रम्
३ श्रीस्याद्वादभाषा
४ श्रीपाक्षिकसूत्रम्
५ श्रीकल्पसूत्रम्
६ श्रीअध्यात्ममतपरीक्षा
७ श्रीवन्दारुवृत्तिः
८ श्रीछन्दोऽनुशासनम्
९ श्रीजल्पकल्पलता
१० श्रीयोगदृष्टिसमुच्चयः
११ श्रीकर्मग्रन्थः
१२ श्रीपञ्चाशकग्रन्थः
१३ श्रीकर्मप्रकृतिः
१४ श्रीधर्मपरीक्षा
१५ श्रीषट्पुरुषचरित्रं

एतासु च प्रस्तावनासु पूज्यवर्यैरागमाऽव्युच्छित्तिकरणप्रभूष्णुशिलाताम्रपटोत्कीर्णाऽऽगम-मंदिरसंस्थापकैः सूरिशेखरैः विविधविषयसमावेशनपुरस्सरं समस्तग्रन्थवस्तुनिर्देशः संक्षिप्तशैल्याऽपि सम्यगुपस्थापितोऽस्ति, समीक्षणीयश्च सम्यग् तत्त्वधिया ।

एतासां च सम्यगनुशीलनाध्ययनादिभिरागमोद्धारकश्रीणामगाधवैदुष्यदर्शनं हृच्चमत्कृतिकरं भवेदेवे-त्यतः प्रस्तुतसङ्कलनात्मकग्रन्थस्याऽन्वर्थाऽभिधानस्य प्रकाशनं प्रसङ्गोपनीतमौचित्याञ्चितश्चाव-धार्यैतत्सम्पादनशक्तिमतिसाधनाऽप्रगुणतायामपि देवगुरुप्रसत्तिदर्शनतस्तदीयकरुणाकटाक्षबला-पूरितमनोगतिमभिसमीक्ष्य सम्पादितमिदं ग्रन्थरत्नमागमभक्तिप्रह्वतासनाथं समुपदीकृतं च गुणानुरागि-विद्वज्जनसमक्षमानन्दप्रदायि भवत्वित्याशास्यतेऽन्तरङ्गगुणानुरागप्रवृद्धिमता मानसेन ।

परिकाम्यते चैतत्ग्रन्थरत्नपठनादिभ्यासङ्गप्रवृद्धया श्रुतभक्तिं समुपजीव्य परिशुद्धसंवरपथि प्रगुणताऽऽपादनद्वारा सम्यग्ज्ञानफलाधिगतिं विदध्युः सद्भक्तिभरपरिपूतवृद्धिभराञ्चितवृत्तिमन्तो हि भव्यजनाः इति ।

प्रान्ते च साग्रहं विज्ञप्यते विद्वज्जनो यत्–विहितेऽपि सद्ध्यानपुरः प्रयतने छाद्मस्थ्यसुलभं दृष्टिदोषोत्थं मुद्रणदोषोत्थं वाऽशुद्धिसम्भारं "विशोध्य पठन्तु" शीर्षकस्थशुद्धीकृतपाठोत्पूर्तिं विरचय्य मर्षयेयुः सम्पादनगतत्रुटिजातं हंसक्षीरन्यायानुसारिणः सुजनोऽवतंसाःविद्वद्वर्याः पाठकजनोत्तंसाः ।

॥ शुभं भवतु श्रमणसङ्घस्य ॥
॥ शिवमस्तु सर्वजगतः ॥

वीर. सं. २४९८
वि. सं. २४२८
फा. कृ. ११. शनिवारे
कल्याणनगर
शाहपुर–राजनगर
अहमदाबाद

इति निवेदकः
सम्पादनधुरामधौरेयोऽपि वहन् श्रमण-सङ्घसेवकः शासनसुभट-महातपस्वि शासन-संरक्षक–पूज्योपाध्यायगुरुदेवश्रीधर्मसागर–गणिवर–चरणारविन्दमिलिन्दायमानः
**अभयसागरः**

प्रस्तावना—

# पीयूष–सरणिः

निबन्धकः—

डॉ· रुद्रदेवः त्रिपाठी M.A. PH.D.

सांख्य–योग–साहित्याचार्यः

(दिल्ली-संस्कृतमहाविद्यालयप्राध्यापकः)

**प्रस्तावना–सृष्टिः**

अस्ति समीक्षकाणां साम्प्रतिकानामियं सार्वत्रिकी परिपाटी यत्—

"ते यस्य कस्यचिदपि लघीयसो महीयसो वा ग्रन्थस्य प्रकाशनपदवीमारूढस्य प्रथिमानं समुपबृंहयितुं किमपि तत्पूर्वाभासरूपं प्रास्ताविकं पुरस्कुर्वन्ति"–

–इति परम्पराप्राप्तप्रणालिकामेतामनुसृत्य यत्र तत्र सर्वत्र ग्रन्थारम्भविभागे–

प्रस्तूयन्ते विपश्चिदपश्चिमैः प्रस्तावनाः

सम्मुखीक्रियन्ते पण्डितपुरन्दरैरामुखानि,

उदाह्रियन्ते विद्याविचारैकप्रवणचेतोभिः सचेतोभिरुपोद्घाताः,

सम्भूष्यन्ते भूरिभाषाभावविभावविशदैर्विद्वद्भिर्भूमिकाः,

विज्ञाप्यन्ते विविधविचारवीचीनिचयनिचिता विज्ञप्तयः,

विनिवेद्यन्ते प्राचामर्वाचाञ्च चिन्तनसञ्चितसाहित्यसंवलितानि निवेदनानि.,

उपक्रम्यन्ते तर्ककर्कशाणामप्रश्नानां समाधानसौकर्येण साधिता उपक्रमाः,

उपदीक्रियन्ते 'द्वित्राः शब्दा' इति शीर्षकपुरस्सराण्यपि

पुरावृत्तपूरपरिपूरितानि पुरोवचनानि ।

किञ्चाऽऽवेद्यन्ते ग्रन्थ-ग्रन्थकृद्–प्रथनकौशल–विषय–काल–स्थल–महत्त्वादिपेशला विमर्शवेदिकाः प्रस्तावनाऽपरपर्याया इति ।

**प्रस्तावना–विमृष्टिः**

सेयं बहुलविभिधानाऽन्तरन्तरितज्ञाना ग्रन्थगतस्वारस्यविहितपिधानाऽऽसाध्येतृभ्यः पुरस्कृत–

गुडधाना स्फुरदुरुविषयविमर्शनिधाना सर्वारम्भपूर्वकृतप्रस्थाना ग्रन्थगौरववर्धनायैव धृतावधाना 'प्रस्तावना' किंस्वरूपेति विचारः प्रज्ञाप्रसादसमधिगतः।

तदेवंविधायां विमर्शप्रवृत्तौ "निरुक्त्या शब्दार्थज्ञानं सुकर"मिति प्रस्तुतस्य प्रस्तावना-शब्दस्य 'प्र + स्तु + णिच् + युच् + टाप्' इति व्याकृतिप्रकृतिः।

तथा 'प्रस्तूयत इति प्रस्तावना', स्तवनं स्तवः, स्तव एव स्तावः (प्र + स्तु + भावकरणादौ घञ्), प्रकृष्टः=प्रस्तावः, प्रस्ताव एव प्रस्तावना' चेति निरुक्तिः। परिभाषा चास्याः—

"तत् आरम्भिकं कथनं वक्तव्यं वा, यस्मिन् कस्यापि विषयस्य विस्तृतिपूर्वकवर्णनात् प्राक् तत्सम्बन्धिन्यः काश्चन मुख्या वार्ताः प्रकटयितुं प्रयत्यते'ति।"[1]

पर्यायप्रयुक्ताः शब्दाश्च—आमुखम्, उपोद्घातः, भूमिका, विज्ञप्तिः, विनिवेदनम्, उपक्रमः द्वित्राः शब्दाः, पुरोवाक्, विमर्शवेदिका—प्रभृतयः।[2]

मूलञ्चास्याः—वैदिकमन्त्राणामादौ तत्तन्मन्त्रस्य ऋषि-च्छन्दो-देवतादिस्मारको 'विनियोग' शब्दः[3]। लौकिकसाहित्ये च दृश्यकाव्यरूपेषु रूपकेष्वावश्यकरूपेण निरूपणीया 'प्रस्तावनेति'[4]।

यतो हि नाट्यशास्त्रे प्रस्तावनाशब्दस्य प्राथमिकः प्रयोग उपलभ्यते। तत्र हि सूत्रधारः प्रस्तोष्यमाणस्य नाटकस्य कारणं कर्तारं नाटक-कथानकं च संलापमाध्यमेन सूचयति,

किञ्च स्वकार्योत्थ-वीथ्यङ्गवाक्यानि चित्रवाक्यान्यन्यानि वा तत्साधकानि भवन्ति।

एवमामुखापरपर्याया चेयं प्रस्तावना 'उद्घात्यकाऽवलगित–कथोद्घात–प्रयोगातिशय–प्रवर्तकादि–पञ्चभिरङ्गैरञ्चिता तत्र भवति। प्रत्येकमङ्के च क्वचिदनवगतार्थानां पदानां प्रश्नैः समाधानं, क्वापि पात्रसंसूचनार्थमालापः, कुत्रचिद् वाक्यस्य वाक्यार्थस्य वा माध्यमेन पात्रप्रवेशः, कुत्रापि प्रयोगे

---

१–हिन्दी 'मानक' शब्दकोशे 'प्रस्तावना' शब्दः।

२–एवंविधाः समानार्थकाः समानभावाः समानमानाः शब्दा भूयांसो भवन्ति प्रयुक्ताः। तत्र लिङ्गपरिवर्तन–प्रत्ययपरिवर्तन–भावपरिवर्तनानि विशिष्यन्ते।

३–यथा–'पृथिवीति मन्त्रस्य मेरुपृष्ठ ऋषिः, सुतलं छन्दः, कूर्मो देवता, आसने विनियोगः।' इत्यादि।

४–भरतमुनेर्नाट्यशास्त्रे प्रस्तावनालक्षणं यथा—

"नटी विदूषको वाऽपि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥
चित्रैर्वाक्यैः स्वकार्योत्थैर्वीथ्यङ्गैरन्यथापि वा। आमुखं तद्धि विज्ञेयं नाम्ना प्रस्तावनाऽपि सा॥"
(अध्यायः २१, पद्ये १८–१९ तमे।

प्रयोगसमावेशः, कुत्रचन च कालकृत्यसमाश्रय इत्यादयो विषय आद्रियन्ते।[५]

एत एव विषयः संहृत्य कालान्तरे ग्रन्थप्रस्तावनादौ सामान्य–विशेषरूपेण वा प्रणयनपदवीमाढौकिताः। साम्प्रतं वैदेश्यविद्वत्प्रभावपारवश्याच्च मन्ये सैव नाटकीया प्रस्तावना बहुरूपिणी सती चित्रयति चेतांसि सचेतसाम्।

## साहित्यिकी प्रस्तावना

'**लक्ष्यानुसारीणि लक्षणानि निर्मीयन्त**' इति लौकिकीं प्रथितिमनुसृत्य साहित्यिकप्रस्तावना–लक्षणाय वयं विचक्षणविनिर्मितप्रस्तावना लक्ष्यीकुर्मः। ता एताः प्रस्तावनाः प्रायेण ग्रन्थस्याकारं महत्त्वं व्यापकत्वं विषयं तद्गतगूढताश्चावधार्य विलिख्यन्ते सुधीभिः। अत एव भवन्ति ताः क्वापि लघीयस्यः क्वचिच्च महीयस्यः। लेखका अपि तत्र हेतवः। यावती तस्य प्रज्ञा यादृशी तस्य चिन्तनशक्तिर्यादृशश्च तस्य स्वाध्यायः। मुद्रणस्थानसङ्कोचं विना प्रसृता प्रस्तावयितुर्भारती सत्यमेव नानात्वं भजते प्रस्तावना।

तत्र हि प्राधान्येन प्रस्तावयितारस्त्रिधा मिलन्ति १ लेखकाः २ सम्पादकाः ३ समालोचकाश्च।

तेषु चापि प्रत्येकं प्रस्तावनाकारो मनोव्यापारदृष्ट्या वस्तुज्ञान–(Cognition) वस्तुचिन्तन (Thinking)–वस्तुलाभ (Aequisition) रूपाणां विचाराणां प्रकाशनाय यतमानः [१]संशोधनात्मिकां [२]सङ्कलनात्मिकां [३]रसग्रहणात्मिकां वा प्रस्तावनां प्रस्तौति। तत्रापि प्रत्येकं प्रस्तावना [१]तार्किकदृष्टिशालिनी सती शास्त्रीया [२]सौन्दर्यदृष्टिशालिनी च सती कलात्मिकेति निगद्यते।

इमा अपि पुनः प्रत्येकम्–आत्मनिष्ठा वस्तुनिष्ठाश्च गदितुं शक्यन्ते। एवं द्वादश प्रकाराः सामान्येनाऽऽकलयितुं शक्या अपि क्रिया–कारक–कारण–करणादिभिर्वैविध्यं भजमाना नानात्वं संश्रयन्ते, तत्र विवेचका एव प्रमाणम्।

---

५–**प्रस्तावनाङ्गानि यथा**—'अस्या अङ्गानि उद्घात्यावलगितके द्वे वीथ्याः कथोद्घात–प्रयोगातिशय–प्रवर्तकाः। अस्यैवाङ्गानि त्रीणि। एवं पञ्चाङ्गानि।

**उद्घात्यकम्**— पदान्यनवगतार्थानि प्रश्नेनावगतार्थैः पदैः प्रतिपादयतीति यत्तदुच्यते।

**अवलगितम्**—पात्रसंसूचनार्थं यदालपनं तद्द्रष्टव्यम्।

**कथोद्घातः**—यत्र सूत्रधारस्य वाक्यं वाक्यार्थं वा गृहीत्वा पात्रं प्रविशति।

**प्रयोगातिशयः**—प्रयोगे तु प्रयोगं तु सूत्रधारः प्रयोजयेत्। ततश्च प्रविशेत् पात्रं प्रयोगातिशयो हि सः॥

**प्रवर्तकः**—कालकृत्यं यदाश्रित्य सूत्रधारः प्रवर्तते।

तदाश्रयस्य पात्रस्य प्रवेशस्तु प्रवर्तकः॥ नाटकलक्षणरत्नकोश पृ० ११९–१२३

किञ्च प्रस्तावनालक्षस्य मूल–पद्ययोर्वीथ्यङ्गसूचनानुसारं मालिकाया अप्यत्र समावेशो भवति, यस्यां प्रहेलिकारूपेण प्रश्नोत्तराणि सम्पाद्यन्ते। वर्तमानप्रस्तावनास्वपि प्रहेलिकाः प्रश्नोत्तराणि च क्रियन्त इति।

भवन्ति चात्र प्रस्तावनालेखकस्य कार्याणि—१—विषयावतारः, २—विषयप्रवेशः, ३—विषयकथनं, ४—विषयविवरणञ्चेति । विषयसम्बन्धावान्तराज्ञप्ति—स्वरूपप्रकाश—गुणदोषविवेचन—व्यक्तिदर्शन—महत्त्वमापन—विभूति-पूजाप्रभृतीनि कर्माणि च तत्राऽन्तरङ्ग—बहिरङ्गपरीक्षाक्षमतामुत्पादयन्ति । किञ्च न्यायाधीश इव ताटस्थ्येन सत्यासत्ये विवेचयन्, बलाबले तुलयन्, नीरक्षीरमिवोचितानुचिते विमलयन्, विवादस्थलानि चिकित्सक इव विमर्शयन् प्रस्तावकः प्रस्तावनां सम्पादयति । ग्रन्थकर्तुः व्यक्तित्वं यथा स्फुरेत् तथा वर्तनमेव भवति बीजं प्रस्तावनायाः ।

अद्य यावन्न निर्मितं केनापि प्रस्तावनाशास्त्रम् । न वा कान्यपि लक्षणानि सन्तिसुतरां निर्धारितानीति लेखकाधीनतैव तत्र तत्र प्रतीतिपथमायाति ।

ग्रन्थलेखकः स्वदृष्ट्याः स्पष्टतां प्रदर्शयति, तत्र च विशिष्य रचनाया मनोभूमिमवतारयन् किं किं कथङ्कारं साधितं ? किञ्चाभिप्रेतं ? के चासन् प्रेरकाः ? के वाऽऽदर्शास्तस्मिन् स्वीकृता ? इत्यादि विस्पष्टयति ।

सम्पादकस्तु यदि नाम प्राचीनः कोऽपि ग्रन्थो भवति तदा तदादर्शप्रतीनां विवरणं, समीक्षापुरस्सरं पाठस्वीकारः, पाठपूर्तेरन्यान्युपादानानि, अन्ये ग्रन्थाः, इतरग्रन्थगतान्युद्धरणानि, समानाः पाठाः, पूर्वसम्पादितपाठानां योगः, प्रतिकूल-पाठांशानां' त्यागः, लिपिदोषस्य कारणात् परिहेयाः पाठाः, व्याकरणस्यापप्रयोगाः, आर्षप्रयोगाः:, शब्दान्तराणि रूपान्तराणि च यथायथं प्रस्तौति ।

समालोचकश्च पाठानुसन्धान—भाषान्तरणसमीक्षापूर्वकं गुणदोष—विवेचनं विधाय कर्त्तव्यनिर्देशं सूचयति ।

एवं सकलस्याप्यस्य कर्तव्यजातस्य स्वारस्यं पाठकानामुपरि निर्धारितं तिष्ठति । पाठकाश्च त्रिविधा भवन्ति ।

यथोक्तं निशीथचूर्णौ—

पुरिसो तिविहो परिणामगो अपरिणामगो अतिपरिणामगो तो एत्थ ।

अपरिणामग—अतिपरिणामगाणं पडिसेहो ।

एतदनुसारं १-परिणामकः २-अपरिणामकः ३-अतिपरिणामकश्च सन् पुरुषः पाठकत्रैविध्यं भजति । अपरिणामकोऽपरिपक्वबुद्धेः कारणात्, अतिपरिणामकश्च कुतर्कपूर्णाया बुद्धेः सत्त्वात् न भवतोऽधिकारिणौ । परिणामकः = परिपक्वबुद्धिशाली पाठको विषयावगाहनपूर्वकं प्रस्तावनामाध्यमेन ग्रन्थान्तर्निहिततत्त्वं परिचिनोति । एतादृश्या प्रस्तावनया पाठकस्य मन आकृष्टं भवति भूयोभूयः पठनाय मननायात्मसात्करणाय च तदन्तरीहत इति स्पष्टमेव प्रस्तावनाया ऐदंयुगीनं माहात्म्यम् ।

अथेदानीं प्रकृतमनुसरामः ।

**प्रस्तुत-ग्रन्थकारा :**

देवसूरतपागच्छसंरक्षकैःशैलानानरेशप्रतिबोधकैरागममन्दिरादिसंस्थापकैः श्रुतवाहकागमदिवाकर-ध्यानस्थस्वर्गतागमोद्धारकाचार्यवर्य- **श्रीमदानन्दसागरसूरीश्वरैः**स्वीयप्रतिभाबलेनानेकग्रन्थानां निर्मित्या, नैकग्रन्थरत्नानां सम्पादनसम्पत्त्या विविधग्रन्थेषु प्रस्तावनो-पक्रमो-पोद्घातादि विरचनेन चाऽति-महती श्रुतोपासना विहितेति परमगौरवास्पदं साहितीसुधास्वादनसंसक्तचेतसां सचेतसां कृते ।

आगमोद्धारकाणामितरत् साहित्यजातं बहुधा तद्विनेयैस्तत्कृपापारावारतरङ्गितैश्च प्रकाशितं प्रकाश्यते च । सूरीश्वरैरेतैः त्रिसप्तत्युत्तरैकशतसंख्यकानां ग्रन्थानां सम्पादनमकारि । प्रकाशनसंस्थाश्च-श्रीजैनधर्मप्रसारकसभा (भावनगरे), श्रेष्ठिदेवचन्द्रलालभाईपुस्तकोद्धारकफण्डसंस्था (सुरते), श्री आगमो-दयसमितिः श्रेष्ठि श्री ऋषभदेवजीकेशरीमलजीत्याख्या पेढी च (रतलामनगरे) श्रीसिद्धचक्रसाहित्य-प्रचारकसमितिः (मोहमय्यां), श्रीजैनानन्दपुस्तकालयः (सुरतनगरे), श्रीजैनपुस्तकप्रचारकसंस्था (सुरते), देवकरणमूलजीप्रकाशनं-(नवसारीनगरे), नवपदाराधकसमाजः (मोहमय्यां), यशोविजयजैनपाठशाला (महेसाणा) प्रभृतय आसन् । समग्रेऽपि भारतभूमण्डले पादचारं विहृतवतां सूरीश्वराणां सम्पादनेषु प्रस्तावनानां संयोजना महत्त्वपूर्णाः सन्ति । तत्र तत्र प्रस्तावनासु तेषामपूर्वश्रुतपारगामित्वं विवेचन-गाम्भीर्यं समालोचनौदार्यं पाठसन्धानपाण्डित्यं भावाविष्करणवैचित्र्यं गीर्वाणवाणीवैदुष्यं च पुरः पुरः परिस्फुरल्लक्ष्यते ।

मा स्म भूवन् वञ्चिताः साम्प्रतिकाः सुरसरस्वतीसमाराधनतत्परा अपि तेषाममोघप्रतिभा-प्रसूतसाहित्येनेति धिया तेषामेव विनेयपरम्परापथिकैः व्याकरण-न्याय-ज्योतिषा-ध्यात्म-प्राच्यार्वाच्य-विज्ञानविधानदीष्णैः **श्रीमदुपाध्यायधर्मसागरमहाराजानां** चरणोपासकैः **श्रीमदभयसागरगणिभिः** प्राथम्येन **'आनन्दरत्नाकर'** नामकः प्रस्तावनासङ्ग्रहोऽयं ग्रथितः ।

प्रथम विभागाऽऽत्मके एतस्मिंश्च प्रकाशने सन्ति पञ्चदशसङ्ख्याकाः प्रस्तावनाः सङ्गृहीताः ।

एतासु १-आगम-२-भक्ति ३-श्रावकधर्म ४-प्रकरणसिद्धान्त-५-योगशास्त्र-६-अध्यात्मचर्चा-७-न्याय-८-कर्मसाहित्य-९-साहित्य-१०-पौराणिकसमीक्षाविषयक ग्रन्थानां प्रकाशननिमित्तमाकलय्य सूरिपुरन्दरैरेतैः प्रस्तावना लिखिताः सन्ति । तत्रापि प्रस्तावना-उपक्रम-उपोद्घात इति त्रीणि नामानि स्वीकृतानि ।

**प्रस्तावना-पद्धतिः**

प्रस्तावना-लेखने श्रीजुषामेषां पद्धतिः प्रायेणैवंरूपा—

**१-आगमप्रस्तावनायां**—ग्रन्थवाचनप्राचीनत्वं, चूर्णि-टिप्पणादिपरिचयः, विवादस्थानानि, तत्स-माधानानि, विशेषावधेयञ्चेति ।

**३–भक्तिसाहित्योपक्रमे**–आगमावश्यकता, महिमा, वाचना, धर्मजिघृक्षुता, मुनिप्रभावः, कोश-निर्माणं, तात्कालिकी स्थितिः, प्रकाशनव्यवस्था, ग्रन्थकारपरिचयः समयादिनिर्णयः, ग्रन्थपरिचयः आदर्शप्रतिसूचनश्चेति ।

**४–प्रकरणसिद्धान्तप्रस्तावनायां**-आगमाकर-प्रकरणकर्तृपरिचयः ग्रन्थकारपरिचयः, विवरण-कारसूचनं, ग्रन्थपरिचयः, प्रकाशनव्यवस्थासूचना चेति ।

**५–योगशास्त्रीयोपोद्घाते**–ग्रन्थरचनाविषयकप्रश्न-कालनिर्धारण–परकथनखण्डन–प्रमाण-स्वनिर्णय-ग्रन्थपरिचयादयः ।

**६–अध्यात्ममतपरीक्षोपक्रमे**–श्वेताम्बर-दिगम्बर-द्वैधीभावं परिचाय्य विविधानन्यान् वादान् विविच्य, ग्रन्थनिर्माणकारणमुद्धृत्य, ग्रन्थकारकालः, ग्रन्थपरिचयः, विशेषसूचनाः प्रतिसूचनाश्च प्रतिपादिताः ।

**७–स्याद्वादभाषाप्रस्तावनायां**-ग्रन्थमुद्रणप्रयास-मुद्रापणकारण-ग्रन्थपरिचय-ग्रन्थकारकालानु-मान-ग्रन्थनामयाथार्थ्य-ग्रन्थकारकृतान्यकृतिपरिचयादयः ।

**८–कर्मग्रन्थ-कर्मप्रकृत्योरुपोद्घातयोः**–इतरधर्मानुयायिनामदृष्टस्वीकारः, कर्मनिबन्धनं, मोक्ष-चर्चा, ग्रन्थप्रणयनौचित्यं, ग्रन्थावश्यकता, प्रकरणानुसारी ग्रन्थपरिचयः आत्म-विचारः, परेषां मत-खण्डनं, ग्रन्थकृत्परिचयस्तत्कृतयश्चेति ।

**९–साहित्यग्रन्थचतुष्टय्याः प्रस्तावनासु**–ग्रन्थ-ग्रन्थकार-महिमा, गुरुपम्परा, ग्रन्थपरिचयः, शब्द-लिङ्ग-काव्य-छन्दोनुशासनानामावश्यकता आक्षेपनिरासः, प्रतिसूचना, उपक्रमपूर्तिः, छन्दोनाम्नां मत-मतान्तरविवेकश्चेति ।

**१०–पौराणिकसमीक्षारूपप्रस्तावनायां** च धर्मविचारः ग्रन्थकार-परिचयः, ग्रन्थपरिचया-दयश्च निपुणं प्रतीतिपदवीमानीताः ।

यत्र तत्र वृत्तिकार-विवरणकार-ग्रन्थसम्बन्ध्यन्यसूचनानि पुरस्कृत्य सूरीश्वरैरेतैः **प्रस्तावना**-शब्दस्य सत्यमेव सार्थकता सम्पादिता ।

**प्रस्तावनानां भाषाः**

शाब्दे ब्रह्मणि साधिकारवचसां लघीयस्यामपि रचनायां पदघटाटोपः, काव्यबन्धुरो बन्धः, सुघटितव्युत्पत्तिशक्तिप्रभा च सावष्टम्भं मुखरीभवन्ति ।

श्रूयते किल श्रीमदानन्दसागरसूरिपुरन्दराणां जिह्वाऽजिरे क्रियाकलापविपुलः सर्वोऽपि धातु-गणो विराजते स्म, सर्वास्तद्धितवृत्तयः कण्ठस्थिताः क्रीडन्ति स्म स्वान्तान्तरालाम्बरे च प्रत्ययघटा-घटिताः कृत्संज्ञा विलसन्ति स्मेति ।

अत एव प्रत्येकं प्रस्तावनायामत्र वयं सुपर्वसरस्वत्याः कमपि विरलं प्रवाहं विलोकयामः। भाषाप्रवाहेऽत्र सानुप्रासाः शब्दाः, यङ्लुगन्तसिद्धाः क्रियाः, समास-सन्दब्धानि वाक्यखण्डानि क्वचित् विश्लिष्ट-प्रयोगाः, सम्प्रदायसिद्धान्तभूयिष्ठा पदावली, शास्त्रकोटिमधिश्रितो वर्णविन्यासोऽनतिप्रसिद्धशब्दाविरलप्रयोगाश्च परिलक्ष्यन्ते।

## प्रस्तावनागद्यानि

कवीनां निकषभूते गद्ये विद्याऽनवद्या द्योतते, हृद्या पद्या माद्यति, यद्यप्यद्यावधं गद्यते दीर्घदीर्घतरसमासशालि गद्यं तथापि दण्डि-सुबन्धु-बाण-सोड्ढल-धनपालादीनां गद्यमिव कापि चित्रा शैली श्रीमदागमोद्धारकालेखितासु प्रस्तावनासु निर्वर्ण्यते।

एकतश्चूर्णकाभिधं[1] गद्यं चमत्करोति चित्तं, परतश्चोत्कलिकाप्रायं[2] दीर्घसमासाश्रयं गद्यं च सन्तानयति चेतःप्रह्लादनम्। मुक्तक-वृत्तगन्धिगद्ययोरपि निपुणोपन्यासः 'कलिकेव[3]' कलयति कौतुककमनीयताम्। संयुक्तवर्णेषु 'मधुर-श्लिष्ट-विश्लिष्ट-शिथिल-ह्रादिनां[4]' नृत्यत्पदप्रायताऽन्यानु-

---

१-२—**साहित्यदर्पणस्य** षष्ठे परिच्छेदे गद्यलक्षणं यथा—

वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च। भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम् ॥३३०॥

आद्यं समासरहितं वृत्तभागयुतं परम्। अन्यद् दीर्घसमासाढ्यं तुर्यं चाल्पसमासकम् ॥३३१॥

चूर्णकादिगद्योदाहरणानि यथा '**वीतरागस्तोत्र**'प्रस्तावनायाम्—

"—तत्रापि निस्सत्त्वाद् देशस्य अतिह्रसीयस्त्वाद्धर्मबुद्धेः, परायणत्वान्मानगिर्यारोहे अनवबुद्धत्वात्स्वातत्वमार्गस्य, पलायितप्रायत्वाज्ज्ञानस्य, व्यापृतत्वादनार्यभाषारुचेः, तुन्दपरिमृजबहुलत्वाल्लोकस्य संस्कारहीनत्वान्मतेः, इत्यादि मुक्तकाभिधं गद्यम्)।

दीर्घसमासाश्रयमुत्कलिकाप्रायञ्च गद्यं यथा **कर्मग्रन्थोपोद्घाते**—

'आकलनीयमिदकं कलावत्कलापाकलनीयाऽकल्पाऽकलङ्किताऽविकलकलनकलापरिकलिताऽऽकल्पाविकलितकीर्तिकन्दकमनाऽनेकान्तप्रकटनकोविदकल्पान्तकालविशकलिताकारकविकृतानेकाकान्तैकाकान्तर्क्षकान्तिकर्तनविकर्तनश्रीमदकलङ्ककलाकल्पिताकलनीयार्थकदम्बकल्पकल्पाकर्णनकान्ततमसंस्कारकलितैः, इत्यादि।

**चूर्णकाभिधं** गद्यं च तत्रैव—

"भूतिभूषितविग्रहपरिचर्यापराणान्, मतान्तराविष्टान्तरात्मना, यवनारतु विवेकमतिवारिधरपवनाः, भूत्यम्बरं भूभृदोद्भूतिनिबन्धनतया'—इति वाक्यखण्डानि।

एवमेव वृत्तगन्धीनि, कलिकारूपाणि, संयुक्तवर्णभूयिष्ठानि च गद्यखण्डानि तत्र तत्रोह्यानि।

३— कलिकालक्षणं यथाह स्तवमालाभाष्ये जीवदेवः—

कला नाम भवेत्तालनियता पदसन्ततिः। कलाभिः कलिका प्रोक्ता तद्भेदाः षट् समीरिताः ॥

कलिका चण्डवृत्ताख्या दिगादिगणवृत्तका। तथा त्रिभङ्गीवृत्ताख्या मध्या मिश्रा च केवला" इति।

४— तत्र संयुक्तवर्णानां नियमो दशधा च ते।

मधुर-श्लिष्ट-विश्लिष्ट-शिथिल-ह्रादिनस्त्वमी। भिद्यन्ते ह्रस्वदीर्घाभ्यां ते दर्श्यन्ते स्फुटं यथा ॥

—इत्यादि श्री गोविन्दविरुदावली भाष्ये

प्रासनिबद्धो मधुराक्षरसन्निवेशः सङ्गीतलयलहरी वर्णमैत्रीरूपा झङ्कृतिश्चेति पदे पदे प्रस्फुरन्ति । मध्ये मध्ये देदीप्यमानोऽलङ्कारयोगश्च सौवर्णाभरणे मणिगणानामिव किमप्यपूर्वं वैचित्र्यं पुष्णाति ।

**अनुसन्धानवैशिष्ट्यम्**

**'अब्धिर्लङ्घित एव वानरभटैः, किन्तु तद्गाम्भीर्यं तु मन्थाचल एव जानाति'** सेयं किंवदन्ती प्रक्रान्ते प्रस्तावनासङ्ग्रहरूपे **श्रीआनन्दरत्नाकरे**ऽपि सार्थिका भवति ।

यतो हि भिन्न-भिन्नविषयग्रन्थेषु निहितस्य गाम्भीर्यस्याऽऽमूलचूलं मन्थनं विधायैव श्रीमदागमोद्धारकैः प्रस्तावना आकलिताः ।

तत्र तास्वनुसन्धानकलाया वास्तविकानि तत्त्वानि **सत्यस्यान्वेषणं, नवीना उद्भूतयः, नूतनानि तथ्यानि, नवनवा विचाराः, पक्षपातविरहितानि मूल्याङ्कनानि चेति** पूर्णरूपेण प्रतिफलितानि विलोक्यन्ते ।

ग्रन्थकर्तारं प्रति तटस्थदृष्ट्या न्यायदानं सत्प्रस्तावनाया लक्षणम् । तत्तथाभूतमत्रोपस्थापितमिव प्रतिभाति । श्रीमतामनुसन्धानप्रक्रिया चेयं 'क्रियात्मिका' परिलक्ष्यते । यस्यां स्वोद्देश्यं प्रभावशालिन्या पद्धत्या ज्ञानपुरस्सरं समस्यानां संस्थापना, तासां निदानं, समुचितं समाधानं, अन्वीक्षणात्मिकाः प्रवृत्तयः, परीक्षणात्मिका दृष्टयः, तुलनात्मक-विकासात्मक-इतिवृत्तात्मक-विमर्शाणां सङ्कलनं भ्रमनिरासादयश्च विशिष्य भवन्ति । श्रमचरणैस्सर्वास्वपि प्रस्तावनासु प्रायः संस्तुतिरूपेण ग्रन्थकर्तां ग्रन्थानां च महत्त्वमुपस्थापितं, तथा च भाषा-संयमश्च समादृतः । यत्र यत्राऽऽवश्यकताऽभूत् तत्रैवापेक्षितं विवेचनं विहितं, यत्र च सूचनमात्रेण पाठकानां जिज्ञासा पूर्तिमियात् तत्र 'ग्रन्थे द्रष्टव्य'मिति संसूच्यैव संक्षेपितम् । बहुत्र ग्रन्थस्य प्रतिप्रकरणं परिचायितं तत्तद्विषयसंक्षिप्तिका च परिदर्शिता । तुलनादृष्ट्या छन्दोनुशासनदर्शितनाम्नामन्याचार्यसूचितनाम्नां च तालिका प्रकाशिता ।

**विशिष्टो दायः**

'अनन्ता हि वाग्विकल्पाः' इति दृष्ट्या सर्वेऽपि वाग्व्यवहारा आनन्त्यं धारयन्ति विपश्चितश्च तांस्तान् व्यवहारान् कौशलेन प्रकटयन्तो विविधान् मार्गानाश्रयन्ते । भवन्ति च ते निबन्ध-प्रबन्ध-मुक्तक-महाकाव्य-कथानिकाऽऽख्यानादिरूपाः, परं श्रीमदागमोद्धारकसूरिपुङ्गवैरेकोऽनुपम एव मार्गः स्वीकृतः ।

यस्मिन् नानाग्रन्थरत्नानां वैकटिकरूपेण शोणपरीक्षणमातन्वद्भिरनेकाः प्रस्तावनाः प्रस्ताविताः । आसँस्ते महान्तो भाग्यशालिनो येषां लेखिनीसंस्पर्शेन चिरं सुषुप्तिं संश्रिता भूयांसो ग्रन्थाश्चेतनाप्रकाशं लब्धवन्तस्तत् प्रकाशपुञ्जश्च 'आनन्दरत्नाकर' रूपेण संगृह्यात्र प्रकाशितः ।

सूरिवर्यैः प्रस्तावनानां माध्यमेनालोचनाया निकषेषु क्रमशः १–सिद्धान्त २–नियम ३–आदर्शाणां प्रामुख्यं बुद्धिसात् कृत्वा कृतीनां गुणदोष-विमर्शपूर्वकं विश्लेषणं च विधाय पाठकेभ्यो यो दायः पुरस्कृतः स हि "पाठकानां चेतनाजागरणं, तेषां ज्ञानसम्पदाऽभिवर्धनं, साहित्य-कामिरुचेरुद्बोधनं, धार्मिक-सांस्कृतिकसुरुचीनां विकासः साहित्यस्य तत्कलायाश्च प्रोत्साहनम्, साहित्यसृष्टये प्रेरणाप्रदानं, कुत्सितायाः प्रवृत्तेरवरोध' इत्यादिरूपेण विश्राणितः महार्घनिधिरूपेण विद्योतन्ते ।

### प्रस्तुतं सङ्कलनम्

प्रस्तुतस्य सङ्कलनस्यैकं विशिष्टं स्थानं संस्कृतसाहित्ये विद्यते । मन्येऽद्य यावदेकमपि पुस्तक-मीदृशं न प्रकाशितचरम् । साहित्यकोटौ या विविधा धारा वर्तन्ते, तासु धारासु विरलं स्थानं प्रस्तावनाधाराया अस्ति ।

किञ्च प्रस्तावनानामेवैको ग्रन्थः सङ्कलितः स्यात्, स चापि द्वि-त्रि खण्डेषु प्रकाशितो भवेदिति तु सर्वथा विस्मयावह एव । विविधेषु प्रकाशितचरेषु ग्रन्थेषु प्रस्तावनारूपेण विकीर्णानामासां साहित्यसृष्टीनामेकत्र सङ्कलनं भविष्यतां विपश्चितां कृते महदुपयोगि स्यादिति कल्याणकामनया श्रीमद्धर्मसागरोपाध्यायचरणोपासक-श्रीमदभयसागरगणिभिरिदं प्रयतितम् । प्रथमखण्ड-रूपेण चात्र पञ्चदश प्रस्तावना आकलिताः ।

### 'आनन्दलहरी'–टिप्पणी

इदमपरमस्य ग्रन्थस्य वैशिष्ट्यं यदत्र प्रस्तावनासु वर्णितानां विषयाणां सम्यगवबोधनाय ग्रन्थसम्पादकैरेव 'आनन्दलहरी' नाम्ना टिप्पण्य आलिखिताः ।

प्रायेण प्रस्तावनाकारः सारल्येन ग्रन्थगतस्वारस्यं पाठकानां पुरस्तात् पुरस्कर्तुमेव प्रयतते,

न तमां तत्र काठिन्याशङ्का भवति; परं शास्त्रपारावारपारीणा भावा अपि यस्यां भाषाया मवतरन्ति तेषु सामान्यवाचकानां मनीषा कादाचित्कतया विशिष्टेषु स्थलेषु रूढासु पदावलीषु कुण्ठतां व्रजत्येव, सन्ति चात्रापि बहूनि स्थलानि व्यायासापेक्षानि, इति सकलं सञ्चिन्त्यैव प्रस्तावयितृणां हार्दमविकलं सरलया सरसया सरण्या हृद्गता कारयितुं टिप्पणी-विरचनमभूत् ।

टिप्पण्यामस्यां परमया श्रद्धया, गभीरया धिया, सूक्ष्मेक्षितकया च सूचनानि कृतानि सन्ति तानि निश्चितमेव विदुषां तोषाय भविष्यन्तीति नः प्रत्ययः ।

### टिप्पणी-गौरवम्

बाल्यात् प्रभृति जिनशासनोदीरितं श्रमणधर्मं स्वीकृत्य व्रतपालन-परीषहसहनेर्यासमितत्वादकृतिपूर्वकं विद्याव्यसनितां दधानैर्व्याकरण-न्याय-ज्योतिष-साहित्याद्यखिलशास्त्रपारङ्गतैः प्राप्ताबाध्य-

भूगोल-खगोलविज्ञाननदीष्णैः श्रीमदभयसागरगणिभिरत्र टिप्पण्यां प्रतिस्थलं सङ्ख्यानिर्देशपुरस्सरं सर्वविषसौविध्याय निम्नलिखिताः प्रक्रियाः स्वीकृताः—

१ सम्बन्धसूचनम्, २ प्रसङ्गनिर्देशः, ३ उद्धरणप्रसङ्ग-विषयादिसूचनम्, ४ पर्यायशब्दाः, ५ पदनिष्पत्तयः, ६ अर्थानुसारिण्यन्वयसङ्गतिः, ७ अन्वयनिरूपणम्, ८ समस्तपदानां विग्रहाः, ९ अर्थविवक्षाविवेकः, १० विशिष्टाभिव्यक्तिः, ११ सर्वनामपदावबोधनम्, १२ सन्धिच्छेदाः, १३ पदसिद्धयः, १४ विशेषणनिर्देशाः, १५ विविधार्थविवेकाः, १६ स्वसम्प्रदायानुसारिणी व्याख्या, १७ सूचितोद्भावनम् १८ ऐतिह्यविमर्शः, १९ उद्धरणपूर्तयः, २० विविधपाठसूचनानि २१ भावार्थाः, २२ ध्वनितार्थाः, २३ मान्यतानिदर्शनमित्यादयः।

एवं सुवर्णे सौरभमिव टिप्पण्य इमा वैदुष्यपूर्वकेण विमर्शेणापूर्वगौरवं धारयन्तीति नाऽत्रशङ्का-पङ्कावकाशः।

## हार्दिकं निवेदनम्

'वाग्जन्म-वैफल्यमसह्यशल्यं गुणाद्भुते वस्तुनि मौनिता चेत्' इतिश्रीमतो महाकवेर्हर्षस्य हर्षावहा सदुक्तिः शाश्वती प्रेरणां वितरन्ती गुणगणश्लाघासु वाचंयमतां भिनत्ति। विश्वस्य विश्वासु भाषासु मातृपदं भजन्त्यां भगवत्यां निर्जरभारत्यां विश्वस्य श्रद्धाय च स्वस्वधर्मभाषाभ्योऽप्यधिकं साहित्यं संस्कृत एव प्रणीतं सकलधर्माचार्यवर्यैः, जैनसम्प्रदायाचार्यैः संस्कृतसाहित्यस्य भूयसीनां धाराणां प्रवर्धनं स्वस्वसाहित्यद्वारा साधितम्।

श्वेताम्बरसम्प्रदाये प्रवर्तमानानामाचार्याणां साहित्यं तत्रापि रङ्गत्तरङ्गैस्तुङ्गतरं राजितं विद्यते प्राकाश्यमासादिवति साहित्ये प्रस्तुतं प्रस्तावनासाहित्यं लहरीलीलायितविलासितं सत् सकलमपि संस्कृतज्ञसमाजं रञ्जयदुत्तरोत्तरमवगाहनायोत्सुकयेत्, सह्याश्चावन्तश्च मात्सर्यमुत्सार्य सारस्वतं पीयूष-मिदं चिरं पेपीयन्तामिति विनिवेद्य विरमामीति शम्।

| | |
|---|---|
| दिल्ली<br>रथयात्रा द्वितीया<br>आषाढ शुक्ला २<br>सं. २०२८ वि. | निवेदकः<br>विपश्चिच्चरणचञ्चरीकः<br>डॉ. रुद्रदेव त्रिपाठी<br>आचार्यः एम. ए. पी. एच. डी. |

★

सहस्रावधानि-सूरिसत्तम-श्रीमुनिसुन्दरसूरि-रचितायाः

श्री त्रैविद्य-गोष्ठ्याः

# प्रस्तावना

अवधारयन्तु [1]विदितानवद्यविद्यावृन्दविदीर्णमोहान्धतमसो[2] विदुषः [3]परमवैदुष्यधुराधरण-धौरेयानवद्यविद्याव्रजावदातात्मनां तत्रभवतां श्रीमतां मुनिसुन्दराह्वयानां [4]त्रैविद्यनैपुण्यं ग्रन्थस्यास्य [5]शैशवविहितस्यावधारणेन; [6]लक्षणादिशास्त्रशिक्षारुचिरत्वमपि न कथञ्चनैतन्निरीक्षणेन [7]क्षुण्णमवलोकयिष्यते तत्रभवद्भिर्भवद्भिः, सदाचारपरीक्षाक्षमत्वमपि क्षमाधाराणामिमेषां पूज्यानामवलोकनेनैतस्यावतरिष्यत्येव वाग्गोचरातीतं दृष्टिपथं, यतोऽत्रावलोकनीयमवलोकनसौन्दर्यमत्रभवतां प्रयोगवैचित्र्यानुप्रासादिकमलङ्कारविद्भिर्द्येयमत्रभवद्भिः।

प्रथमं तावद्भट्टारका वितेनुः स्वीयं जयश्र्यङ्कविन्यासेन मंगलाचरणं जिनवरनतिमयं।

पूज्यानां हि [8]समयोऽयं यद् ग्रन्थारम्भे "जयश्रीरान्तरारीणा"-मित्यध्यात्मपूर्णहृदयोदध्युल्लासशशधरसमश्रीअध्यात्मकल्पद्रुमस्याद्यपद्ये, "जयश्रियं रातु जिनेन्द्रचन्द्रमा" इत्यनल्पमहिमगुरुगणगरिमोद्गिरणपवित्रविविधपद्यमय्यां गुर्वावल्यां च यथा [9]विलोक्यते विज्ञैस्तथान्यसनीयो जयश्रीशब्दः, स एव चात्रापि, न केवलं गीर्वाणवदनावतारिण्यां गीर्वाणभाषायां किंतु [10]स्वभावसुभगानेकार्थततिनिधानकल्पायां प्राकृतवाण्यामपि शान्तरसप्रधानायामयमेवाङ्को न्यासि न्यासनिपुणैरुपदेशरत्नाकरादौ "जयसिरो"-त्याद्यवलोकनाच्छ्रीमद्विहिते।

भवन्ति च पुरुषविशेषनिर्मिता ग्रन्था एवंविधाङ्काङ्किताः, यथा-भगवद्भिः **श्रीहरिभद्रसूरिपादै**र्विनिर्मितेष्वगण्यगुणाकरेषु ग्रन्थेषु विरहाङ्कोऽङ्कि [11]वाराणसीवासजातमदोद्धुरविपश्चित्ततिविजयाऽवाप्तयथार्थन्यायविशारदपद-सदालोकलोचनलोभकानेकदुस्तरतर्करत्नाकरग्रंथशतविधानवितीर्णन्यायाचार्यपदा--ऽऽप्तक्रियाकरणासादितगण्युपाध्यायवाचकादिपदाः **श्रीमद्यशोविजयचर-**

[12]णाश्च ऐङ्काराङ्कं संस्थापयामासुः प्रतिग्रन्थारम्भे, परम् [13]आद्यानां [14]प्रायश्चित्तसंबन्धादन्येषांचोपगङ्गमैङ्कारजापविधानात् कवित्व[15]वित्तप्राप्तिसद्भावाद्यथाङ्ककरणे[16]स्पष्टतरमुपलक्ष्यते[17]लक्षणादिदक्षैः प्रयोजनं परं न [18]एषां पूज्यानां प्रोक्तमन्तरेणान्यत्, भविष्यति च कदाचित् तत् परं न तदस्माभिर्व्यलक्षि यदि परं स्यात्केषांचित् ज्ञातं ज्ञापनीया वयमुपकारधिया।

अनन्तरं चापरगुरुस्मरणस्यावश्यकतामभिमन्यमानैरभियुक्त[19]देवतास्मरणस्थानीयं यथार्थाभिधानभूतां **श्री ज्ञानसागरनामधेयानां** स्मरणमकारि, समुद्दीपि च [20]प्रस्तुतप्रकरणप्रकरणपटिष्ठोपदेशनिदानताज्ञापनेन तेषां त्रैविद्यनदीष्णता, [21] जायेतैव च जिज्ञासा जिज्ञासूनां [22]श्रीमद्विषयिणी, सा च समापनीया सुधीभिः प्रकरणकृद्विहितगुर्वावलीगततत्प्रकरणावलोकनेन, [23]तद्यथाः—

[24]**"श्रीसोमसुन्दरगुरुप्रमुखास्तदीय[25]—त्रैविद्यसागरमगाधमिवावगाह्य।**
**प्राप्योत्तरार्थमणिराशिमनर्घ्यलक्ष्मी-लीलापदं प्रददते पुरुषोत्तमत्वम् ॥१॥"**

**श्रीसोमसुंदराचार्य**प्रवरा ये प्रकरणकृद्गुरवस्तेऽपि [26]श्रीपूज्यपादवितीर्णोपदेशामृतपानपीनाः।

अनेन [27]य आचक्षिरेऽनवलब्धग्रन्थसतत्त्वाः यदुतः—'न [28]भट्टारकाः **श्री सोमसुंदर**-पादान्तेवासिनः, कथमन्यथा भवेयुर्द्वयेऽपि सहाध्यायिनः? कथंकारं च प्रायः समानवयस्कानां गुरुशिष्यभावोऽसंभव्येव च, लघीयद्भ्यः शिष्यार्पणं पूज्येभ्यः कुर्युः **श्री देवसुंदरमिश्राः** इतीति, केचित्।

परमविचारितरामणीयकमेतत्, यतः ख्यापयन्त्येव पूज्यपादाः स्वयमेव श्रीमद्दीक्षितत्वमात्मनां शिष्यतामप्रतिमां च।

[29]**"शिष्यस्तदीयोऽयमपीति मन्यते, श्रीवाचकेन्द्रेष्वगुणोऽपि मादृशः।**
**ग्रहप्रभोः पुत्र इति ग्रहावली, न पूज्यते पंगुरपीह किं शनिः ॥२०॥**
**अहो तेषां कराम्भोज-वासानां सुप्रभावता।**
**जातो यैर्मौलिगैर्योग्योऽप्यहकं मुनिसुन्दरः ॥२१॥"**

इतिगुर्वावलीगौरवाविष्कर्त्र्यां (गुर्वावल्यां)।

तत्र प्राक्तनाः कल्पनाशिल्पनिर्मिता विकल्पकल्लोलाः प्लावयितुं स्युः **"श्री सोमसुंदरसूरिपट्टे** एकपञ्चाशत्तमः श्रीमुनिसुंदर" इत्यादिव्याख्यानकुलिशं[30] प्रभविष्णवः। प्रायः समानवयस्कत्वादिकारणानि चालक्षितसाधुपदगौरवार्हाणामेव चेतसि विदध्युर्वासनां, न तु विज्ञातगुरुपदैदम्पर्येतिहासानां[31]।

यच्च विद्यमानेष्वपि किमिति **सोमसुंदरेषु श्रीमद्देवसुंदरपाद**वर्णनमित्यनूद्यते तदप्यसमञ्जसमेव, यतो द्वयेऽपि [32]वेविद्यमाना एव ते, सत्सु च **देवपादेषु** यत्**सोमगुरुपाद**वर्णनं तदेव

तेषां तच्छिष्यतासूचकमित्यलं विशेषेण, वर्णनीयता तु श्रीमद्देवसुन्दरपादानामसमभक्तिप्राग्भारनिभृतहृदयस्मरणीयत्वद्योतनाय, [३३]बृहद्गच्छाधीशत्वेन [३४]पूज्यपूज्यानां चातिशयितपूजास्पदत्वस्याव्याहतेश्च, अत एव च [३५]"**तद्विनेय**" इत्यभिहितं श्रीमद्भिः।

[३६]सामान्यतस्तदियता प्रबन्धेन श्रीमतां दीक्षागुरवः **श्रीसोमसुंदरचरणाः**, ज्ञानगुरवः श्रीमन्तो **ज्ञानसागराः**, गच्छाधिपा[३७]श्रीदेशाद्यतुच्छफलकल्पनकल्पमहीरुहमाना देववदाराध्यपादाः [३८]श्रीयुतो **देवसुंदरसूरय** इति निर्णयोऽनाबाधोऽव्याहतश्च, **ज्ञानसागरगुरूणां** त्रैविद्यविषयोपदेशाश्रय इति तद्वर्णीयोमहिमाख्यानं।

ततो गोष्ठीविधानभूमिकल्पो [३९]विद्वद्विधानयोग्यायोग्यपरीक्षणसम्यग्विज्ञातवाङ्मयविद्वत्समागमोद्भवानन्दनन्दिश्चक्रे [४०]वक्रेतराशयैः, [४१]पश्चाच्छास्त्राभ्यासानुयोगावसरोदीर्णप्रतिभाविशुद्धबुद्ध्याभोगः १ सद्गुरुसमायोगः२ सद्गुरुविनयप्रयोगः ३ पुस्तकप्राप्तियोगः४प्रमत्ततावियोगः ५ सततोपयोगः ६ [४२]शुद्धयभियोगः ७ देहारोग्यभाग्यादीनि साधनान्यैदंयुगीनान्तेवासिवर्गविमृश्यतमान्याचख्युः ख्यातमाहात्म्याः, आख्याय च विद्वद्गोष्ठीगुणगणान् [४३]ज्ञानद्रुमोन्मूलनमातङ्गत्रिवर्गविध्वंसनव्यग्रदर्पाऽपाकरणप्रकरणेऽनेकाननणुप्रभाववार्तारांनिधीन्[४४] पुरुषसिंहान् यथार्थावाप्ताभिधानश्रीम**द्दिवाकर**-वादिचक्रचूडामणिप्रभु**श्रीमल्लवादि**–[४५] मनोहारिभद्रभरनिर्जितमोहमोषकोपद्रव**श्रीमद्धरिभद्र**–[४६] सर्वविसंवादिनिर्मूलस्वकल्पनाशिल्पिमात्रनिर्मितग्रंथततिवितननविज्ञाऽपगतलज्जदिगम्बरमदनिर्मथनदेवसूरिसख्य**श्रीदेवसूरिब्रह्म**[४७]–[४८]गोचरातिगनिरवद्यचातुर्विद्यविधानविज्ञाऽमारिपटहोद्घोषणख्यापिताभयप्रदत्वगुणमहिम–महीपाल**कुमारपाल**कुमुदकौमुदीपति-**श्रीहेमचन्द्राचार्य**प्रभृतीन्[४९] ज्ञानरत्नाकराणां कृत्यमतनुप्रभावं गुणोपार्जनावश्यकतां [५०]गुणवद्द्वयतां लोकानामाराध्यतमतां च गुणिनामाविर्भावयामासुः।

**लक्षणगोष्ठ्यां**:–अन्तरेणेङ्क् अध्ययने इति धातुं अधीये इति १ उच्यतीति २ व्याघ्रा इति ३, जागृक् निद्राक्षय इत्यंतरा जागर्त्ति इत्यादीनि त्याद्यन्तानि,पंचङ्कुलानीति समासे,त्यादौ त्रयोदशरूपाणि धातोरेकस्यासंसृष्टानि विना गमिं जगामेति,' 'मारिरेकाम,' 'मामिनीभाम,' 'माद्भ्यां' (माभ्यां) 'दधिसेक्' इत्यादीनि रूपाणि, 'गतिकारके इति, 'नित्यादन्तरङ्गं' बलीय इति च न्यायः।

छन्दोनुशासनगोष्ठ्यां:–मागध्यां ५७५०००००, उपहासिन्यां ४५५९७५००००, आर्यायां ८२९२००००भेदाः प्रस्तारादयः षट् प्रत्ययाः।

काव्यगोष्ठ्यां:–काव्यलक्षणं, शब्दार्थभेदाः, दोषाः, गुणाः, भूषणानि, अर्थवैचित्र्यहेतवः।

प्रमाणगोष्ठ्यां चः-प्रामाणिकभेदाः, देवगुरुधर्मतत्त्वलक्षणानि।

प्रस्तावनामात्रमेतदखिलमर्हद्देव-निर्ग्रन्थगुरु-निष्कलङ्क-धर्मयथास्थितवस्तुतत्त्वप्रतिपादनस्य । **देवलक्षणं** [५१]तत्र तावद्विपश्चि-द्वन्दवेद्यविद्यावर्यता निजगद् रागादिदोषानालीढत्वममलकेवल-[५२]परिवृढितां [५३]प्रतिहतात्मगुणप्रहननप्रत्यलघातिकर्मनिचयतां [५४]प्रशमामृतनिमग्नवदनेन्दुविकस्वरा-रविन्ददलप्रख्यनयनद्वन्द्वज्ञापितक्रोधादितिरस्कृतिं [५५] बालकमनीयकामिनीशून्याङ्कानुमापितस्मर-तिरस्कारं [५६]द्विषद्दारणक्लृप्तास्त्रायोगख्यापितदोषप्लोषं; व्यतिरेकेण निदर्शयामासुरन्येषां[५७] विस्त-रतोऽतथात्वं अरक्तद्विष्टानां देवतत्त्वपरीक्षणाय [५८]परीक्षाचणाः । प्रोक्तवन्तः प्रवचनसौधस्तम्भश्री-**मद्धारिभद्रीय**लोकतत्त्ववचांसि **"नेत्रैर्निरीक्ष्ये"**त्यादितो **"यस्य निखिलाश्च दोषा"** इत्येतदन्तं [५९]श्लोकितदेव-तत्त्वाय स्तोकश्लोकास्पदाञ्छ्लोकान्, तथा **"ईशः किमिति"**, **"ब्रह्मा चर्माक्ष-सूत्री"**-ति च पद्ययुगल्याऽमलया परोक्तमप्यन्यवादिषुर्देवस्वरूपनिरूपकं । प्रतिपादितौ परेण मनुष्यमात्राऽसर्वज्ञत्वाख्यावदेवत्वदर्शकौ[६०] निषेधाय देवत्वस्यासिद्ध्यादिदो-षाघ्रातत्वदर्शनेन [६१]निरस्याऽसमकल्याणकरणप्रवणकल्याणकमहिमोद्भावनेन [६२]निरचैषुश्चेत-नाभृच्चणाः श्रीजिनस्यैव यथार्थां देवतत्त्वावतारितां [६३]लोकातिगावाप्तावस्थानां च सिद्धानां [६४]प्लु-ष्टाऽनन्तकालप्रचितमूलनिचयकर्मनिकराणां स्वभावज्ञानदर्शन-वीर्यसुखानन्त्ययुक्तानामिति ।

गरिमगुरुतास्पदश्रीगुरुतत्त्वपरीक्षणे समस्तश्रेयोवितरणदक्षसम्यग्दर्शनज्ञानचरणाराधन-[६५]चञ्चवस्तदु[६६]पदेशनपराः पञ्चमहाव्रतीधूर्धरणधौरेया गौरवार्हा गुरवो निरचायिषत [६७]निश्चया-ख्याननिपुणैः, प्रणिगदितं चाऽऽगमनिष्णातैरारम्भपरिग्रहनिरतानामगुरुत्वं माध्यस्थ्येन ।

अभ्युदयनिःश्रेयससाधनसाधीयोधर्मनिरूपणे अभयदानं मिथ्यावचनादत्तादानाब्रह्मपरिग्रहेभ्यो निवृत्तिः, क्रोधमानमायालोभाभिधानकषायचतुष्कधिक्कृतिः विनयार्जवादिगुणाधिकारश्च **यत्र सुप्रयत्नप्रतिपादितः स एव धर्मः**, कुतीर्थिककथितस्य तु [६८]तस्यातथात्वं जीवतत्त्वावबोध-तद्रक्षणप्रयत्नाभावादसर्वज्ञप्रणीतत्वात् निस्त्रिंशपरिगृहितत्वाच [६९]ततं ततबोधांशुभिः पूज्यैः ।

तत्राद्ये [७०]हेतौ स्नानादेर्धर्मता सप्रसङ्गा निराकृता, प्रतिष्ठापितं चापां सजीवत्वं प्रकरणतो वीतरागाणामेव यथार्थवादित्वं च, [७१]द्वितीये च [७२] तदागमतत्प्रकाशकानामसर्वज्ञत्वं तदागमानां च परस्परविरुद्धार्थाविर्भावकताविनाभाविता-हिंसाद्यतिनिकृष्टोपदेशदानपटुता च साधिता, [७३]तृतीय-स्मिंस्तु तस्मिन् सविस्तरं तत्परिगृहीतॄणां निस्त्रिंशता भवाभिनन्दिता च प्रादुर्भाविता ।

तदेवं देवगुरुधर्मरूपा तत्त्वत्रयी अत्राऽऽतताऽतनुबोधैः शैशवेप्य[७४]शैशवमतिभिरिति यथार्था-भिधाऽस्य **त्रैविद्यगोष्ठीति** । यतो नात्र विश्वे वेविद्यते कापि [७५]विद्याऽवदातकल्याणाऽपरा विहा-यैतत्तत्त्वत्रयीं, [७६]वेदनाद्विचारणात् प्रापणार्हत्वाचास्या नांशतोऽपि विद्यात्वं [७७]जंघन्यते । यथावद-वबोधश्चा समाप्ति निरीक्षणादेवाऽस्या भावी । न हि सूर्यप्रयोजनं[७८]मुकुराक्रान्ततद्बिम्बेन बोभूयमान-मवलोक्यते ।

तथा चाशासे लब्ध्वाऽनया प्रस्तावनया प्रमेयं[७९]प्रमेयं समग्रामेनामध्येतुं श्रोतुं वा प्रयतेरन् प्रवर्तेरंश्चै तदभिहिते तत्त्वत्रयाराधनेऽनल्पकल्पनातिगफलसंपत्तिसंपादनसमर्थ इति **सागरान्तानन्दनामधेयः** ।

पूज्यानां चरित्रं नात्र विस्तरतो निरूपितं सोमसौभाग्य-हीरसौभायगुर्वावल्यादिषु मुद्रितचरेषु यथार्हं निरूपितत्वान्निरूपकैः, स्खलनायाश्च छद्मस्थस्वभावत्वादना[८०]ग्रहाया यदि कोप्यत्र मुद्रणादौ भवेद्दोषः प्रमार्ज्यः परमकारुणिकैर्विधाय करुणामनुग्रहाभिलाषुके मयि, ज्ञापयितव्यश्च यदस्मिन्नस्मिन् स्थानेऽमुकोऽमुको दोषो, यतो द्वितीयावृत्तौ विदधामि विशोधनं, [८१]तस्येह जातदोषस्य च वितरामि मिथ्यादुष्कृतं[८२]सकलजिनमार्गाराधनसावधानपूज्यचरणश्रीसङ्घसमक्षमिति १९६६ आश्विनशुक्लषष्ठ्यां सुरतपत्तनेऽलेख्यानन्देन ॥

रागद्वेषौ हतौ येन, जगत्त्रयभयङ्करौ ।
स त्राणं परमात्मा मे, स्वप्ने वा जागरेऽपि वा ॥

*  *  *  *

कत्थ अम्हारिसा पाणी ।
दूसमादोसदूसिआ ॥
हा ! अणाहा ! कहं हुंता !
जइ ण हुंतो जिणागमो ॥

# पूज्यागमोद्धारकश्रीलिखितप्रस्तावना-

## विषमपदार्थसूचिका

# आनन्द-लहरी-टिप्पणी

## १ श्री त्रैविद्यगोष्ठी

१. "विदित" पदस्य सामान्यतः 'ज्ञात' रूपोऽर्थः सम्भवति, तथाऽपि प्रकरणसङ्गतिवशादत्र "प्रथित=प्रसिद्धे"-त्यर्थोऽवबोध्यः ।

२. अन्धतमः=गाढान्धकारः ।

३. परमवैदुष्यरूपा या धुरा तस्याः धरणे धौरेयाः=वृषभाः, तथा अनवद्याः=निर्मलाश्च याः विद्याः तासां व्रजेन=समूहेन अवदातः=निर्मलः आत्मा येषां ते, ततश्च कर्मधारयः ।

४. तिसृणां विद्यानां समाहारः त्रिविद्यं स्वार्थे अण्प्रत्ययकरणेन 'त्रैविद्य' पदनिष्पत्तिरत्र ज्ञेया ।

५. ग्रन्थप्रान्त्यभागे उपान्त्यश्लोकस्थेन "बाल्येऽपि कर्मकुतुकान्मुनिसुन्दरेणे"तिपदकदम्बकेनैतत्स्पष्टीभवति ।

६. लक्ष्यन्ते=बुद्धिविषयीक्रियन्ते सदसच्छब्दा येनेति लक्षणं व्याकरणशास्त्रम् ।

७. न्यूनतादूषितमित्यर्थः ।

८. मर्यादावाचि इदं पदम् ।

९. "विलोक्यते" इत्यस्य "जयश्रीशब्दः" इत्यनेन सहान्वयः ।

तथा च "यथा.......कल्पद्रुमस्याऽऽद्यपद्ये........गुर्वावल्यां विज्ञैस्तथा (ग्रन्थारम्भे स्वमर्यादासूचकत्वेन) न्यसनीयः जयश्रीप्रदः जयश्रीशब्दः विलोक्यते, स एव च अत्राऽपि" इत्यन्वयो विज्ञेयः

१०. अत्र खलु पूज्यपादागमोद्धारकैः विज्ञनिष्पक्षपातिसद्गुरूपासनाशून्यमनस्कोद्भावित-प्राकृतभाषा निस्सारत्वाऽसारत्वप्रतिपादनगर्भविशेषणप्रयोगद्वारा प्राकृत-भाषाया महत्त्वं व्यञ्जितमस्ति ।

११. वाराणस्याः वासेन जातो यः मदस्तेन उद्धुरा या विपश्चितां ततिः श्रेणिः तस्याः विजयेनावाप्तं यथार्थं यत् न्यायविशारदपदं यैः ।

तथा सन्=प्रशस्तः य आलोकः=भावप्रकाशः तद्वन्ती लोचने येषां तेषां लोभकाः=मोहकाः ।

तथा आप्तक्रिया योगवहनाऽऽदिरूपा तस्याः करणेन आसादितं गण्युपाध्यायवाचकादिपदं यैः । इतिअर्थानुसारिणी खल्वत्राऽन्वयसङ्गतिर्विज्ञेया ।

१२. चरणशब्दोऽत्राऽऽप्ताऽभिजाताऽभिसन्धिरूपमर्यादाया पूज्यत्ववाचकः ।

१३. पूज्याचार्य-हरिभद्रसूरीणामित्यर्थः ।

१४. सांसारिकभागिनेय-हंसपरमहंसमुनिपराभवस्य बौद्धाभिरचितस्य निराचिकीर्षयाऽमर्षातिरेकात् सर्वान् तान् बौद्धविद्विषः सुतप्ततैलकटाहे ज्वलदङ्गारभृतचूल्लिकोपरिस्थे काकरूपेणाभिचारप्रकारेणाऽऽकर्ष्य जुहूषापापस्य प्रायश्चित्तरूपेण गुरुवर्यप्रेरितवृद्धसाध्वीसङ्के तात् पश्चात्तापपथ्यधिव्रजता सूरिवरेण चतुश्चत्वारिंशदधिकचतुर्दशशतसम्मितग्रन्थाभिनवरचना सङ्कल्पिता, तेषां च प्रान्त्यभागे "विरह" पदोल्लेखः समुट्टङ्कितोऽस्ति ।

१५. वेत्ति=प्रकर्षेण जानाति योऽसौ वित्=विद्वान्, तस्य भावः वित्त्वं, विद्वत्त्वमित्यर्थः।
१६. ग्रन्थारम्भे ऐङ्कारप्रयोगरूपाङ्करणे इत्यर्हः।
१७. लक्ष्यते वस्तुतत्वं येनेति व्युत्पत्या सत्तर्कशास्त्रमत्राभिप्रेतमित्यवसीयते। तेन च सत्तर्कशास्त्रानुमित्यादिनिपुणैरित्यर्थः।
१८. प्रस्तुतग्रन्थकर्तृणां पू० श्रीमुनिसुन्दरसूरीश्वराणामित्यर्थः।
१९. इष्टतमार्थपरकमिदं पदम्।
२०. अत्र शब्दानुप्रासविधया प्रकरणस्य=प्रस्तुतस्य प्र=प्रकर्षेण करणं=विरचनमित्यर्थः प्रज्ञाप्यते।
२१. 'नदीष्ण' शब्दो हि सर्वदिग्गामितद्विषयकपाण्डित्यसूचकः अतोऽत्र नदीष्णता=प्रकाण्डपाण्डित्यमित्यर्थः।
२२. पूज्यायार्य श्री ज्ञानसागरसूरिविषयिणीत्यर्थः।
२३. श्रीदेवसुन्दरसूरिवर्याणां विनेयोत्तंसानां सूरीणां वर्णनप्रसङ्गो गुर्वावल्यां ३२६ श्लोकतः प्रवृत्तोऽस्ति।
२४. गुर्वावली श्लो० ६४५।
२५. श्रीज्ञानसागरसूरीयमित्यर्थः।
२६. 'पूज्यपाद' शब्देनात्र श्रीज्ञानसागरसूरीशपरामर्शः।
२७. अत्र "ये" पदेनाऽद्यतनैतिह्यविदुषामध्यात्मकल्पद्रुमगुर्जरानुवादकारिप्रभृतीनामनिश्रितगुरूणां परामर्शः।
२८. पूज्याचार्यश्रीमुनिसुन्दरसूरिवराः।
२९. श्लोकद्वयमेतत् गुर्वावल्यां ४२०-४२१ सङ्ख्याङ्कितं दृश्यते।
३०. अत्र वज्रार्थसूचक'कुलिश'पदेनाऽसदुद्भावितकुतर्कैरधृष्यत्वं व्यज्यते।
३१. विज्ञाते गुरुपदस्य ऐदम्पर्येतिहासे यैस्तेषामिति विग्रहोऽत्रावबोध्यः, ततश्च गुरुपदस्य गुरुपरम्परागम्यनिश्रोपजीव्यकृपालभ्यैदम्पर्यस्य पट्टावलीगम्यघटनासमुच्चयरूपैतिह्यस्य च ज्ञातव्यत्वस्यावश्यकतानिर्देशोऽत्र पूज्यवर्यैः कृतोऽस्ति।
३२. अतिशयेन विदिताः=ख्याताः इत्यर्थः।
३३. अत्रार्थद्वयं सङ्गच्छेत, तथाहि:—

बृहद्गच्छस्य=तपगच्छस्य पूर्वसंज्ञारूपस्य अधीशत्वेन,

अथवा बृहतः=पूज्यश्रीसोमसुन्दरसूरिसन्निभनानाविधपदस्थमुनिगणैः शिष्यप्रशिष्यादिभिश्च महाप्रमाणस्य गच्छस्य=समुदायस्य अधीशत्वेन इति।

३४. पूज्याः=श्री सोमसुन्दरसूरिपादाः तैरपि पूज्यास्तेषाम् इति व्युत्पत्तिरत्रावबोध्या।
३५. गुर्वावलीप्रशस्तेश्चरमभागे "इति श्रीयुगप्रधानावतार श्रीमत्तपागच्छाधिराज·········श्री देवसुन्दरसूरि···········तद्विनेयश्रीमुनिसुन्दराणां" इति सम्बधोट्टङ्कोऽभावबोध्यः।
३६. अत्र विनेयपदस्य शिष्यार्थत्वमविवक्ष्याज्ञावर्त्तित्वरूपसामान्यार्थस्य विवक्षा ज्ञेया, समर्थ्यते चाप्येतत् गुर्वावली (श्लो. ३४५) गत" श्रीसोमसुन्दरगुरुप्रमुखास्तदीय "मितिश्लोके गुरुपदोल्लेखेन,
३७. उद्देशादिरूपं यदतुच्छं=उत्कृष्टफलं, तस्य कल्पनं=संपादनं तत्र कल्पमहीरुहः=कल्पवृक्षः, तद्वन्मानं=शास्त्रे प्रमाणं येषां ते इति विग्रहोऽर्थानुसारी ज्ञेयः।

'उद्देशादि' पदे आदिपदेन समुद्देशानुज्ञागणसम्बन्धिविविधज्ञानदर्शनचारित्राद्याराधनोत्सर्पककार्यानुज्ञादीनि ग्राह्यानि।

३८. श्रिया यौति=मिश्रीभवति योऽसौ इति व्युत्पत्त्या क्विप्करणेन च निष्पन्नं "श्रीयुत्" शब्दय प्रथमाबहुवचनमिदं विज्ञेयम्।

३९. विदुषां सम्बन्धिना विधानविषयकानां योग्याऽयोग्यानां परीक्षणेन सम्यग् विज्ञातं वाङ्मयं यैः एतादृशविद्भिः सह जातेन समागमेन उद्भवः यस्यैतादृशाऽऽनन्दरूपा नन्दिः,

४०. वक्रादितरः=तत्प्रतिपक्षी सरल आशयो येषां तैः ।

४१. शास्त्राभ्यासः=अध्ययनपाठस्वरूपः, अनुयोगः=पाठन-वाचनाऽऽदिरूपः; तयोरवसरे उदीर्णा उदयमापन्ना या प्रतिभा,तया विशुद्धा या बुद्धिस्तस्या आभोगः=विस्तार इत्यर्थः ।

४२. शुद्धेः=मानसिकऋजुताऽऽदिरूपायाः अभि=समन्तात् योगः=प्राप्तिरित्यर्थः ।

४३. ज्ञानरूपद्रुमस्योन्मूलने मातङ्गसमानां त्रिवर्गस्य विध्वंसने व्यग्राणाञ्च दर्पस्य अपाकरणं यस्मात् एतादृशे प्रकरणे इति सम्बन्धः ।

४४. न अणुः-अनणु=महान् , सचाऽसौ-प्रभावः, स एव वाः=जलं, तस्य वारांनिधिः=समुद्रस्तत्तुल्यात् ।

४५. मनोहारिणा भद्रभरेण निर्जितः मोहाऽऽख्यमोषक (चौर) स्य उपद्रवो यैः, एतादृशाः श्रीहरिभद्राः ।

४६. सर्वा चासौ विसंवादिनी निर्मूला च या स्वकल्पना, सैव शिल्पिरूपा, तेनैव निर्मितायाः ग्रन्थततेः वितनने=प्रचारादिरूपे विघ्नाः=पटिष्ठाः, अत एव अपगतलज्जाः ये दिगम्बराः तेषां मदस्य निर्मथने देवसूरिणा=सुरगुरुणा-बृहस्पतिना सह सख्यं येषां ते एतादृशा ये देवसूरयः ।

४७. शब्दरत्नमहोदधावयं हि शब्दः श्रेष्ठत्वार्थसूचको निर्दिष्टोस्तीति ।

४८. गोचरातीतं=अतिप्रमाणं निरवद्यं यत् चातुर्विद्यविधानं, तस्मिन् विज्ञाः, अमारिपटहोद्घोषणया ख्यापितः अभयप्रदत्वगुणमहिमा यस्य एतादृशमहीपालकुमारपालरूपकुमुदस्य कौमुदीपतिः=चन्द्रस्तत्तुल्या ये श्रीहेमचन्द्राचार्याः ।

४९. पूर्वोक्त "पुरुषसिंहान्" इत्यस्य विशेषणमिदम् ।

५०. आन्तरबहुमानवाची अयं शब्दो विज्ञेयः ।

५१. विपश्चितां=विदुषां वृन्दैः वेद्या या वर्यता=श्रेष्ठता येषामिति विग्रहः ।

५२. स्वामित्वमित्यर्थः ।

५३. प्रतिहतः=दूरं निरस्तः आत्मगुणानां प्रहनने=विघातकरणे प्रत्यलानां=समर्थानां घातिकर्मणां निचयः येनेति विग्रहः ।

५४. प्रशमामृते निमग्नः यः वदनेन्दुः, विकस्वराणामरविन्ददलानां प्रख्यं=समानं यत् नयनद्वन्द्वं च ताभ्यां ज्ञापिता क्रोधादेस्तिरस्कृतिर्येनेति विग्रहः ।

५५. बालानामज्ञजीवानां कमनीया या कामिनी तया शून्यो योऽङ्कः=उत्सङ्गस्तेनानुमापितः स्मरस्य तिरस्कारः येन तमिति विग्रहः ।

५६. द्विषतां=शत्रूणां दारणाय क्लृप्तानि यानि अस्त्राणि=आयुधानि तेषामयोगेन=असम्बन्धेन ख्यापितः दोषानां (रागादीनां)=प्लोषः समूलनाशः येन तमिति विग्रहः ।

५७. अन्येषां=कुदेवादीनाम् ।

५८. परीक्षानिपुणा इत्यर्थः ।

५९. श्लोकितं=प्रशंसितं देवतत्त्वं यैः तथा अस्तोकः=बहुः यः श्लोकः=प्रशंसा तदास्पदाश्च ये, ततश्चोभयोस्समास इति सङ्गतिरर्थानुरोधेन समीचीना प्रतिभाति ।

६०. 'ख्यौ अदेवत्व०' इति सन्धिच्छेदः ।

६१. असिद्धयादि-दोषा-घ्राततवदर्शनेन देवत्वस्य निषेधाय परेण प्रतिपादितौ मनुष्यत्वाऽसर्वज्ञत्वाख्यौ अदेवत्वदर्शकौ (हेतू) असम...........निरस्य इत्यन्वयोऽत्र ज्ञेयः ।

६२. चेतनाभृच्चणाः=चेतनां बिभ्रति ये ते चेतनाभृतः=संसारिणः तेषु निपुणाः इति ।

६३. लोकोत्तरेत्यर्थः ।

६४. अनन्तकालेन प्रचितः=वृद्धिं गतः मूलानां निचयः येषामित्येतादृशकर्मणां निकरः प्लुष्टः=दग्धः यैरिति ।

६५. निपुणाः तत्पराः वा इत्यर्थः ।

६६. 'तत्' पदेन सम्यग्दर्शनादित्रयरूप-मोक्षमार्गग्रहणम् ।

६७. निश्चयेन=असंदिग्धं आख्याने=निरूपणे निपुणैः इति भावः ।

६८. तस्य=धर्मस्य, अतथात्वं=अधर्मत्वं, एतत्पदयोः "तत"-मित्यनेन सह सम्बन्धः ।

६९. ततं=विस्तारेण निरूपितं तताः=विस्तृताः बोधस्य=ज्ञानस्य अंशवः=किरणानि येषामिति विग्रहः ।

७०. जीवतत्त्वावबोध-पूर्वक-यतनाऽभावरूपे इति शेषः ।

७१. असर्वज्ञ-प्रणीतत्व-रूपे ।

७२. अत्र तत्पदेन कुतीर्थिककथितधर्मपरामर्शः, ततश्च तस्य=कुतिर्थिककथितधर्मस्य आगमः येभ्यः तथा तस्य=कुतीर्थिककथितधर्मस्य प्रकाशकाश्च ये, एतादृशानां तेषामिति भावः ।

७३. निस्त्रिंश-परिगृहीत रूपे ।

७४. न विद्यते शैशवं येषामिति अशैशवाः=प्रौढविद्वांसः तेषां मतिरिव मतिः येषां तैरिति विग्रहः ।

७५. अवदाता चासौ कल्याणा चेति कर्मधारयोऽत्रावबोध्यः ।

७६. अत्र विद्धातोः प्राप्ति-ज्ञान-विचाररूपाणां त्रयाणाम् अर्थानां पूज्यपादैः सङ्गतीकृताऽस्ति ।

७७. हन्धातोः यङन्तं रूपमिदम् ।

७८. दर्पणवाची अयं शब्दः ।

७९. प्रमा=बुद्धिस्तद्विषयीभूतं प्रमेयं=प्रमाणविषयीभूतं सत्पदार्थमित्यर्थः ।

८०. आग्रहरहितायाः इत्यर्थः, इदं च 'स्खलनाया' इत्यस्याः विशेषणम् ।
एतेन च पूज्यपादैः स्खलनामात्रस्य छद्मस्थस्वभावत्वं निराकृत्य निराग्रहत्व-माहात्म्यं ध्वनितम् ।

८१. 'भाविनि भूतोपचार' -रूपन्यायमङ्गीकृत्यात्र 'जात' पद-प्रयोगोऽवबोध्यः ।

८२. श्रीसङ्घस्य पूज्यतमत्वे हेतुत्वेन श्रीजिनमार्गाराधनसावधानत्वमत्र निदर्श्य पूज्यपादाः समूहमात्रस्य सङ्घत्वं निराकृतवन्तः ।



श्रीआगमोद्धारकालेखितप्रस्तावनासंग्रहस्वरूपे

# श्री आनन्दरत्नाकरे

## द्वितीयं रत्नं

## श्रीवीतरागस्तोत्रस्य उपक्रमः

[1]सकलैहिकामुष्मिकहितकृद्धितकारक-[2]पुन्नागनिर्मितास्तोकश्लोकास्पदा-तीन्द्रियेतरपदार्थसार्थस्वरूपाविर्भावक-लोकोत्तरीयग्रन्थतत्यवधारणपीनबुद्धिप्राग्भाराणाम्[3] सकर्णानां नाऽसमाकर्णितमेतद्यदुत "यस्य कस्यापि मतस्य [4] सौष्ठवमितरच्च तदीयागमस्तोमावगमेनैवागम्यते," [5]तत एव [6]यतोऽभिमन्तव्यपदार्थानां तथ्येतरत्वविचारणासरण्यवतारः ।

अत एव चावाऽप्ता[7]-खिललोकालोकगताशेषपदार्थसार्थावलोकनप्रत्यल-समस्तज्ञानावरणीयसमूलकाषंकषणप्रभव[8]प्रभूतप्रभुतास्पदकेवला अपि श्रीमदकलङ्काराध्यपादाः श्रीसर्वज्ञाः प्रकटयामासुः [9]प्रकटप्रभावात्यस्तमितकुमततततानुकर्मप्रवेकविस्तारकप्रवादैः [10]श्रीमद्गणधरैरुदयप्रक्षिप्तगणभृत्कर्मभिर्ज्ञानचतुष्टयपीयूषपूरान्तःकरणैः 'उप्पन्ने इ वा विगमे इ वा धुवे इ वे' त्यनन्यसाधारणनिश्शेषवस्तुव्रजावस्थितावाध्यधर्मदर्शनपटीयोवचस्त्रितयरत्नत्रयसमाखण्डज्योतिर्द्वारेण द्वादशाङ्गीतीर्थं सकलसुरासुरनरेश्वरगणोपकारक्षमं विद्वद्वृन्दनमस्यम् ।

तच्च यावदपश्चिमपूर्वभृच्छ्रीमद्देवर्द्धिगणिक्षमाश्रमणम[12]पश्चिमानुपमातिशयसाम्राज्यसार्वभौमहिमवदाविर्भूतभागीरथीद्वादशाङ्गी[13]तीर्थान्तरगतमपूर्वचमत्कारचिन्तामणि[14]रोहणायमानमासीदसाधारणमनीषाधारणलब्ध्युपेतमुनिगणधौरेयधृतं पुस्तकगणमृत एव, परं प्रेक्ष्यावसर्पिणीप्रभावह्रसद्धीगणम् मुनिगणमुपकारकरणपटवः [15]पूज्यपादाः सम्मील्याचार्यपञ्चशतीं [16]वर्त्तमानागमरत्नरत्नाकरोपमां सौराष्ट्रराष्ट्रराजमानायां [17]तत्त्वज्ञानश्रीवलभ्यां वलभ्यामुद्भावयामासुः शासनं [18]विशसितप्रबलकर्मबलकेतनं पुस्तकारूढं सिद्धान्ततया सर्वसम्मताविसंवादमतीयम् ; तदारत एव चासंयममयासंयतसंसारपारावारवर्धनमपि संयमवर्धनतयोपकरोति [19]पुस्तकवृन्दमर्हाणामर्हमर्हच्छासननभोङ्गणताराख्पाणां मुनिवराणाम् ।

स्पष्टितं च स्पष्टमेतत्स्पष्टतमबोधकिरणैर्युगप्रधानप्रवरैः [२१]श्रीमत्तत्त्वार्थदीपनप्रदीप्रप्रदीपोपमतत्त्वार्थ-[२२]सार्वदिकसाधुकल्पकल्पनकल्पबृहत्कल्पप्रभृतिषु [२३]परमार्थपथप्रधानावधारणैः, अन्यथा तु [२४]नाभविष्यदेव [२५]सकलजन्तुजातासाधारणपावित्रिरणविज्ञपारमार्थिकतत्त्वप्रधानासाधारणाचरणावगमनज्योतिरन्तरा विवेकचक्षुरुद्घाटनमैदयुगीनानां [२६]दुष्षमासमयोद्भूतानेकवाचालकुतीर्थिकवाचालितदिगन्तरालानुपलभ्यदिगवलोकानाम्, [२७]तदन्तरेण च कथङ्कारमभविष्यत् सदाचारसौधसोपानारोहोऽप्या[२८]रूढानार्यजनप्रबलासङ्गजातप्रबलानार्याचारप्रभावेऽत्र युगे धर्मजिघृक्षाऽपि ! आस्तां [२९]तावद् दूरादेवानवगतद्रव्यभावानुकम्पाप्रथनप्रत्यलधर्ममार्ग-कामस्नेहदृष्टिरागमदिरोन्मत्तविहितानेकदुर्गमविघ्नसरित्प्लवोत्तरणाधिगतशमसाम्राज्यसाधनसावधानसर्वसङ्गपरित्यागमहाव्रताङ्गीकारादिविधानं स्याद् [३०]भवेयुश्चारम्भपरिग्रहासक्तप्रबलमिथ्यात्वमोहमदिराविह्वलान्तःकरणाविरतिराक्षसीजग्धजीवस्वरुपरमणतासत्त्वा एव मुनय इति शासनोन्मूलनमित्यलम् प्रसक्तानुप्रसङ्गेन ।

विरचिताश्च [३१]वीतरागचरणसरोजकिञ्जल्कमधुकराभैः श्रीवस्तुपाल-कुमारपाल-साधुपेथडादिभिरनेके कोशा [३२]ज्ञानद्युतिद्युतिकोशा इव भव्याब्जोद्बोधिनो वीतरागमतानूनमहिमासरिच्छ्रोतः प्रभवपृथ्वीधरायमानाः [३३]परश्च हुण्डावसर्पिणीपञ्चमाररजनीरजनीचरायमाणदुष्टम्लेच्छादिभूमिपैरज्ञानतत्यवष्टब्धहृदयैर्यत्याभासैः श्रावकाभासैश्च तत्त्वातत्त्वविवेचनविमुखतास्वीकृतपुस्तकद्रव्यैर्विनाशिता ज्वालिताः, क्षिप्ता जलेऽतनुप्रवाहे, चिता भित्तौ, हीनाचारैर्नीताश्च हानिं स्वीयानाचारोपद्रवरक्षणबद्धबुद्धिभिः, तथाच शेषाः [३४]शेषीभूता एवोद्भावयन्ति [३५]शासनोद्भावनामसमप्रभावनाम्[३६] ।

तत्रापि निःस्सत्त्वाद्देशस्य, अतिह्रसीयस्त्वाद्धर्मबुद्धेः, [३७]परायणत्वान्मानगिर्यारोहे, [३८]अनवबुद्धत्वात्तत्त्वातत्त्वमार्गस्य, पलायितप्रायत्वाज्ज्ञानस्य, व्याप्तत्वादनार्यभाषारुचेः, [३९]तुन्दपरिमृजबहुलत्वाल्लोकानाम्, संस्कारहीनत्वान्मतेः, अरुचेः संस्कृतभाषायाः, पूत्कारप्रायत्वगणनावतारित्वात्प्राकृतग्रन्थानाम-राजभाषात्वादार्यभाषाया, अनार्यभाषाया अविरतत्वान्नराणाम्, [४०]जेमनवारविस्तारितजयपताकित्वाज्जनानाम्, [४१]वाद्यशब्दवाचालितत्वाद्यशसः, [४२]चन्द्रोदयाद्युपकरणकरणमात्रोत्तीर्णमतिप्राग्भारत्वाद्रुचिमताम्, [४३]गौर्जर्याद्यपभ्रंशभाषाप्रधानत्वात्पूजाकारणप्रवणोपदेशकानाम्, विरलतमीभूतान्येवाधुना सिद्धान्तसाधनसिद्धान्तपुस्तकानि, नातः परं विज्ञानामस्ति विषादपदमन्यत् जगत्त्रयेऽपि ।

[४४]परं अवलोक्यैतद्विवेकविलोचनेन स्थापयामास गूर्जरदेशीयश्री**सुरतपत्तनीयगुलाबचन्द्राख्यो** [४५]**देवचन्द्रतनु**जोऽविगीतसिद्धान्तप्रसाधनपटुप्रसाधितज्ञानदिवाकर–श्रीमद्गणभृत्प्रभृतिसकलवाङ्मयवितानविस्तारणलब्धावतारः, [४६]स्ववप्तृदेवचन्द्रपादव्यवस्थापितसप्ततिसहस्र(७०-०००) मानद्रम्मव्यवस्थायां पुस्तकप्रसारणप्रवणान् शेषानपरांस्तत्कार्यवाहकान् **जीवनचन्द्र-नगीनचन्द्रा**दीन् परस्कृत्य, व्यवस्थाम् तत्र चानेकतरगूढतत्त्वप्रकाशनप्रभाकरसिद्धान्तलेखनव्य-

वस्थां सतीमप्यनादृत्याल्पपुस्तकप्रसारमात्रजायमानबहुद्रव्यव्ययां झटिति पुस्तकप्रसरणप्रगुणां मुद्रणकलां मुख्यतयाऽधिचकार, भगिन्याश्च स्वीयाया **विद्युन्मत्या** द्रव्यं तत्र सम्मील्य समानीय च कलान्तरोपार्जितं चान्यद्रविणजातं लक्षोन्मितं लक्ष्यं लक्षणविदां, तत्र चादितो मङ्गलाचरणमिव शिष्टानां परममङ्गलभूतमिदमुपचक्रमे मुद्रितुं ज्ञानधनैः साधुभिः संशोध्येति [४७]प्रस्ताव्य व्यवस्थाम् प्रस्ताव्यतेऽधुना प्रक्रान्तो ग्रन्थः कर्तृश्रोत्रधिकारप्रमाणादिभिः ।

तत्रावधीयतां तावदवधारणादीधनैरिदम्, यदुत विधातारोऽस्य [४८]विहितनिर्वीराधनमोचनाष्टादशदेशामारिपटहलब्धाकल्पस्थायियशःशरीराः, [४९]सार्धत्रिकोटिग्रन्थ[५०]ग्रथनलक्षितसर्वज्ञावतारत्ववितीर्णकलिकालसर्वज्ञबिरुदाः, [५१]अनवद्यचातुर्विद्यविधानख्यातब्रह्मातिगप्रभावाऽष्टादशदेशाधिपतिकुमारपालक्ष्मापालबोधनस्मारितसातिशयमुनिगणाः श्रीमन्तो भगवन्तो **हेमचन्द्राचार्याः**, तुच्छं चेदं यद् व्यागृणन्त्यलब्धतन्माहात्म्याब्धिमध्याः सार्धत्रिकोटिग्रन्थग्रथनाऽसम्भवमिति, पाठमात्रग्रन्थग्रथनपटीयस्त्वात्तेषाम्, श्रूयत उपलक्ष्यते लेखककुण्डस्थानादिविलोकनेन स्पष्टतरं विदुषामरक्तद्विष्टानां चैतत् ।

सूरिप्रवराश्चैते कदा कतमं भूमण्डलं मण्डयामासुः ? कदा च सूर्यास्तमयेनेव रजनी प्रचारमवाप सूरिवरास्तमयेन कुमतध्वान्ततति: विस्तृतिम् ? कस्मै च योग्यतमाय पुरुषोत्तमाय [५२]विधायैनमर्पयामासुः, कश्चाधिकारोऽत्र विद्वद्वृन्दवेद्य आत्मकल्याणजनक ? इति प्रवृत्तायां विचारणायाम् निर्णीयते तावत्स्पष्टं स्पष्टितत्वात् “**कुमारपालभूपालः प्राप्नोतु फलमीप्सित**”–मिति श्रीमद्विहितादेवैतदीयश्लोकात्कुमारपालक्ष्मापालसमकालीनत्वम् । कुमारपालभूपालानेहाश्च गुर्जरभूपपट्टावल्यादिविलोकनतो निश्चीयते वैक्रमीयद्वादशशतीयो, यतो विक्रमसंवन्नवनवत्यधिकैकादशशतमिते राज्याभिषेकस्त्रिंशदधिकद्वादशशतके च तस्य स्वर्गम इति । तथाच सूरिपादसमयोऽप्येष एव । स्वचरणन्यासपावितभूमण्डलनिर्णयोऽप्यत एव सम्यक्तया जायत एव, यतः [५३]पुण्यतमजननिवासतिरस्कृतविबुधालयविबुधालयं **श्रीमत्पत्तनपुरम**णहिल्लोपपदमभूत्परमार्हतानां राजर्षिपदव्यलङ्कृतानां श्रीकुमारपालभूपानाम् राज्यस्थानम्, तथा च प्रायेण श्रीमतां गूर्जरधरित्र्यामेव विहारस्तत्रत्यागण्यपुण्यपूरप्लावितान्तःकरणानामेव च [५४]परस्परविरोधदुर्गन्धभृद्वाणीवाचक[५५]सुरगुरुतिरस्कारिभारतीप्राग्भारभूषितवदनमलयनिःसृताविरुद्धपरमागमोदितिश्रवणभाग्यमभूदिति, वास्तव्याश्चैते तत्रभवन्तो भगवन्तो गार्हस्थ्ये गूर्जरीयधन्धूकाख्य एव ग्रामे, एतत्प्रभृतिकं सविस्तरं [५६]वृत्तान्तमुपलभ्यं [५७]श्रीमतां **कुमारपालप्रबन्धा**दिति ।

स्पष्टमेव चोपरिष्टन्निःशङ्कितश्लोकोत्तरार्धविचारणेन प्रकटीभविष्यति यदुत **श्रीकुमारपाल**पावनप्राधान्येन प्रणीतिरस्य, **किंवदन्ती** चेयं तत्र तदनुसारिण्येव च भणितिरवचूर्णिकाराणामपि वीतरागस्तोत्राणां **श्रीविशालराजप्रभू**णामवचूर्णौ, यदुतार्हतधर्मप्राप्तिकालादर्वाक् राजर्षिभिः

कृतमभूत् यन्मांसभक्षणं, समयसद्भावे चावगतेऽवबुद्धम् 'चउहिं ठाणेहिं णेरइयाउत्ताए कम्मं पगरेइ' इत्यादि, अगणनादनवरे जाताश्चात्मप्रगुणाश्चातापभाजनं, भूपालमौलिमणिलालितपादपीठा राजर्षयो याचितवन्तश्च परमगुरवे प्रायश्चित्तप्रतिपत्तिम् , श्रीमद्गुरुभिश्चावसरोचितं द्वात्रिंशद्दशनभक्षितत्वान्मांसस्य तच्छुद्धये तावन्मिता एवान्वर्थाः समर्पिताः प्रकाशास्तत्र द्वादश तावद्योगशास्त्रीया विंशतिश्चैवादीयाः, प्रतिदिनमभ्यस्यैव[४८] च ते [४९]दन्तान्तःकरणशोधनं प्रकाशानां द्वात्रिंशं व्यधात्रीपुर्भोजनं चक्रुश्चैतेषां[६०]यथार्थमभिधां प्रकाशानां, सन्ति चैव एतद्विधा एव, यथावज्ज्ञानं चैषामेतद्विधत्वस्य भवेद्यथावत्परिशीलनादेव, परं तत्सिद्धय एवाधिकारदर्शनं निदर्शनमात्रमेव विधीयतेऽस्मामिस्तथा चान्तिमं केऽत्राधिकारा इति प्रश्ननिर्वचनमपि भविष्यति स्पष्टं तत्र ।

प्रथमे तावत्प्रस्तावनास्तवे श्रीमद्वीतरागलक्षणमालक्षयन्तः प्रथमादिसप्तम्यन्तविभक्त्यन्तान्योन्यसम्बद्धश्लोककदम्बकदर्शनेन परमदेवानामाराध्यताहेतुभूतं परात्मत्वं परंज्योतिष्मत्त्वं परमपरमेष्ठित्वं तमोविनाशविभाकरत्वं सर्वक्लेशमूलोन्मूलकत्वं सुरासुरनमस्यत्वं पुरुषार्थप्रसाधकाखिलविद्याविर्भावकत्व-मतीतानागतवर्त्तमानकालवृत्तिपदार्थसार्थसंविद्धारित्वं विज्ञानानन्दब्रह्मैकात्म्यं च निष्टङ्कय श्रद्धेय-ध्येय-शरण्य-नाथवत्स्पृहा-कृतार्थकिङ्कर-वाणीपवित्रताऽऽदि च निश्चिक्युर्निर्णयचणाः दर्शयामासुश्च वीतरागस्तवानां मनुष्यभवफलतां श्रद्धालूनां विशृङ्खलवाणीवादिनामपि रुचिरताम् ।१।

द्वितीयस्मिन् **सहजातिशयस्तवे**,श्रीमज्जिनानामतिशयचतुष्कं निरदेशि निर्देशप्रधानैर्देहस्य तेषां नैर्मल्य-सौगन्ध्य-नीरोगता-स्वेदराहित्यानि, रुधिरामिषश्वैत्यं, श्वाससौरभ्यमाहारनीहारविध्यदृश्यत्वं चेति निबन्धनेन ॥ २ ॥

तृतीये च सर्वाभिमुख्यं पर्षत्समावेशं वचनैक्यसाग्रयोजनशतगतगदनाशकत्वमीतिविद्रावकत्वं वैरविलापकत्वं निर्मारित्वमतिवृष्ट्यनावृष्टिस्वपरचक्रभिदुर्भिक्षभेत्तृत्वं भामण्डलवत्त्वमित्येवं **कर्मकक्षोन्मूलनजातैकादशातिशयवर्णनम्** ॥ ३ ॥

चतुर्थे तु [६१]**सुरकृतामेकोनविंशातिशयानां** व्यावर्णयन्तः पुरतश्चक्राभिसरणमिन्द्रध्वजोच्छ्रयं पङ्कजपादन्यासं चतुरास्यत्वं प्राकारत्रितयपरिगतत्वं कण्टकार्वाङ्मुख्यमवस्थितकेशरोमनखश्मश्रुतां विषयाप्रातिकूल्यं समकालमशेषर्तुसद्भावं सुगन्ध्युदकवृष्टिं पक्षिप्रादक्षिण्यं वाय्वानुकूल्यं वृक्षाग्राभिनतिं कोटिसुरासुरसेव्यत्वं प्रकटयामासुः छत्रत्रयं सपादपीठं मृगेन्द्रासनं पुष्पवृष्टिं दुन्दुभिं चैत्यद्रुमं चमरवीज्यमानतां चाग्रतः **प्रातिहार्यस्तवे** आविर्भावयिष्यन्तीत्युपेक्षितमिदं षट्कमिति मन्ये ॥ ४ ॥

पञ्चमे **प्रातिहार्यस्तवे**ऽशोकवृक्ष--सुरपुष्पवृष्टि-दिव्यध्वनि-दुन्दुभ्या-ऽऽतपत्रत्रयी-चामर-सिंहासन-भामण्डलान्याख्यन् ख्यातकीर्त्तयो भावार्हन्त्यचिह्नभूतानि ॥५॥

षष्ठे **प्रतिपक्षनिरासस्तवे** परमदेवे माध्यस्थ्यमपि दौःस्थ्यनिबन्धतया निवेद्य प्रतिप-

पक्षस्य रागादिमत्त्वं, परेषां योगमुद्रारहितानां त्रातृत्वाभावं मलीमसाचारमुपस्थादिविकारवत्तां चाख्याय रागादिनियुक्तानां देवत्वासम्भवं समाचचक्षिरे विचक्षणाः ॥६॥

सप्तमे **जगत्कर्तृत्वनिरासस्तवे** निष्कर्मत्वेनाङ्गवदनवक्तृत्वशास्तृत्वाभाव ईश्वरस्य, सदेहत्वेऽपि च न विधाता क्रीडाकृपान्यतराभावाद् , दुःखादिविधानदकृपता कर्मजन्ये वैचित्र्ये च नार्थवत्ता, [६२]स्वभावस्तु निःसत्ताक एवोत्तरे, ज्ञातृत्वरूपकर्तृत्वे च केवलिनां सयोगायोगभिन्नत्वाद्भगवतां न विवादः, शासनसाम्राज्यान्तर्वर्त्तिनां च नेयं व्याबाधा लेशतोऽपीति प्रतिपादितं सुनिर्णीतसिद्धान्ततत्त्वप्रतिपादनपरैः ॥७॥

अष्टमेऽ**नेकान्तप्रकरणस्तवे** वस्तुजातस्यानेकान्तमुद्रान्तवर्त्तित्वं तदभावे कृतनाशाकृतागमौ अनिवार्यौ समवतरतः, आत्मनि तु सर्वथा नित्याऽनित्यतया स्वीक्रियमाणे पुण्यपापयोरभोगो बन्धमोक्षयोरनुपपत्तिश्च, घटादेरपि क्षणिकाक्षणिकैकान्तेऽर्थक्रियाभावो वस्तुसत्ताबाधकः क्रमयौगपद्याभ्यामभिमतोनेकान्तश्चानुभवसिद्धो वस्तुस्वरूपस्थापको निराबाध इति प्रदर्श्य निरदेशि योगसाङ्ख्यबौद्धलक्षणवादिनाम् [६३]शकुन्तपोतन्यायादनेकान्ताभ्युपगन्तृत्वं यथास्थितागमनिर्देशप्रधानैरुन्मत्तगदितो विरोधश्चानेकान्तीयो यस्तं गुडनागरभेषजमेचकादिसकलविश्वविदितवस्तुदृष्टान्तबलेन निराकृत्य दुग्धदधिगोरसदृष्टान्तेन वस्तुव्रजस्य निरणैषुरुत्पादव्ययध्रौव्यरूपतां निरूपिताकलङ्कितज्ञानपुरुषसकलितागमाः ॥८॥

नवमे **कलिप्रशंसास्तवे**ऽल्पकाललभ्यफलत्वाद्दुर्लभकृपालाभात् श्राद्धश्रोतृसुधीवक्तृसंयोगाद्युगान्तरस्यापि बहूच्छृङ्खलकत्वात्कल्याणपरीक्षाप्रवणत्वात् निशादिषु दीपादिवद्दुर्लभत्वत्पादाब्जसेवालब्धेरपरयुगप्राप्तत्वद्दर्शनाधिगतेर्विषहरत्वच्छासनमणिप्राप्तेः कल्याणकरः काल उपश्लोकित इति कलिर्विद्वद्वृन्दवन्द्यैः ॥९॥

दशमेऽद्भुतस्तवे सप्रकाशं प्रकाशयामासुः शासनसतत्त्वप्रकाशका वीतरागाणां भगवतां स्वेश्वरप्रसत्त्यन्योन्याश्रयभिदां सहस्राक्षानिरीक्ष्यरूपवत्तां सहस्रजिह्वावर्णनीयगुणवत्तां लवसप्तमादिनिर्जरसन्देहापहारितामानन्दसुखसक्तिविरक्त्योरुपेक्षोपकारित्वयोः परमनिर्ग्रन्थसार्वभौमत्वयोरेकाधिकरणनिवेशं नारकामोदकत्वं शमरूपकृपाद्भुतत्वं चेत्यधिप्रकाशम् ॥१०॥

एकादशेऽ**चिन्त्यमहिमस्तवे**ऽचिन्त्यबुद्धिप्राग्भारा अचिन्त्यगुणगणवत्तां निजगदुररागे मुक्तिभोगमद्वेषे द्विषद्घातं, निर्जिगीषभीतभीतत्वे जगत्त्रयजयं, दानादानाभावेपि प्रभुतामौदासीन्येऽपि देहदानानुपार्ज्यसुकृतसङ्गतिं, भीमकान्तगुणवत्त्वेन साम्राज्यसाधनेऽपि विगतरागद्वेषतां, देवत्वेपि सकलगुणनिलयतां, महीयसां महत्तां महनीयतां महात्मनां गुणावहां यथार्थतया ॥११॥

द्वादशे **वैराग्यस्तवे** आजन्मवैराग्यवत्तां सुखकारणविषयकवैराग्यवत्तां विवेकशातनिबन्धनमोक्षस्थितवैराग्यतां नित्यविरक्ततां मरुन्नरेन्द्रश्र्युपभोगकालरत्यभावं सुखदुःखभवमोक्षविषयकौदासीन्यं परती-

थिकाभ्युपगताराध्याङ्गीकृतदुःखगर्भमोहगर्भानालीढज्ञानगर्भसगर्भतां सततसम्यगौदासीन्येपि विश्वविश्वोपकारितां चाविश्वकु: कोविदचक्रचूडामणयः ॥१२॥

त्रयोदशे **हेतुनिरासस्तवे** (विरोधस्तवे) अनाहूतः सहायोऽकारणो वत्सलोऽनभ्यर्थितः साधुसम्बन्धो बान्धवोऽनक्तः स्निग्धोऽमृष्ट उज्ज्वलोऽधौतोऽमलशीलोऽचण्डो वीरवृत्तिः शमी समवृत्तिः कर्मकुटिलकण्टककुट्टकोऽभवो महेशोऽगदो नारायणोऽराजसो ब्रह्मानुक्षितः फलोदग्रोऽनिपातो गरीयानसङ्कल्पितः कल्पद्रुमसङ्गो जनेशो निर्ममः कृपात्मा मध्यस्थो जगत्त्राताऽगोपितो रत्ननिधिरवृतः कल्पोऽचिन्त्यश्चिन्तामणिर्निखिलेपि जगति नान्यो वीतरागाद्भवतोऽपरः इति प्राचख्युः प्रख्यातख्यातयो महात्मनः ॥१३॥

चतुर्दशे **योगसिद्धिस्तवे** श्लथत्वेन मनोवाक्कायचेष्टासमाहारान्मनःशल्यवियोगः, करणानां संवरप्रचाराभावेन जयोऽष्टांगयोगस्य बाल्यात्सात्मीभावश्चिरपरिचितेषु विषयेषु विरागः, योगेऽदृष्टेपि लोलीभावो हिंसकानामुपकार आश्रितानामुपेक्षापकारिणि तथा रागो यथा न परेषामुपकारिणि सुख्यहं दुःख्यहं वेति ज्ञानाभावकृतसमाधिर्ध्याता ध्यानं ध्यानं ध्येयमित्येतत् त्रयस्यैक्यमिति च विलक्षणमहिमा जगद्गुरूणामेवेति जगदुः सूरयः ॥१४॥

पञ्चदशे **भक्तिस्तवे** उदात्तशान्तमुद्रया जगत्त्रयीजयस्त्वदनङ्गीकारः चिन्तामणिच्यवं सुधावैयर्थ्यं करोति विपर्यस्तमतीनां, त्वयि यो धारयति रूक्षां दृष्टिं तं न चेदन्तरा तत्रभवदुपदिष्टा कृपा स्यादवक्ष्यत् साक्षाद्भूय कृशानुः भस्मसात्करोन्विति, त्वदविरुद्धशासनापरहिंसाद्यहितकर्मपथोदेशप्रवणशासनयोः साम्यं स्यात्तेषामेव येषाममृतविषयोस्तत्, त्वदपलापिनामनेडमूकता श्रेयस्करी, मन्दयायिताया उन्मार्गप्रवृत्तस्य श्रेयस्त्वात्, तत्रभवच्छासनामृतरससिक्तानां नमस्कार्यता, त्वच्चरणपूता भूरपि भव्यभावुकलम्भयित्रीति नमोऽस्तु [६४]तस्यायपि, त्वद्गुणमकरन्दपानलम्पटत्वेन प्रशस्तं मे जनुर्ज्ञानादिधनलब्धा कृतकृत्यश्चास्म्यहमिति भक्तिविस्मितमानसा मीमांसितवन्तो मीमांसामांसलम् ॥१५॥

षोडशे **आत्मगर्हास्तवे**ऽविगर्हितात्मानः समाहितात्मनां स्मरणीयां समाचख्युरेकतः परमगुरुप्रणीतप्रवचनपीयूषपानोद्गता परमपथप्रवीणतान्यतश्चानादिकालीना रागद्वेषावेगजाता मूर्छा, रागगरलमूर्छितानामवाच्यकर्मकारिता, क्षणं सक्तो मुक्तः क्रुद्धः क्षमीत्यसाधारणा कारिता कपिचेष्टा मोहमदिरया, प्राप्यापि बोधिं मनोवाक्कायदुश्चेष्टान्वितः त्वच्छरणगतोऽप्यभिभूये मोहादिभिरपहारेण दुर्लभलाभरत्नत्रितयस्य, त्वमेव तारको मम इति लग्नोऽस्मि भवत्पादयोस्त्वप्रसादलब्धेयती भूमिमयेदानीं मोपेक्षिथाः, कृपापरस्त्वं पात्रं चासाधारणं कृपाया अहं, त्वमतो भव युक्तानुष्ठानप्रेरक इति ॥१६॥

सप्तदशे **शरणस्तवे** कृतस्वकृतदुष्कृतगर्हासुकृतानुमोदतः शरणं यामि, भवतु मिथ्यादुष्कृतं

मनोवाक्कायजानां कृतादिभेदानां दुष्कृतानामपुनःक्रियान्वितं रत्नत्रितयगोचरमनुमन्येऽहं सुकृतमर्हदादीनामर्हत्त्वादिकमनुमोदयामि, त्वां त्वत्फलभूतान् सिद्धाँस्त्वच्छासनरतान् मुनींस्त्वच्छासनं च शरणं प्रपद्ये, सर्वान् सत्त्वान् क्षमयामि क्षाम्यन्तु च तेऽस्तु च मैत्री तेषु आपरमपदप्राप्तेर्भवत्र शरणं ममेति तेनुः शरणक्रियामतथामवितथामवितथवादाः ॥१७॥

अष्टादशे **कठोरस्तवे** शेषापरदेववैलक्षण्यं क्रोधलोभभयाक्रान्तजगद्वैलक्षण्यमेव प्रभोर्लक्षणं कृतलक्षणा निरचैषुः कृतलक्षणतया परं नैतत्संसारकाचकामलिपरितानामसुमतामायाति यथार्हं श्रद्धानगोचरं विना सम्यक्त्वाञ्जनम् ॥१८॥

एकोनविंशे **आज्ञास्तवे** पालनमेवाज्ञाया भगवद्ध्यानं निःश्रेयसकरं निग्रहानुग्रहकर्तॄणां परेषां वर्धिन्येव संसारारण्यस्याज्ञा, विगतरागाणामाराधनम् अचिन्त्यमण्यादितो भवत्येवाभीष्टदं, सपर्याया अपि पराज्ञाराधना, तदाराधनविराधननिबन्धनत्वान्निर्वाणानिर्वाणयोः, सा चाश्रवसंवरयोर्हेयोपादेयतारूपैव, तदाराधकाश्च निर्वाणपथनिभृता अभूवन् भवन्ति भविष्यन्ति ॥१९॥

विंशे **आशीःस्तवे** च त्वत्पादरजःकणा निवसन्तां मूर्ध्नि मम दृशौ क्षालयेतां मलमनर्हेक्षणभवं, लुठनैरस्तु किणावलिः प्रायश्चित्तमसेव्यप्रणामस्य, रोमाञ्चकण्टका असद्दर्शनवासनां तुदन्तु, त्वदास्यपीयूषपानादस्तु मदीयलोचनाम्भोजानां निर्निमेषता, नेत्रे त्वदीयवदनलासिनी, करौ त्वदुपास्तितत्परौ, श्रोत्रे त्वद्गुणग्रहणपरे भवतः सदा, स्वस्त्यस्त्वेतस्यै वाण्यै या तत्रभवद्गुणावगाहप्रत्यग्रा ओमिति स्वीक्रियस्व यद्दासः प्रेष्यः सेवकः किङ्करोऽहं ते इति, इत्येवमनूनप्रतिभाप्राग्भारवर्णनातिगं जगद्गुरुं वर्णयामासुस्तत्रभवन्तोऽत्रेति विज्ञायते ॥ २० ॥

एतत्पर्यवसाने यदुत न लब्धचरा आदर्शा अस्यानेके । न च शुद्धाः परमावश्यकं श्रद्धापीयूषपीनानां श्राद्धानामेतस्य पठनमिति "मुद्रणोपक्रमोद्भव आगसि मिथ्यादुष्कृतं प्रार्थयते सकलश्रमणसङ्घसेवकः **आनन्दाब्धिरस्तु** च लेखकपाठकमुद्रापकाध्येतॄणां श्रेयो निःश्रेयसपर्यवसानं बोधिबीजावाप्तिद्वारेति ।

सिन्ध्वृत्वङ्केन्दुमानेऽब्दे, (१९६७) पौषे मास्यसिते दले ।  
पञ्चम्यां सुरतद्रङ्गे, श्रेयसेऽस्तु लिपीकृतः ॥

## पूज्यागमोद्धारकश्रीलिखितप्रस्तावना-
### विषमपदार्थसूचिका
# आनन्द-लहरी-टिप्पणी
### २ श्रीवीतराग- स्तोत्रोपक्रमः

१. सकलम् ऐहिकम् आमुष्मिकं च हितं कुर्वन्ति ये ते इति व्युत्पत्तिरत्रावसेया, विशेषणं चेदं ग्रंथतते बोध्यम् ।

२. 'शब्द'कोशाधारेण 'नाग' शब्दः श्रेष्ठार्थवाची अप्यस्तीत्यतोऽत्र 'पुन्नाग' शब्दस्य पुरुषश्रेष्ठेत्यर्थोऽवगम्यः ।

३. आध्यात्मिकहितसाधनप्रगुणानामेव ग्रन्थानां हितावहत्वद्योतनायेदं विशेषणमुपन्यस्तमस्ति ।

४. असौष्ठवमित्यर्थः ।

५. तत एव=आगमस्तोमावगमादेव, इदं हि पदं अग्रेतन 'तथ्ये............वतारः' पदेन सहान्वेयम् ।

६. यतः=यस्माद्धेतोः ।

७. अत्र 'चावाप्त' पदस्य समस्तवाक्यान्त्यभागगत 'केवल'-पदेन सह सम्बन्धः ।

८. प्रभूता=अतिप्रमाणा या प्रभुता=तीर्थकृन्नामकर्मविपाकजन्यैश्वर्यमहिमारूपा, तस्याः आस्पदरूपं यत् केवलं=केवलज्ञानमिति सङ्गतिरत्र कार्या ।

९. प्रकटश्चासौ प्रभावस्तेन अति=अत्यर्थं अस्तमिताः कुमतैः तताः अतनवो ये कर्मणां प्रवेकानां=प्रवाहानां विस्तारकाः ये प्रवादाः=मतान्तराणि यैरिति विग्रहोऽर्थानुसारी बोध्यः ।

१०. साहजिकतथाभव्यत्वादिवशेनोदयमापन्नस्यापि गणभृत्संज्ञकर्मण उदयप्रक्षिततत्वमत्र निदर्श्य पूज्यागमोद्धारकश्रीपादाः सकलद्वादशाङ्गोपनिषद्भूतत्रिपदीद्वाराऽऽगमरचनाया कुटुम्बतारणभावनालब्धजन्मगणभृत्कर्मोपवृंहितत्वं व्यञ्जितवन्तः ।

११. अनन्यसाधारणा निश्शेषवस्तुव्रजे अवस्थिता ये अबाध्याः धर्माः तेषां दर्शने पटीयः=अतिनिपुणं यत् वचस्त्रितयं, तस्य रत्नत्रयसमा या अखंडज्योतिस्तद्द्वारेणेतिव्युत्पत्तिरर्थानुसारेणात्र विज्ञेया ।

१२. अत्र च श्रीमद्गिरागमावतारैः सूरिभिः शब्दप्रयोगवैशिष्ट्येनाद्भुतार्थनिर्देशः कृतोऽस्ति, तथाहिः—

अपश्चिमः=नास्ति पश्चिमः यस्मात् इति व्युत्पत्या चरम इत्यर्थः अतिशयानां यत् साम्राज्यं तस्य सार्वभौमः=सर्वदिगन्तव्यापिसाम्राज्यपतिः=चक्री, अर्थात् धर्मचक्री=तीर्थंकर इत्यर्थः ।

एवं च अपश्चिमाश्चसौ अतिशयसाम्राज्यसार्वभौमश्चेति कर्मधारयेण 'चरमतीर्थंकरे'-त्यर्थाभिव्यक्तिरत्र शब्दवैशिष्ट्येन विहिता ।

१४. रोहणगिरिः खलु रत्नानां विविधजातिगुणसम्पन्नानां सुमहर्घाणां प्रभवभूमिरभिगीयते, तस्य चात्र चिन्तामणिसदृशदेवाधिष्ठित-सप्रभाव-महिमभ्राजिरत्नस्य प्रभवत्वेन निर्देशविधया पूज्याऽऽगम-नदीष्णाः एवं सूचयन्ति यद् श्रुतज्ञानाऽऽगमपठनपाठनाऽऽदि महत्त्वपूर्णशक्तिविकासे प्रयत्नं, ततश्च चमत्कारास्तु वामकरलीलायमानाश्चागमधरस्य । एवञ्च आगमानां सर्वातिशायिमहत्त्वं ख्यापितम् ।

१५. अत्र स्पष्टनामाऽनिर्देशेऽपि सन्दर्भसङ्गतिवशतः पूज्यपादश्रीदेवर्द्धिगणीनां परामर्शः ।
अथवा योगशास्त्राऽऽदिमताऽनुसारं 'श्रीस्कन्दिलाचार्यपादै'रपि पुस्तकारूढत्वं श्रुतस्य कारितमिति-प्रसिद्धपक्षान्तरस्यापि सङ्ग्रहार्थमनिर्दिष्टनाम्नैव 'पूज्यपादाः' इत्युल्लेखः कृतो भवेत् ।

१६. एतत्पदेन श्रुतस्य पुस्तकाऽऽरोहणप्रसङ्गे श्रुतधरगीतार्थसूरिपादानां सम्मीलनं पाश्चात्त्यानां पाठे शङ्का-शङ्कुव्यालोडनाऽक्षमत्वसूचकं ध्वनितम् ।

१७. तत्त्वज्ञानस्य या श्रीः तस्याः वलभी=वंशपंजररूपा छदिः तस्यां, अर्थात् श्रुतज्ञानस्य पुस्तकाऽऽरोहणभूमित्वेनैदंयुगीनभव्यानां श्रुतज्ञानाधाररूपा हि सा नगरी 'वलभी' पदेन सान्वर्थं व्यज्यते ।

१८. विशसितं=कर्त्तितम् प्रबलस्य कर्मबलस्य=कर्मसैन्यस्य केतनं=ध्वजः येनेति विग्रहः ।

१९. अर्हाणां=योग्यानां, एतेन गुर्वनुज्ञया धारणाऽऽदिशक्ति-परिणतिनैर्मल्य-विनीताऽऽदिगुणसम्पन्नानामेव पुस्तकानामुपयोगकरणेऽधिकृतिरिति व्यज्यते ।

२०. अर्हं=योग्यं, संयमानुकूलमिति यावत् ।

एतेन श्रुतज्ञानपठनादिव्याजेन गुर्वननुज्ञया मर्यादाविलोपेन वा मोहवृद्धिहेतुभूतसुन्दर-मोहक-रूपरागाऽऽदिमत्पदार्थानां ज्ञानोपकरणव्याजेनाऽपि ग्रहणं न हि युक्तिमदिति पूज्यपादाऽऽगममर्मज्ञसूरिपादाः सूचयन्ति ।

२१. श्रीमाँश्चासौ तत्त्वभूतानामर्थानां दीपने=स्वरूपप्रकाशने दीप्तः=तेजस्वी यः प्रदीपस्तस्योपमा यस्यैतादृशश्चासौ तत्त्वार्थश्चेति व्युत्पत्तिरर्थानुसारिणी अत्र सङ्गच्छनीया ।

२२. सर्वदा=सर्वकालम् आशासनव्यवस्थां प्रभवति योऽसौ इत्येतादृशार्थेऽत्र 'सार्वदिक' पदं विज्ञेयम् ।

२३. परमार्थस्य=मोक्षसाधनारूपस्य यः पंथाः=रत्नत्रयीसमाराधनलक्षणः तत्प्रधानमवधारणं=निश्चयात्मकसङ्कल्पनं येषां तैरिति विग्रहोऽत्र समूहनीयः ।

२४. 'नाऽभविष्यदि'-त्यस्याऽग्रेतन 'चक्षुरुद्घाटन'-मित्यनेन सहाऽन्वयो विज्ञेयः ।

२५. सकलजन्तुजातस्याऽसाधारणसातस्य वितरणे वित्तं=निपुणं, पारमार्थिकतत्त्वप्रधानं च यदसाधारणाचरणम्, तस्यावगमनमवबोधस्तद्रूपज्योतिरन्तरा इति पदसङ्गतिर्विज्ञेया ।

२६. दुष्षमासमये उद्भूताः अनेके वाचालाः ये कुतीर्थिकाः तैर्वाचालितं=मुखरीकृतं यत् दिगन्तरालं, तेना-

ऽनुपलभ्यः दिगवलोकः = प्रस्तुतमार्गसूचकदिशाया अवलोकः येषां तेषाम्, दिग्व्यामोहमूढानामित्यर्थः ।

२७. 'तत्' पदेन विवेकचक्षुषस्तदुद्घाटनस्य वा परामर्शो विज्ञेयः ।

२८. आरूढः = सततं सञ्जातः यः अनार्यजनानां प्रबलो हि आसङ्ग = परिचयाऽऽदिः, तेन जातः प्रबलश्चासौ अनार्याचारः, तस्य प्रभावो यस्मिन्निति मर्मार्थाऽनुसारं व्युत्पत्तिरूहनीयाऽत्र ।

२९. अनवगतः द्रव्य-भावाऽनुकम्पाप्रथने प्रत्यलः = समर्थः धर्ममार्गः यैः, तथा काम-स्नेह-दृष्टि रागरूप मदिरया उन्मत्तैः विहिता ये अनेकदुर्गमविघ्नाः = धर्माराधनान्तरायाः, त एव सरित्प्लवः = नदीप्रवाहः, तस्योत्तरणायाधिगतं यत् शमसाम्राज्यं तस्य साधने सावधानं = तत्परं यत् सर्वसङ्गपरित्यागमहा-व्रताऽङ्गीकाराऽऽदि, तस्य विधानं = पालनादि इत्यन्वयगर्भः समासोऽत्र सम्यग् संगमनीयः ।

३०. आरंभपरिग्रहाऽऽसक्ताः, प्रबलमोहमिथ्यात्वमदिराविह्वलान्तःकरणाः, अविरतिराक्षसीजग्धजीवस्वरूपरमणतासतत्त्वाः इत्येवंभूताः मुनय इति विशेषणत्रयसङ्गतिः सम्यक् योजनीया ।

३१. 'किञ्जल्क' पदेन पद्मपरागः केशराऽपरपर्यायोऽत्र विज्ञेयः ।

३२. द्युतेः = तेजसः कोशः = निधिरित्येवं सूर्यार्थवाचीदं पदं बोध्यम् ।

३३. हुंडा = निकृष्टा याऽवसर्पिणी तत्सत्को यः पञ्चमाऽरः स एव रजनी, तस्यां रजनीचरवदाऽऽचरमाणाश्च, दुष्टम्लेच्छाऽऽदिभूमिपाश्च इत्येतादृशाः इत्यन्वयः । एतद्धि 'यत्याऽऽभास' पदविशेषणं ज्ञेयम् ।

३४. दर्शनान्तरीयपूजापद्धत्यनुसारेण देवपूजायां ढौकितस्य, नैवेद्यादेः पूजाद्रव्यस्य वा प्रसादरूपेण भक्तेभ्यः प्रदीयमानं हि द्रव्यं 'शेषा' पदव्यवहार्यमत्र निर्दिश्य पूज्यवर्यैः कालाऽऽदिविषमाऽनुभावतः पुण्याऽपकर्षाद्वा नष्टप्रायं बहुप्रमाणमपि श्रुतमत्यल्पतरप्रमाणेऽवशिष्टमपि आराधकमुमुक्षूणामाराधकभाववृद्धयर्थमतीवोपयोगि, अत एव च यदवशिष्टं तदपि 'शेषा'वत् बहुमानार्हमिति ध्वनितम् ।

३५. शोभाप्रकर्षवाची अयं हि शब्दोऽत्र गमनीयः ।

३६. एतद्धि असमा = असाधारणा प्रभावना यत्रेति विगृह्य 'उद्भावनायाः' विशेषणमवबोध्यम् ।

३७. ऐदंयुगीनजनानामिति शेषः ।

३८. मुग्धजनैरिति शेषः ।

३९. यथावदस्पष्टलक्ष्यवतामुदरमात्रपूर्त्तिकृतां निरपेक्षानां ध्येयशून्यानां हि लोकानां परामर्शोऽत्र 'तुन्दपरिमृज' पदेन मार्मिकरूपेण विहितोऽस्ति ।

४०. विविधरसमयनानाभोजनवस्तुविरचनप्रवणैः-जनप्रशंसास्पृहालुभिश्च जनैः जयपताकाग्रहणमिवाभिमन्यते बाहुल्येनैतर्हितनयुगे विविधभोजनसमारंभेष्वेव कृतार्थताभासः ।

४१. सत्त्व-धृति-साहसाऽऽदिसम्पाद्ययशस लोकैषणानुसारमर्थव्ययसाध्यविविधांग्लदेशीयवादित्रवादनशूरैस्समहर्घत्वमधुना बहुलतया पामरजनैर्विहितमस्तीत्यतोऽत्र तत् कटाक्षितं पूज्यपादैरत्र ।

४२. मतिवैभवेन स्वपरोपकारकृतौ शासनप्रोद्भासनाया प्रवृत्तिं विहाय चक्षुर्मोहकविविधाऽशास्त्रीयदृश्य-

ग्रथनसंयुतैश्चन्द्रोदयाऽऽदिविरचनैर्मौलिकाऽऽचारनिष्ठताऽपसर्पणस्याऽसदनुबन्धिविरूपविकृतिमूलत्व-मेतद्विशेषणेनोट्टङ्कितं श्रीमद्भिः ।

४३. वीतरागप्रभूणां भक्तिमहोत्सवेषु विविधगेयपूजासुन्दरकार्यक्रमोपपत्तिमात्रमेवाभिलक्ष्यते, इत्येतद्धि न वर्यं, जिनभक्तेः महार्थत्वात्, शासनानुरागदृढमूलतासम्पादनायैतत् विशेषणं सूचकमुपन्यस्तमस्ति ।

४४. परम्=उत्कृष्टं, अनिष्टमिति शेषः ।

४५. अविगीतः= अनिन्दितश्चासौ सिद्धान्तश्च, तस्य प्रसाधने=विविधपठनपाठनाऽऽदिकार्यक्षमतारूपे, पटु=समर्थं, यत् ज्ञानं, तस्य दिवाकराणां श्रीमतां गणभृत्प्रभृतीनां सकलं यत् वाङ्मयं, तस्य वितानस्य=समूहस्य विस्तारणाय लब्धः अवतारः येनेति विग्रहं विवक्ष्य श्रीदेवचन्द्रश्रेष्ठिनोऽपूर्वश्रुत-भक्तिरूहनीया सुज्ञविवेकिभिः ।

४६. स्ववप्ता=स्वजनक इत्यर्थः ।

४७. सूचयित्वेत्यर्थः ।

४८. निर्वीराणां=निर्वंशानां धनस्य कररूपेण राजाऽऽदेयभागस्य मोचनं=मुत्कलनं, तथा अष्टादशदेशेषु य अमारिपटह, विहितौ च तौ उपदेशद्वारा निर्वीराधनमोचनाष्टादशदेशामारिपटहौ चेति कर्मधारयं कृत्वा ताभ्यां लब्धं आकल्पस्थायियशःशरीरं यैरिति व्युत्पत्तिरत्र गमनीया ।

४९. सार्धत्रिकोटिमितग्रन्थानां ग्रथनेन लक्षितं=अनुमापितं यत् सर्वज्ञावतारत्वं तेन वितीर्णं कलिकाल-सर्वज्ञबिरुदं येभ्य इति विग्रहः ।

५०. 'ग्रन्थ' पदेनाऽत्र रचनार्थक'ग्रथि'धातोर्मौलमर्थं लक्ष्यीकृत्य रचनार्थं विवक्ष्य 'श्लोक' रूपार्थस्य च लक्ष-णयोपपत्तिः कार्या, ततश्चात्र 'ग्रन्थ' पदस्य श्लोकार्थकत्वं ज्ञेयम् ।

५१. अनवद्येन व्याकरण-काव्य-कोश-छन्दरूपविद्याचतुष्टयसम्बन्धिनवशास्त्ररचनारूपेण चातुर्विद्यविधानेन-ख्यातः ब्रह्मातिगप्रभावो येषां ते, तथाऽष्टादशदेशाधिपतेः कुमारपालक्ष्मापालस्य बोधनेन= धर्ममार्ग-गामित्वकरणेन स्मारितः सातिशयः मुनिगणः=अवध्याऽऽदिज्ञानसम्पन्नमहर्षिगणः यैरिति समस्य द्वन्द्वं कृत्वाऽर्थसङ्गतिःकार्या ।

५२. एनम्=प्रकृतं श्रीवीतरागस्तोत्राख्यं ग्रन्थमिति सन्दर्भसङ्गत्योहनीयम् ।

५३. पुण्यतमाः=संस्कारधनसम्पन्नत्वेन पवित्रतमाः ये जनाः तेषां निवासेन तिरस्कृतः विबुधानां=देवानां आलयः=भूमिः यः विबुधालयः=स्वर्गः येनेति व्युत्पत्तिरत्र करणीया ।

५४. परस्परं यः विरोधः स एव यः दुर्गन्ध, तं बिभ्रती या वाणी तस्या वाचकाः=भाषकाः सुरगुरवः= नास्तिकाः, तेषां तिरस्कारिणा । भारतीप्राग्भारेण भूषितं यत् वदनं तदेव मलयः तस्मात् निःसृता अवि-रुद्धा या परमाऽऽगमानाम् उदितिः तस्य श्रवणस्य भाग्यमिति व्युत्पत्तिरर्थानुसारिणी कार्या ।

५५. अन्यदर्शनीया ह्येवमामनन्ति यत्:-भूतचतुष्टयवादिनास्तिकमतं त्रिबुधगुरुणा सुरगुरुणा बृहस्पतिना जगद्व्यामोहाय प्रकटितमित्यतः नास्तिकानां सुरगुरुपदेन व्याजस्तुतिरूपसंज्ञाऽत्र निर्दिष्टा विज्ञेया ।

५६. विज्ञेय मित्यर्थः ।

५७. श्रीहेमचन्द्रसूरीणामिति शेषः ।

५८. 'अभ्यस्ये'-ति पदस्याऽग्रे 'प्रकाशानां द्वात्रिंशं' इति पदेन सह सम्बन्धो योजनीयः ।

५९. दन्तशोधनं ( दातण ) अन्तःकरणशोधनं च निर्दिश्याऽत्र पूज्यपादैः प्रस्तुतग्रन्थस्वाध्यायस्याऽति महत्त्वं व्यञ्जितमस्ति ।

६०. प्रकाशस्योज्ज्वल-दीप्तिमत्त्वाऽऽदिधर्मकदम्बं प्रस्तुतग्रन्थेऽभ्यासपाठाऽऽदिना संगमय्य ग्रन्थाऽवान्तरभागरूपप्रकाशविंशतेर्यथार्थत्वं सङ्गमनीयम् ।

६१. 'शोभा'- मिति पदाऽध्याहारेण 'व्यावर्णयन्तः' इति पदेन सहाऽस्य सम्बन्धसङ्गतिः कार्या ।

६२. वाद-प्रतिवादे वादिप्रश्नस्य समाधानरूपे उत्तरे स्वभाववादाऽऽश्रयणं तु निरर्थकमेवेति व्यन्यतेऽत्र ।

६३. यथाह्यपारपारावारनीरधौ प्रवहत्पोतमध्यतः कश्चिच्छकुन्तः = पक्षी उड्डीयेतस्ततो गच्छेदपि, परं कुत्राप्यवस्थितिहेतुरूपं नगं तरुं वाऽलभमानोऽगतिकतया वहमानं तमेव पोतमाश्रयेत्, उड्डीयोड्डीय तस्य च तत्रैवाऽऽगमनं सहजसिद्धमेवेति निर्दिश्य तीर्थान्तरीयाणां प्रावादुकानामभिनिवेशवतामपि वादिनामभिमतनिजवस्तुनिरूपणेऽनाभोगतोऽप्यनेकान्ताश्रयणं शब्दान्तरतोऽपि करणीयमापतत्येवेति सूचयित्वा श्रीमद्भिः सूरिवर्यैः स्याद्वादस्य सार्वतन्त्रिकत्वं निर्दिष्टम् ।

६४. 'तस्यै अपि' इति सन्धिच्छेदो ह्यत्र विज्ञेयः ।

६५. मुद्रणस्य उपक्रमे उद्भवः यस्येति विगृह्य प्रकृत मुद्रणे जातस्याशुध्याऽऽदिदोषरूपस्य 'आगमः' निर्देशः कृतः इति विज्ञेयमत्र परमार्थाधीधनैः विद्वद्भिः ।

## — श्रीश्रुतज्ञानमहत्ता —

ज्ञानेषु पञ्चसु पुनः श्रुतमेकमेव,
व्याख्याति रूपममलं स्वपराश्रयाङ्कम् ।
मूकानि शेषमतिमुख्यविबोधनानि,
स्वेषां न रूपममलं वदितुं क्षमाणि ॥

—पूज्याऽऽगमोद्धारकश्रीविरचित—
"श्रीजैनगीता" अ.२६ श्लो.६३

श्री आगमोद्धारकालेखितप्रस्तावनासंग्रहस्वरूपे

# श्री आनन्दरत्नाकरे

## तृतीयं रत्नं

## स्याद्वादभाषा-प्रस्तावना

नमोऽर्हद्भ्यः ।

[१]अवधेयमिदमवधानधीधनैरेतत्तावद्यदुत प्रमाणाधीनैव [२]मेयसिद्धिस्ततः सम्यग्ज्ञानं निःश्रेयसं च, ऊचुश्चात एव वाचकवर्याः '**प्रमाणनयैरधिगम**' इत्यादि, प्रमाणनिरूपणप्रत्यला वाङ्मयवीचिश्चासाधारणा वर्त्तत एवाभियुक्ततमाचार्यप्रणीता, नच सा [३]सुकुमारशेमुषीकाणामन्तिषदामुपकारकारिण्यैदंयुगीनानां तथाविधावतारकारकग्रन्थमृते, तत्राऽपि ये विस्तृततमा अनेकत्रानुप्रासाद्यलङ्कृताः कठिनतरवाक्यावबोधाः समासप्रचुराः [४]प्रसक्तानुप्रसक्ताख्यानख्यातमहिमानो मिथ्यात्वध्वंसप्रयोजना वादपरम्परानिबद्धलक्ष्याः सन्ति शतशो ग्रन्थास्तेऽपि न बालानां [५]स्वसमयमात्रावगमहृदयानामुपकर्त्तारो, योग्यश्चायमेवातस्तेषां ग्रन्थ इति फलेग्रहिर्मुद्रणादिप्रयासोऽस्यात्रस्य ।

अत्र च प्रमाणे प्रत्यक्षपरोक्षाख्ये आख्याय, [६]व्युत्पादयितुं सप्रभेदे यथार्हविस्तरे, प्रमाणांशभूतान् नयान् विकलादेशतया प्रसिद्धान् [७]निखिलदर्शनागमवचनमूलभूतान्प्रतिपाद्य च, जीवादितत्त्वसप्तकमपि निःश्रेयसनिदानसम्यक्त्वविषयतया यथावत् समाचख्युः ख्यातयशसः । श्रीशुभविजयगणयः कदा कतमं च भूमण्डलं मण्डयामासुः पावनतमैश्चरणैः पूज्याः स्वकीयैरिति यथार्थतया न वेविद्ये [८]तदितिहासेतिवृत्तविरलकालोत्पन्नोऽहं, तथाप्यनुमीयते एतावद्यदुत वैक्रमीयसप्तदशशती [९]संवदां [१०]तदीयवर्त्तनाहेतुभूता, यतः श्रीमत्तपोगणगगनमणिश्रीमद्विजयसेनसूरिपादप्रसादित**प्रश्नोत्तराणां** सङ्ग्राहकाः श्रीमद्धीरसूरीश्वरचरणसरोजचञ्चरीकायमाणा एते, [११]पूज्याश्चोक्तशतीना इति निर्विवादं पट्टावली-[१२]पट्टक-शिलालेखावलोकनादिना निर्णीयतेऽवसीयते च [१३]तद्विहारस्य गुर्जरत्रायां धात्र्यां [१४]भावात्तद्भावित्वं ।

चक्रार्णैश्च पूज्यैरेनं ग्रन्थं प्रान्तव्युत्पादिता जीवादयः पदार्थो नित्यानित्यत्वादिधर्मसंवलिता ज्ञानादिधर्मभिन्नाऽभिन्ना [१५]भाष्यतया अभिप्रेता इति यथार्थाभिधाऽस्य '**स्याद्वादभाषे**'ति, प्रमाणादिनिरूपणं तु तदङ्गमिति तदपि [१६]तथैवाद्दतं गणिभिः, स्याद्वादानुगतं प्रमाणादि वा निर्णेयतयाभिप्रेतमत्रात्रभवद्भिरिति तथाऽभिधाऽस्य ।

तत्रभवद्भिः के के कृता ग्रन्था ? इति न ज्ञायते इयत्ता, परं **प्रश्नोत्तरसङ्ग्रहावसाने काव्यकल्पलतामकरन्द-स्याद्वादभाषेति** प्रत्यक्षोपलब्धेस्तैस्त्रितयं ग्रन्थानां प्रतेने; १ **प्रश्नोत्तरसमुच्चयः (सेनप्रश्नापराभिधानः)** २ **काव्यकल्पलतामकरन्दः** ३ **स्याद्वादभाषेति** च, पश्चाच्च [१७]प्रश्नोत्तरादर्भविष्यन् विहिताः कदाचिद्ग्रन्थाः परं न ते ज्ञायन्ते तदुल्लेखादिदर्शनाऽभावात्, दुर्लभाश्च प्रतयोऽधुनानेककारणत इति तु निर्णीतं प्रस्तावनाकर्तृभिरनेकैस्तथापि भविष्यन्ति सुलभाः प्रतयस्तदवलोकनानि च श्रेष्ठिवर्यदेवचन्द्रलालभ्रातृनियमितपुस्तकोद्धारकोशादित्याशासे **सागरान्त आनन्दा**भिधानोहं श्रमणसङ्घकृपाभिलाषुकः, प्रार्थये च प्रमार्ज्य प्रमादजातामशुद्धिम् वाचयन्त्वेतद् ग्रन्थरत्नम् इति वाचनीयवाचनानिबद्धकक्षान् सज्जनान्, बद्धाञ्जलिश्च तेभ्योऽयं ये ज्ञापयेरन्नशुद्धिं मदीयां मिथ्यादुष्कृतमुररीकृत्याशुद्धिसत्कं याचे चात्मना सर्वान् यत् यथायथमवबुध्यात्रत्यं पदार्थजातं श्रद्दधातु सज्जनगणः, आचरतु च यथोपदिष्टमागमानुरागरक्तो [१८]निर्द्वन्द्वपदाप्तय इति ॥

भृगुकच्छे रचिता वै,
आनन्दयुतेन सागरेण मया ।
माघे सुपौर्णमास्याम्,
ऋषि-रस-नव-चन्द्र-हायने (१९६७) शुभदा ॥१॥

## जैनागम-प्रधानता

हा ! हा ! भीषणकाल एष न यतः सत्यार्थदब्धौ रताः,
सूर्याद्याः प्रचुराश्च पुस्तकपरावर्त्तोद्यताः वादिनः ।
भूमीशा विबुधाश्च पक्षपतिता दाक्षिण्यलोभोद्यता,
अल्पा मार्गरतास्तथापि जयवानाप्तागमः शुद्धवाक् ॥

पू० आगमोद्धाक श्री रचित—
श्री आगम महिमा श्लो० २३९

# पूज्यागमोद्धारकश्रीलिखितप्रस्तावना-
## विषमपदार्थसूचिका
# आनन्द-लहरी-टिप्पणी
## ३-श्रीस्याद्वादभाषाप्रस्तावना

१. धारणाशक्तिविशेषरूपा-ह्यवधानधीः, निर्णयकारिका ह्येषा गीयते मतिज्ञानावान्तरभेदरूपेति बोध्यमत्र समीक्षावद्भिः।

२. ततः=प्रमाणद्वारा जायमानपदार्थज्ञानादित्यर्थः।

३. दुरवगाहदुरूहतर्कजालसञ्चरणादिष्वसामर्थ्यरूपमत्र बुद्धेः सुकुमारत्वमत्र विज्ञेयम्।

४. प्रसक्तं=विषयानुगतं, अनुप्रसक्तं=प्रकृतोपयोगित्वेन परम्परयाऽपि विषयानुगतम् एतयोराख्यानेन= निरुपणेन ख्यातः महिमा एकग्रन्थसज्ज्ञानप्रयासेन नैकपदार्थप्रचुरतरज्ञानसम्पन्नताकरणरूपः येषां ते इति व्युत्पत्तिरर्थानुसारं विज्ञेयाऽत्र।

५. स्वस्य=अभिमतस्य, जिनोक्तस्येति यावत् समयस्य=सिद्धान्तस्य अवगमे=ज्ञाने हृदयं=चेतः तत्परता-रूपं येषां तेषामिति समासेन स्वमतजिज्ञासूनामिति भावः।

६. सप्रभेदे यथार्हं=बालजीवधारणाशक्ति-अनुरूपं विस्तरः ययोस्ते।
एतद्धि 'प्रमाणे' इत्यस्य विशेषणम्, तयोः व्युत्पत्तिः=स्पष्टबोधं कारयितुं 'नयान् प्रतिपाद्ये'-त्यग्रे सम्बन्धो ज्ञेयः।

७. निखिलानां=समस्तानां दर्शनानामागम-वचनानां=मूलभूतशास्त्रवाक्याणां मूलभूतान् इतिव्युत्पादनीय-मत्र, विशेषणं चैतत् "नयान्" इत्यस्य ज्ञेयम्।

८. 'इति ह आस=इति' व्युत्पत्त्या एवमत्र पुरा आसीदिति आप्ताभिजनक्रमागततत्तद्व्यक्तिस्थलविशेषाणां घटनादिकानाञ्च मौखिकवार्त्ताणां सङ्कलनम्=इतिहासः। भिन्नभिन्नदेशकालेषु घटितघटनानां केनापि प्रकारेण लिपिबद्धरूपतया सङ्कलनम्=इतिवृत्तम्।
एते विरले यत्र काले तस्मिन् काले उत्पन्नः इति व्युत्पत्तिमर्थसङ्गतिद्वारा कृत्वा दुर्लभैतिह्य-सामग्रीको ह्ययं काल इति ध्वननाऽत्र पूज्यवर्यैः विहिता।

९. 'संवत्' शब्दोहि वर्षवाची अव्ययश्च तथाप्यत्र "प्रकृतिवदनुकरण" मिति न्यायेन षष्ठीबहुवचनं सङ्ग-मनीयम्।

१०. 'वर्त्तना' शब्दो ह्यत्रास्तित्व-विद्यमानतार्थपरकोऽ-वबोध्यः।

११. बहुवचनान्तपूज्यशब्देनात्र मुख्यतः **श्रीविजयसेनसूरीश्वराणां** गौणभावेन च **'विजयहीरसूरीश्वराणा'**मपि परामर्शो विज्ञेयः ॥

१२. 'पट्टक'शब्देनाऽत्र प्राचीनभाण्डागारेष्विदानीमुपलभ्यमानानां साधुमर्यादापट्टक-विहारपट्टक-क्षेत्रादेशमर्यादापट्टकादीनां सङ्केतः पूज्यवर्यैः विहितोऽस्ति ।

१३. अत्र 'तत्' पदेन ग्रंथकर्त्तृणां **श्रीशुभविजयानां** परामर्शः ।

१४. 'तत्' पदेनैतत्र गूर्जरदेशस्य सूचनमवगन्तव्यं प्रेक्षावद्भिः विद्वद्भिः ।

१५. अत्र भाष्यशब्दप्रयोगः नहि ग्रन्थव्याख्याविशेषार्थपरकः, किन्तु भाषितुं=वदितुं योग्याः-शक्या इति विगृह्य उच्चारणार्हत्वरुपार्थे'भाष्यता'शब्दप्रयोगोऽवबोध्यः सम्यगधिगतशास्त्रतत्त्वमर्मज्ञैः समीक्षावद्भिः विद्वद्भिः ।

१६. पदार्थानां भाषाप्रयोगार्हत्वेनेति विज्ञेयम् ।

१७. श्रीसेनप्रश्नापराह्वात् **प्रश्नोत्तरसमुच्चयाख्यग्रन्थादितिभावः** ।

१८. सुखदुःख-शीतोष्ण-प्रियाप्रियादिद्वन्द्वैः दुःखहेतुभिः मुक्तस्य मोक्षापरपर्यायस्य परमपदस्य सूचकमिदं पदम् ।

★ ★ ★

## जिनशासनना आराधकनी
## उच्च मनोदशा

"जैना ब्रुवन्ति जगती–सकलाऽसुमत्सु,
मैत्र्या यदत्र भुवने दुरितं न कोऽपि ।
भो ! सन्दधातु यदि चाकृत प्राक् तथापि,
धर्मात् प्रणाश्य फलवेदनभाक् तु माऽस्तु ॥
भावानुकम्पनयुता मनसा स्पृहन्ते,
यन्मुच्यतां जगदिदं सकलाघभारात् ।
नास्तीह यद्यपि समस्त जनस्य मुक्तिः,
सम्बन्धिजीवनपरोक्तिरिवेह योग्यम् ॥"

—पू० ध्यानस्थ स्व० आगममर्मज्ञ
आगमोद्धारकश्री रचित
जैन गीता अ० १३ श्लोक २९--३०

श्री आगमोद्धारकालेखितप्रस्तावनासंग्रहस्वरूपे

# श्री आनन्दरत्नाकरे

## चतुर्थं रत्नं

## पाक्षिकसूत्रस्योपक्रमः

विदितपूर्वमेतद्विदुषां सुतरां यदुत प्रथमान्तिमतीर्थानुसारिणां मुनिवर्याणां नियतैव कल्पमर्यादा, कल्पश्चाचेलक्यादि प्रभेदेन तत्र तत्र तत्रभवद्भिः सूरिप्रवरैः प्रतिपाद्यत एव दशधा, [1]स्थितिकल्पिकाश्चात एव मुनिपुङ्गवाः, एतादृशः सर्वेप्येत आचेलक्यादयः [2]कल्पास्तृतीयौषधकल्पा एव सामान्येन, तथापि [3]साम्य-[4]तत्प्ररूपकचतुर्विंशत्यात्मस्तव-तद्दर्शकगुणवत्प्रतिपत्ति-स्वीकृतानवद्यवृत्तिसावद्यनिवृत्तिविषयकातिचारालोचनादिमिथ्यादुष्कृतदाना--शुद्धदूषणदूषकायोत्सर्गावर्गानवाप्ता --वाप्तगुणस्थैर्यात्मकावश्यविधेयावश्यकानन्यस्वरूपः प्रतिक्रमणकल्पो विशेषेण [5]तथाविधोऽत एव चापश्चिमतीर्थपतिशासनोल्लेखे **'सप्रतिक्रमणो धर्म'** इति तत्र तत्र गणभृत्पादै रविकलसाधनसामग्रीसावधानानगारशिरोमणिवर्णनादौ स्पष्टतरं वर्ण्यते ।

तथा च निष्प्रतिक्रमणाः **श्रीमद्वीरजिनपतिशासन**बहिर्भूता एवावबोद्धव्याः, सङ्गिरन्ते च केचिदनवद्यपारमर्षतत्त्वावगमशून्या यदुत—"प्रतिक्रमणं तावत्प्रमत्तान्तानामेव, "**समणेण सावएण ये**" त्याद्यागमोऽपि [7]तादृशश्रमणानामेव तत्कर्त्तव्यताख्यायकतयानुगमनीयः, अन्यथा तु "[8]**नो सन्त्यावश्यकानि षडि**" ति वचनमा[9]वश्यद्विरोधं, बाधकमपि चावश्यकाकरणे तेषामेव ये प्रमादपङ्कजालनिमग्नाः, स्पष्टं चैतत् [10]"**प्रमाद्यावश्यकत्यागादि**"-त्यत्रेति ।",

परं नैते मीमांसन्ते [11]मांसलमीमांसाजुषोऽपि [12]मीमांसितमभियुक्ततमैः स्पष्टं यदुत—किं समग्रमप्यहः [13]तेऽप्रमत्ततयावतिष्ठन्ते सर्वदा प्रतिक्रमणकाले वा केवलमायात्यप्रमत्तत्वमावश्य[14]कावारकमिति कृत्वा ? प्रथमे प्रथितोऽकीर्त्तिपटहस्तादृशामाप्तागमबाधितवादिनां यनो नान्तर्मुहूर्त्तमतिवृत्य विद्यतेऽप्रमत्तभावोऽपि,प्रमाद्यतो वाऽऽ[15]वासकानुष्ठानकाले तु [16]तदवाप्त्यां [17]तदकरणमिति वचनं कस्य न हास्याय स्यात् प्रेक्षावतः ? यतः किमितरेऽनुष्ठानकालेऽप्यावश्यकानां प्रमत्तास्तेषां[18] वा [19]तथाविधानामनुमतमनुष्ठानमेतेषामभियुक्तैर्भवेदिति विचार्यतां क्षणं [20]निरीक्षणचक्षुष्कैः ।

ननु निष्फलं तर्हि "**नो सन्ती**"–त्यादि "**पमायावे**"–त्यादि च वर्णनं वर्णन[२१]चणानां सूरीणां **गुणस्थानक्रमारोहण**मिति चेत् अस्तु भवादृशामधः[२२]स्थानान्वेषणपरतया श्रीमतामपि तेषां कलङ्कदान[२३]नदीष्णानां [२४]तत्तथा[२५],

वस्तुतस्तु पूज्यपादैरप्रमत्ततामहिमाख्यापकतापरमन्वशासीदं, तथा चाऽऽ–"**त्मशोधि कारकाणी**"–त्यध्या[२६]हृत्य व्याख्येयं, तदेवञ्च 'आवश्यकानि तत्रात्मशुद्धिविधायकानि न सन्ति' इति फलितोऽर्थः स्यात्तत एव चानन्तरमूचिवांसोऽनूचानप्रवरा यदुत–[२७]"**सततध्यानसंयोगाच्छुद्धिः स्वाभाविकी यत**" इति, श्रुत्या चैवमुपवर्ण्यमानं फलमप्रमत्ततायाः यो विजह्यात्कश्चित्तानीति[२८] शिष्टवान् "**पमायावे**"–त्यादिना, विगतप्रमादस्तु तथानुष्ठानप्रवृत्त एव स्यात्-नच तस्य तज्जिहासा भवेत् स्वप्नेऽप्य[२९]भव्यानामिवानादिकालीनसंसारजिहासेवावाप्ताश्चाप्रमत्ता एव वन्दनककायोत्सर्गप्रतिक्रमणादिप्रवृत्ता अनेके महात्मानोऽपवर्गं शीतलाचार्यभागिनेयाद्या इत्यलमप्रस्तुतेन ।

स्थितं चेदं यदपश्चिमपरमेश्वरपथानुसारिणः कुर्वन्त्येवावश्यकं सामायिकाद्यध्ययनषट्करूपं, तदपि पञ्चधा, दैवसिक-रात्रिक-पाक्षिक-चातुर्मासिक-सांवत्सरिकभेदात् , [३०]एतद्भवीय-प्रतिभवीये अपीति तु निरक्षराणां प्रलपितं, यतो नातीतकालाद्भिन्ने एते, अनागतप्रतिक्रान्तिस्तु नाऽऽप्ताऽऽगममूला "**अईयं पडिक्कमामो**" त्यादिवचनात् , [३१]प्रत्याख्यानरूपापि सा नान्यभवीया स्यात् , न च सात्र परिगणनीयाऽऽवश्यकप्रकरणे, आराधनावसरे तु [३२]"**जमिह भवियमण्णभविय**"–मित्यादि यत्प्रोच्यते प्रवचनवेदिभिस्तत् सामान्यालोचनादिरूपतया विरताविरत[३३]प्रभृतिसाधारण्येनैव च, प्रतिक्रान्तं च [३४]"**इह वा भवे अन्नेसु वे**"–त्यनेन तदिति [३५]नार्थवत्ताधिक्यस्यावश्यकयोः, यद्वा संलेखनाराधनारूपं [३६]तदिति नावश्यकता तस्य, प्रतिनियत[३७]कालानुष्ठेयत्वाभावात् विधानाभावात् । अविधानेपि प्रायश्चित्तासेवनानेहोऽभावाच्च तथाऽस्य[३८] कल्पत्वे तु स्युरेवैते दैवसिकादिवदिति कृतम् प्रसक्तानुप्रसक्तेन ।

अवश्यं च पञ्चधाप्येतदनुष्ठेयमाद्यान्तिमयति[३९]पतिसमाराधनतत्परयतिभिः [४०]"**दुण्हं पण पडिक्कमणे**"–तिप्रवचनवचनात् , नतु [४१]मध्यमत्रिजगत्पतिमार्गानुसारिवत्तद्द्वयमेव, वक्रजडानामैदंयुगीनानामेषामेवंविधकर्त्तव्यहत्वस्यैव समादेशादुपकारकत्वात् अप्रमादवर्धकत्वाच्च ।

किञ्च प्रत्यहं दैवसिकरात्रिके विधेये अधुनातनैर्मुनिवरिष्ठैः, प्रतिपक्षं प्रतिचतुर्मासं प्रतिसंवत्सरं च तत्काल एव तत्तत् विधेयं नतु द्वाविंशतिजिनपतिमार्गानुगानगारस्तोमवत् [४२]"**दुण्हं सय दुकाल**"–मित्यादिवचनात् कारणजात एव प्रतिक्रमणद्वयं चेति, श्रावकास्तु वीतरागवर्त्मानुसारिणोऽपि सर्वविरतानुसारिण इति न तेषां पार्थक्येन प्रतिक्रमणादिव्यवस्थेति तत्त्वं ।

प्रतिक्रमणेषु च सत्स्वपि कालादिभेदेन पञ्चविधेषु विहायोत्सर्गाऽऽ[४३]दिसामान्यभेदं न कोपि

तथाविधो विशेषोऽतिरिच्य दैवसिकपाक्षिके, तत्र दैवसिकप्रतिक्रमणे श्रमणसत्कं प्रतिक्रमणं सव्याख्याकमाविष्कृतपूर्वमेवैतत्कोशाध्यक्षादिभिः, पाक्षिकावश्यके चावश्यकमनगाराणामे[४४]तन्मुख्यतयेत्युपक्रान्तं मुद्रितुं तैरेव ।

परं ग्रन्थरत्नेऽत्रोपक्रान्त विचारणीयमेतद्विचारचणानाम् यदुत—कस्कोऽस्य विधाता ? कश्चास्य रचनाधारभूतः कालः ? कस्मै वा निर्मितं ? के वाऽधिकाराः ? कस्कोऽत्र विवरिता ? कदा कतमस्य भूमण्डलस्य मण्डनं ? इत्यादि प्रश्नवृन्दम् ।

तत्र प्रथमं तावद्विदितप्रवचनरहस्यानां विदितचरमेतद्यदुत पाक्षिकं प्रतिक्रमणं श्रीमज्जिनपादैः प्रणीतं जिनाज्ञानुसारिसाधुसन्ततिहिताय सप्रतिक्रमणधर्मप्रतिपादनादिना तथा च [४५]तदात्वमेवैतस्य, न चास्य श्रूयते परावर्त्तादि, भाषाऽपि च सूत्रानुसारिण्येवात्र, **दशवैकालिकादिश्रुतानां** यदुत्कीर्त्तनमत्र तत्समग्रश्रुतस्थविरकृतिस्मरणीयताज्ञापनाय लेखनकाले स्थापितमिति न कोऽप्यनाश्वासस्तीर्थानुसारिणां, न चर्ते सूरिक्रमविश्रम्भमन्तरा च श्रुतस्थविरप्रत्ययं साक्षाद्वीरविभुव्याख्यातमपि प्रमाणयितुं पार्यते केनापि, तथा चेतराऽऽगमग्रन्थादावपि पश्चात्कालभाविवृत्तान्ताद्यवेक्ष्यत इति न कोप्यनाश्वासः [४६]पूर्वोक्तादेव हेतोः [४७]पूर्वोक्तानां ।

एवं च विधातारोऽस्य श्रीमद्गणभृत्पादाः सङ्कलितं च लेखनकाल एवंविधतया सूरिसमूहैरेवमेवच यतिप्रतिक्रमणादावप्यवसेयं, तथा च किमिदमे[४८]तादृशमभूत्तदेति संशयानास्तीर्थबाह्या निरस्ता श्रद्धानशून्याः, [४९]विधानानेहाऽपि निर्णीतप्राय एवानेन गणभृतां विधातृत्वेन, किमन्यद्वा स्यात्तेषां प्रतिक्रमणं, [५०]आवश्यकं च तेषामपि पूज्यात्मानामाव[५१]श्यकानुष्ठानमिति सत्त्वैवास्य तदानीं, तीर्थप्रवृत्तिकालश्चास्य रचनाधारभूतस्तदैव च विधेयमेतद्दिवसावसान इति कृत्वा, श्रमणसूत्रं [५२]तत्सहचरं [५३]चैतदपि विरचितमिति [५४]निर्णीयते, अनभ्युपगमस्तु [५५]कैश्चिज्जिनवरेन्द्रादीनां तदुदितानां यत्सिद्धान्तानामपि च क्रियते इति न सोऽनाश्वासनिदानमवितथश्रद्धावतां, तथा स्वान्यात्मशुद्धिरेवार्थोऽस्य निर्माणे हेतुरनन्तरः, परम्परया तु समेषामेव तीर्थकराध्वानुसारिणामपवर्गावाप्तिरस्त्येवेति ।

अवधारणीयं चेदमथ धीधनैरत्र यदुत—यद्यत्स्वीक्रियते तत्र तत्र भवेदेवातिचारजातं कर्मोदयादिना, [५६]स्वीकृते च सावद्यत्यागाऽनवद्यासेवने यावज्जीवं वाचंयमैः तत्र सावद्यत्याग एव चोपस्थापनावेलायां पञ्च महाव्रतान्यारोप्य [५७]शिक्षके दृढीक्रियते इति रात्रिभोजनविरमणषष्ठानां महाव्रतानां पञ्चानां प्रतिक्रान्तिः, स्वाध्यायस्य चानवद्ययोगमूलरूपस्याऽ[५८]वाचितादावतिचारजाते प्रतिक्रन्तव्यमिति श्रुतोत्कीर्त्तनाऽत्र कीर्त्तिता पर्यन्ते सूरिभिः, [६०]मध्ये सावद्याद्येकादिस्थानप्रतिक्रमणं तु सावद्यातिचारजातप्रतिक्रमाय सामान्येनेति **सामान्यतोऽधिकारनिर्देशः** ।

**विशेषतस्तु निर्देश** एवमत्र यदुत–"**मङ्गलादीनि** [११]**स्फातिमन्ति भवन्ति शास्त्राणी-ति" मङ्गलमुपादायाऽऽदौ श्रोता** च [१२]सिद्धाभिधेय एव श्रोतुं प्रवर्त्तत इत्यदर्शि तदपि, **प्रयोजनं** चेमं '[१३]**गुणरत्नसागरमविराध्य तीर्णसंसारा ये**' इत्यादिना सूचितं, **सम्बन्धोपि** चैतदनुसार्येवेति न पृथक् प्रतिपादितः,

एवं प्रस्ताव्य सङ्क्षेपेणोद्दिष्टानि महाव्रतानि पञ्च रात्रिभोजनविरमणषष्ठानि **यथोद्देश** न्यायेन प्रथमे तत्र व्रते तावदुच्चार्य सूक्ष्मबादरत्रसस्थावरादिविधविषयकत्रिविधत्रिविधविरतिरूपां प्रतिज्ञां सङ्क्षेपेण प्रतिक्रान्तिस्तावत्तदनु च विशेषतः प्रतिचिक्रमिषुभिर्द्रव्यक्षेत्रकालभावतः प्रतिक्रम-णीयं प्राणातिपातं विभज्य, धर्मस्य केवलिप्रज्ञप्तत्वादिद्वाविंशतिविशेषणविशिष्टस्याज्ञानत्वादिषो-डशविशेषणविशिष्टेनात्मना यदैहिकान्यभविकं तद्विषयकं कृतादि निन्दयित्वा, पुनरर्हदादिसाक्षिकं प्रतिज्ञाय, विशेषेण व्रत उपस्थाय, दुःखक्षयाद्युद्दिश्योपदर्श्य दाढर्यञ्च, तत्र प्रतिज्ञातस्तद्रक्षणाय विहारः ।

एवमेव च मृषावादादत्तादानमैथुनपरिग्रहरात्रिभोजनानामपि यथार्हमवगन्तव्यम् ।

नवरं मृषावादे तदुद्भवः क्रोधलोभभयहास्येभ्यो, द्रव्यादिविभागे त्वाद्ये षड् जीवनिकायाः, सर्वलोको, दिवारात्री, रागद्वेषौ चेत्यनुक्रमेण द्रव्याऽऽदिषु तथाऽत्र वाच्यं, परं सर्वद्रव्य-लोकालोकौ द्रव्य-क्षेत्रयोः परावर्त्त्यौ ।

अदत्तादानोद्भवो ग्रामनगराऽरण्याऽल्पबह्वणुस्थूलचित्तवदचित्तवद्विषयतया, द्रव्यक्षेत्रयोः परावर्त्तस्तु ग्राह्यधार्यद्रव्येषु ग्रामनगरारण्येषु चेति ।

मैथुनोद्भूतिर्दिव्यमानुषतैर्यग्योनिभ्यः, द्रव्यतो रूप-रूपसहगतयोः सचित्ताचित्तआदिषु, क्षेत्रत ऊर्ध्वाधस्तिर्यग्लोकेषु ।

परिग्रहप्रभवो द्रव्ये सचित्ताचित्तमिश्रेषु, भावतोऽल्पबहुमूल्ययोः ।

रात्रिभोजनमशनपानखादिमस्वादिमसंभवं द्रव्यतोऽशनादि, क्षेत्रतस्तापक्षेत्रं, भावतस्तिक्तकटुक-कषायाम्लमधुरलवणरागद्वेषा इति समुत्कीर्त्य पञ्चकं महाव्रतानां रात्रिभोजनविरमणव्रतषष्ठानां पापो-द्भवतत्प्रवृत्तिहेतु;तन्निवृत्ति–निवृत्तिस्वरूप-तत्फलाऽऽख्यानद्वाराऽऽख्यायि भावनामूलभूतमतिक्रमव-र्जनं अप्रशस्तयोगवर्जनादिख्यानेन ।

भावनास्तु पञ्चविंशतिरेवं मनोगुप्त्ये-षणाऽऽदाने-र्यासमिति–दृष्टान्नपानऽऽदानैर्हास्य-लोभ-भय-क्रोधप्रत्याख्यानाऽऽ-लोचितभाषणैरालोचिताऽ-भीक्ष्ण-साधर्मिक-सप्रमाणावग्रहयाचना-ऽनुज्ञापि-तपानाशनैः स्त्रीषण्ढपशुमद्वेश्मासनकुड्यान्तरसरागस्त्रीकथा-प्राग्रतस्मरण-स्त्रीरम्याङ्गेक्षणा-ङ्गसँस्का र-प्रणीतात्यशनवर्जनैः प्रियाप्रियशब्दरूपगन्धरसस्पर्शेषु प्रीत्यप्रीतिपरिहारेण क्रमाद् व्रतेषु पञ्चसु । षष्ठं तु न समेषु तीर्थेषु मूलगुणरूपमिति न तद्भावनाः परिगण्यन्तेऽतिक्रमास्तु सूर्यशङ्कितता-ऽतिमात्राहारादिना ।

तदनु प्रतिक्रमणप्रवृत्तस्वरूपं दर्शज्ञानचारित्राणामविराधकः श्रमणधर्मस्थित आलयविहारसमितिगुप्तियुत इतिरूपमुपदर्शयन्तो महात्मानो महाव्रतपञ्चकरक्षणप्रतिज्ञां समाचख्युः आख्यँश्च सावद्येतरयोगादीनाशातनापर्यन्तानेकादींस्त्रयस्त्रिंशदन्तान् परिहार्यधार्यतया महाव्रतप्रतिज्ञापरिपालनाय । निगमयन्तश्च महाव्रतोच्चारणं सविशेषार्हन्महावीरनमस्कारादर्वाक् तदुपकारस्मरणमिव प्रकटयामासुः स्थैर्यादीननुपमान् महाव्रतगुणान् ।

निरवद्ययोगानां स्वाध्यायमूलत्वेन श्रुतसमुत्कीर्तनां तदतिचारप्रतिक्रमणं च चिकीर्षुभिरङ्गाऽनङ्गत्वेन प्रतितीर्थं नियताऽनियतत्वेन श्रुतं विभज्यते द्विधा, तत्रापि प्रत्यहं क्रियोपयोग्याऽऽवश्यकं [६४]व्यतिरिक्तं चेति, व्यतिरिक्तमपि प्रथमपश्चिमपौरुष्यध्येयम् कालिकमितरत्तूत्कालिकमिति सप्रभेदस्यैव तस्याऽऽख्यानाय क्रमश आवश्यकाध्ययनानि, उत्कालिकानि, कालिकानि, अङ्गप्रविष्टानि चाऽऽख्युः ख्यातमहिमानो **यथागहन**न्यायेनाऽऽख्यातं च तत्राऽर्हद्भगवदाख्यातगुणादीनां श्रद्धानादि कार्यतया, अन्तःपक्षं कृतानां वाचनाऽऽदीनां दुःखक्षयाद्यर्थमुपसम्पत्तिमकृतानां च तेषां तत्र प्रायश्चित्तप्रतिपत्त्यादि प्रतिपाद्य, विश्रुतकीर्तिश्रुतधर्मवाचकेभ्यस्तदाऽऽराधकेभ्यश्च निरूप्य नमस्कारमात्मीयानाराधनामिथ्यादुष्कृतं समर्प्य, कीर्त्तिताऽविकरकीर्त्तिः श्रुतदेवता श्रुताधिष्ठात्री । आवश्यकदीनां विषयाद्युपदर्शनं तु नादृतम् विस्तारभियाऽऽप्रस्तुतादेश्चाभ्यूह्यं वा स्वयं धीमद्भिः । शेषं विध्याऽऽदि क्षामणाऽऽदि च विध्युपयोगीति विभावनीयं प्रेक्षावद्भिः, परमवश्यमेतावताधिकारप्रबन्धेन भविष्यति भव्यानामावश्यकताप्रतिभानमेतस्योपयोगित्ता चातिशायिनी सूत्रस्य सविवरणस्य मुद्रणस्य च प्रतिभासिष्यत इति न तत्र वाच्यं किञ्चित् ।

विवरणं त्वेतद्वैक्रमाब्दीय**द्वादशशतककालीनाचार्यश्रीमद्यशोदेवपादैर्दृब्धं श्रीमदणहिल्लपत्तने** सौवर्णिक**नेमिचन्द्र**पौषधशालास्थितैः **श्रीमत्सिद्धाधिपे शासति राज्यं श्रीमच्चन्द्रकुलीनश्रीवीरमिश्रगणिभुजिष्यशिष्यश्रीचन्द्रसूरिपादपद्ममधुपाभैः**, श्रीमत्प्रणीतो नान्यः कोप्युपलब्धो ग्रन्थो यदि परं स्याज्ज्ञातः कस्यापि धीधनस्य, ज्ञापनीया वयं सोपस्कारमित्याशास्महे, उपास्महे च तत्पादान् ये यथायथमवगणय्येदं निःश्रेयससाधनाय सफलयेयुः श्रुतोदीरितम् , व्यवस्थादि च ज्ञानोद्धारकोशद्रविणादिविषयं मुद्रितपूर्वं मुद्रितपूर्वेष्विति न तत्रायासः ॥

मुद्रणे चाऽस्याऽभूत्पुस्तकमेकं मूलाधारभूतमस्मदीयं वैक्रमवर्षीयषोडशशतीयं शुद्धतमं, द्वितीयं च त्यक्तसुगतिमार्गमूललुम्पकानुगतढुण्ढककुमार्ग**श्रीमदानन्दविजय**पादानां शिष्यवरैर्ज्ञानकोशविस्तारप्रयतैः **श्रीमत्कान्तिविजय**मुनिभिः प्रहितं शुद्धतमेव, कृतेऽप्यत्र शोधनादिप्रयासे सुलभत्वाच्छद्मस्थस्खलनस्य दृष्टिदोषादक्षरयोजकदोषाद्वा यत्किञ्चिद्भवेदशुद्धिजातं तद्वाच्यं शोधयित्वा

कृपापरैः सत्कृपामभिलाषुकेषु श्रमणसङ्घपादपद्मचञ्चरीकेष्वस्मास्विति प्रार्थयामहे सन्मार्गसज्जसज्ज-जनतासमीपगाः ।

सूरते सुरपस्पर्धिराज्ञि धार्मिकराजिते ।
लेखः प्रास्तावि सद्धर्माऽनन्दैर्लेखसुखाकरैः ॥१॥
[७]समुद्र- रस- [८]नन्दाब्जे (१९६७) मिते विक्रमहायने ।
ज्येष्ठामूले रवौ तिथ्यामेकादश्यामुदीरितः ॥२॥युग्मम्॥



# पूज्यागमोद्धारकश्रीलिखितप्रस्तावना-

## विषमपदार्थसूचिका

# आनन्द लहरी टिप्पणी

## ४-श्री पाक्षिकसूत्र प्रस्तावना

१. श्रामण्यप्रतिपादकग्रन्थेषु छेदसूत्रेषु च बहुत्र साधूनां स्वरूपव्यावर्णन प्रसङ्गे 'ठियकप्पिया' इति विशेषणं प्रयुज्यते।

२. यत्प्रयोगे गुणस्यावश्यम्भावित्वं दोषाभावश्च तादृशोषधस्य कल्पसूत्रवृत्तौ निर्दिष्टस्यात्रोल्लेखः।

३. षडावश्यकानामर्थाधिकारसूचकवस्तुषट्कं क्रमशोऽनेन समस्तपदेन सूचितमस्ति।

४. तस्य=साम्यस्य प्ररूपकाः ये चतुर्विंशतिसंख्या आत्मानः महापुरुषाः तीर्थंकरा इत्यर्थः तेषां स्तव इति विग्रहोऽवबोध्यः।

५. तथाविधः=तृतीयौषधकल्पः, अत एवाऽवश्यकरणीयत्वेन सार्थकाऽभिधाऽस्याऽऽवश्यकेति।

६. अविकला=युक्ति प्रतीति शेषः, या साधनसामग्री तस्यां=तत्पालने सावधाना ये अनगारशिरोमणयः=साधुवर्याः तेषां वर्णनादौ इति समासः।

७. 'तादृश'शब्दस्य प्रमत्तार्थोऽत्रात्र गम्यः।

८. एतद्धि श्रीगुणस्थानक्रमारोहे एवमुपलभ्यते,।

"इत्येतस्मिन् गुणस्थाने नो सन्त्यावश्य कानि षट्।
सन्ततध्यान सद्योगाच्छुद्धिः स्वाभाविकी यतः॥"

श्रीगुण० क्रमा० गा- ३६

९. इदं हि आपूर्वकपद् धातोः क्रियातिपत्तौ प्रथमपुरुषैकवचनमस्ति।

१०. गुणस्थानक्रमारोहे एषा गाथोपलभ्यते।

प्रमाद्यावश्यकत्यागान्निश्चलं ध्यानकाश्रयेत्।
योऽसौ नैवागमं जैनं वेत्ति मिथ्यात्वमोहितः॥

श्री गुण० क्रमा० गा० ३०

११. मांसला=परिपुष्टा चासौ मीमांसा=वस्तुविचारक्षमोहापोहशक्तिः च, तां जुषन्ते=भजन्ते ये ते इति व्युत्पत्तिरत्रज्ञेया।

१२. अभियुक्ततमैः=आप्तवर्यैः स्पष्टं मीमांसितं (अत्र 'अपि' इत्यध्याहार्यम्) न मीमांसन्ते=समीक्षया विचारयन्ति इत्यन्वयानुसारमर्थसंगतिः यार्या।

१३. तत्पदेनात्राध्यात्मवादव्याजेन क्रियायामरुचिं शासनशैलेरज्ञतां प्रतिक्रमणादिक्रियाया ध्यानाद्युत्कृष्टताभिव्यक्तिद्वारा व्यञ्जयन्तः लिंगधारिणो विज्ञेयाः।

१४. आवश्यकक्रियास्वरुचिमतां तेषामज्ञशेखरत्वाविष्करणायोपहासगर्भाऽऽक्षेपसूचकमिदं विशेषणम्।

१५. अयं हि शब्दः आवश्यकाऽपरपर्यायः 'आवश्यकनिर्युक्त्या'दिषु प्रसिद्धः, आवश्यकक्रियाकलापानुष्ठितेर्ज्ञानादिगुणानामावासभूतत्वात्।

१६. तदवाप्त्यां=अप्रमत्ततप्राप्तौ ।

१७. तदकरणं=आवश्यकाऽकरणं अप्रमत्तत्वाद्धेतोरावश्यकक्रियाया गतार्थत्वमिति ।

१८. तेषां=सम्यग्विधिपूर्वकावश्यककारिणां ।

१९. तथाविधानां=अध्यात्माऽऽभासिनां ध्यानाऽऽदिव्याजेन प्रतिक्रमणाद्यकारिणां श्रमणप्रतिरूपकाणां 'प्रतिक्रमणकाले त्वस्माकमप्रमत्तता भवति, नाऽतोऽस्माकं प्रतिक्रमणाद्यावश्यकता' इत्यसत्तर्केण सच्छ्र-मणानां प्रतिक्रमणक्रियाकृतिव्यङ्ग्यप्रमादशालित्वमिति बलादापद्यते, ततश्च तथाविधपदेनाऽत्र 'प्रमाद-वता' मित्यूहनीयम् ।

२० निरीक्षणार्थं=वस्तुसम्यग्विचारार्थं चक्षुः=अन्तरङ्गसमीक्षाशक्तिः विद्यते येषां ते तैरिति विग्रहेण आलो-चनापूर्वं वस्तुसारासारनिर्णायकैरिति भावार्थोऽत्र बोध्यः ।

२१. निपुणानामित्यर्थः ।

२२. अध्यात्मकक्षाव्याजेन चारित्रमोहोदयप्रभवप्रमादजन्याऽऽध्यात्मिकाऽधस्तनकक्षाऽवरोह एवेष्यते तैः प्रति-क्रमणाद्यरुचिमद्भिः श्रमणाभासैः, अतएऽवाधःस्थानस्यान्वेषणे परतै तैषां लक्षिताऽस्ति ।

२३. लाक्षणिकोऽयं हि शब्दः कुशलापरपर्यायः ।

२३. 'तत्' पदेन प्रतिक्रमणादिक्रियाणामपूर्वमहत्त्वसूचकाऽकाट्ययुक्तिगर्भहि गुणस्थानक्रमाऽऽरोहाऽऽ-दिवाक्यजालं विज्ञेयम् ।

२५. 'तथा' पदेन वाद्यभिमतकुयुक्तिबलेन निष्फलत्वस्येष्टापत्तिरत्र, तुष्यतुदुर्जनन्यायानुसारं विहिता ।

२६. गुणस्थानक्रमारोहीयषट्त्रिंशत्तमगाथासत्क "न सन्त्यावश्यकानि षडि"-ति पादेऽध्याहारकरणीयता-ऽत्र समर्थ्यते एतत्पदेन ।

२७. एतद्धि गुणस्थानक्रमारोहे गा० ३६ उत्तरार्द्धरूपेणोपलभ्यते ।

२८. अत्र 'इति' पदेन प्रतिक्रमणादेररुचिवैरस्यादिमूलं हि यः कश्चन ध्यानादिव्याजेनाऽनावश्यकत्वम-भिमन्येत, अप्रमत्ततायाः फलमावश्यकपरित्याग एवेति विपर्यस्तबुद्धे रिति हेतोः इत्येवंरूपः सामु-दायिकाऽर्थोऽवगन्तव्यः ।

२९. अत्राभव्यानां दृष्टान्तत्वेनोपन्यासं कृत्वा पूज्यवर्या एवं ध्वनयन्ति यत् यथा ह्यभव्यानां संसारत्यागेच्छा कदाऽपि न भवति एवं प्रमादपरिहाणेरुत्तरोत्तरमावश्यकक्रियासूपयोगजागृतेरनन्यफलरूपत्वात्तत्-क्रियानां त्यागस्येच्छाऽपि सुतरामसंभाविनीत्यतः प्रमादराहित्यस्यावश्यकक्रियासानुबन्धनियतत्वा-दावश्यकक्रियाणामप्रमत्तत्वस्य च विरोधोद्भावनाऽऽध्यात्मिकाभासश्रमणविहिताऽर्थशून्या विज्ञेयेति ।

३०. कैश्चिदतिशयदौर्विदग्ध्यप्रयुक्तवावदूकताशालिभिर्पण्डितम्मन्यैः प्रतिक्रमणसप्तकमभिमन्यते, तत्र चैतद्भवीय-प्रतिभवीय प्रतिक्रमणे द्वे अधिके गण्येते, तयोरस्वारस्यमूलको हि निर्देशोऽत्र ।

३१. "अणागयं पच्चक्खामी"-ति प्रसिद्धेः अनागतकालीनपापव्यापारस्य प्रत्याख्यानरूपत्वेन प्रतिक्रमण-सम्भवत्वविवक्षायाः निरासोऽत्र विधीयते ।

३२. एषा हि गाथा श्रीपर्यन्ताऽऽराधनासूत्रप्रभृत्याराधनाविषयकप्रकरणग्रन्थीया प्रतिभासते, विहितेऽपि प्रयत्ने यथाशब्दं नोपलब्धा, धीधनैः मार्गणीयैषा गाथा ।

३३. 'प्रभृति' पदेनाऽविरतानामपि ग्रहः, तेन प्रतिक्रमणस्य विरतिनैयत्यादाराधनाविधिप्रतिरूपत्वं न सङ्गतिमङ्गति।

३४. पाक्षिकसूत्रे महाव्रताऽऽलापकेषु एतत् पदकदम्बकं समुपलभ्यते।

३५. अत्र 'तत्' पदेन गतभवीयपापप्रतिक्रान्तिर्विवक्षिता।

३६. शास्त्रविहिते नियतकालेऽतीतभवपापालोचनस्य विहितता न दृश्यते, एवं हि एतत् पापमालोचयितव्यमिति विधानमपि नोपलभ्यते, अनुपलम्भेऽपि विधानस्य सापेक्षतया गुरुनिश्रया कासांचित् प्रवृत्तीनां लब्धजन्मत्वेऽपि अन्त्यसमये आलोचयितव्यदुष्कृतानां प्रायश्चित्ताऽऽसेवनप्रायोग्यस्य कालस्यापर्याप्यमानत्वात् गतभवपापाऽऽलोचनं न हि प्रतिक्रान्तिकुक्षिगमिति।

३७. गतभवीयपापानामालोचनाया अवश्यकर्त्तव्यत्वरूपकल्प-मर्यादाऽनुपातित्वं यदि चाभविष्यत्तर्हि दैवसिकाऽऽदिप्रतिक्रमणपञ्चकवत् एतद्विधस्यापि सत्तासम्भवोऽभविष्यत्।

३८. अत्र 'यतिपति' पदेन तीर्थंकरा विज्ञेयाः।

३९. एतद्धि गाथार्द्धम् सप्ततिशतस्थानकग्रन्थीयं श्री कल्पसूत्रवृत्तौ सुबोधिकायां प्रथमव्याख्याने कल्पदशकवर्णनप्रसङ्गे ( पत्र ३पृ० २ पं० १ ) एवमुपलभ्यते "देसिय १ राइय २ पक्खिय ३ चाउम्मासिय ४ वच्छरीय ५ णामा। दुण्हं पुण पडिक्कमणा मज्झिमगाणं तु दो पढमा" ॥ इति ॥

४०. द्वाविंशति तीर्थंकर-मार्गानुसारिवदित्यर्थः। तद् द्वयम्=दैवसिक-रात्रिक-प्रतिक्रमणरूपमित्यर्थः।

४१. "तं दुसह सय दुक्काले, इयराणं कारणे इउ मुणिणो" सप्ततिशतस्थानकग्रन्थीयैषा गाथा कल्पसूत्रप्रथमव्याख्याने सुबोधिकावृत्तौ (पत्र ३ पृ० २ पं० ३) समस्ति।

४२. कायोत्सर्गादिसामान्यभेदमित्यर्थः।

४३. एतत्पदेन प्रसङ्गतः प्रक्रान्तं हि पाक्षिकसत्रं विज्ञेयम्।

४४. तदा=श्री तीर्थंकरकाले भवम् इत्यर्थः।

४५. आगमानां लेखनकाले श्रुतस्थविरैः संकलितत्वरूपादिति शेषः।

४६. तीर्थानुसारिणामागमश्रद्धालूना मित्यर्थः।

४७. गणधरानामर्वाक्कालेसंकलितानां प्रज्ञापनानन्दीप्रमुखागमानां नामनिर्देशेन पाक्षिक सत्रस्य गणभृत्कालीनत्वमाश्रित्य विप्रतिपत्तिमुखेन संशयदोलारूढाः अधुनातनाः केचन तथाकथितविद्वांसोऽपि श्रमणाः, अतस्तेषां हितायेदं निर्वचनं पूज्यागमोद्धारकश्रीभिः क्लृप्तमस्ति।

४९. रचनासमय इत्यर्थः।

३९. अवश्यकरणीयमित्यर्थः।

५०. प्रतिक्रमणकरणमित्यर्थः।

५१. 'तत्' पदेन 'श्रमणप्रतिक्रमण' सूत्रस्य परामर्शः।

५२. पाक्षिकसूत्रमित्यर्थः।

५३. 'निर्णीयते' इति प्रयोगेनात्रैवं पूज्यपादाः ज्ञापयन्ति यत् ऐतिह्यापेक्षया गुरुचरणोपास्तिसमधिगम्यसुनिर्मलश्रुतानुसारिणीधीषणाप्रतिभोद्भावितर्कबलेन, 'सिद्धस्य गतिश्चिन्तनीये'इति न्यायानुसारं सम्यग्

व्यवस्थापनमुखेन नानाविधागमानुपातियुक्तिव्रजैर्वस्तुनः प्रामाणिकनिरुपणपद्धतिनैवैतादृशविशृंखलितागमपदार्थानामाश्वासावहऽऽस्वरूपनिष्टङ्कनं सुतरामुपादेयम् ।

५४. 'तु' पदेनैतद्विधप्रामाणिकशैल्या सुगुरुनिश्रयोह्यमानपदार्थनिर्णयकरणरीतौ सत्यामपि स्वाभिप्रायोज्जीवितच्छंदोऽनुरोधिकुतर्कानामेव प्रामाण्येनाऽयाथातथ्येनागमिकवस्तूनामश्रद्धाजननफलकं मतिव्यामोहादिजनकं विद्याभिमानादिजनितं यद्वा-तद्वा प्रलपनं न विश्वासार्हमभ्युपगमार्हं चेति स्पष्टतरं दध्वनुरागमतलस्पर्शिसद्बोधमर्मज्ञाः पूज्यपादाः ।

५५. प्रथमाद्विवचनान्तमिदं रूपं नपुंसकलिंगीयम् ।

५६. नवदीक्षिते इत्यर्थः ।

५७. वाचनापृच्छादावकृतायामिति भावः ।

५८. उत्कीर्त्तना नाम नामोल्लेखः ।

५९. आलापकषट्कानन्तरं श्रुतानां नामोल्लेखालापकादर्वाग् तनद्वाचत्वारिंशद्गाथाकदम्बकस्यात्र निर्देशोऽत्रावबोध्यः ।

६०. स्फातिः यथोत्तरं निर्विघ्नं शिष्यप्रशिष्यादिसन्ताने पठनपाठनादिप्रक्रान्तिप्रमुखाऽत्र विज्ञेया ।

६१. सिद्धानां अभिधेयत्वेन श्रोतृलक्ष्यगोचरीभूतत्वेन च निर्दिश्य गीतार्थोत्तंसाः सूरिवर्याः आगमानां श्रवणस्य सिद्धिपदप्रापकत्वं ख्यापितवन्तः ।

६२. पाक्षिकसूत्रस्य प्रारंभ एव द्वितीय गाथायां "जे अ इमं गुणरयणसायरमविराहिऊण तिण्णसंसारा" इति पदकदम्बकेन ज्ञानस्य गुणरत्नसागरतां तदविराधनामुखेनोपासनायाश्च तदीयायाः संसारतारकत्वं निर्दिश्य पाक्षिकसूत्रस्यास्य श्रुतमहिमागरीयस्त्वपूर्णस्य सम्यक्श्रवणपाठादिना श्रुतज्ञानस्याऽविराधनादिना संसारपाथोधितरणप्रयोजनत्वेन सूचितवन्तः श्रीमन्तोऽनन्तोपकारिणः गणभृत्सत्तमा इति परमार्थः ।

६३. अनुयोगद्वारादिषूपवर्णितमावश्यकव्यतिरिक्तं हि श्रुतमत्रव्यतिरिक्तपदेन विज्ञेयम् ।

## –: अंतः प्रार्थना :–

कत्थ अम्हारिसा पाणी ! दूसमादोसदूसिया ।
हा ! अणाहा ! कहं हुंता, जइ ण हुंतो जिणागमो ॥

श्री आगमोद्धारकालेखितप्रस्तावनासंग्रहस्वरूपे

# श्री आनन्दरत्नाकरे

## पञ्चमं रत्नं

## श्रीकल्पसूत्रस्योपक्रमः

उपादीयतामुपादेयमिदमुपदीक्रियमाणं विधाय करुणा-कटाक्ष-पातने मयि त्रिलोचने कल्प-सूत्राभिधानम[1]द्वितीय-महिम-रत्न-रत्नाकरं ।

ननु केन प्राणायि कदा ? कथं ? कुतश्च ? इति न ज्ञायते चेत् ? किमर्थो ग्रहणेन नः ? सत्यं ! भो ! [2]वदान्यमूर्धन्याः ! परं निर्णीततरमेतत्प्रतिवर्षं [3]श्रेयोनिःश्रेयस-निबन्धनदर्शन- ज्ञान-चारित्र-निदान-पर्युषणापर्वणि समाकर्णनेनास्य पावनस्य सव्याख्यानस्य, यदुत [4]प्रणेताऽस्य पूर्ववित्प्रवरः श्रुतकेवली **श्रीमद्भद्रबाहुस्वामी**, आसीच्चासौ पूज्यतमः श्रीमद कलङ्क-**महावीर**-देवाधिदेवात् [5]षष्ठयुगीनत्वेन [6]द्वितीयशतके, दुष्षमाऽर-रजनी- [7]रजनीचरायमाण-मेधाहान्यादि [8]घ्रातजन्तुजातोद्धरण-कृपापरीतचेतसाऽनायासेन [9]आयतकालपरिश्रमलभ्यपूर्वलाभविकला--नामनगारिणामुपकृत्यै आचार-विषय[10]कयावदुत्सर्गापवादाध्वदिदृक्षान्वितजनमनःसंतोषक-**श्री छेदसूत्रान्तर्गतदशाध्ययनामकश्रीदशाश्रुतस्कन्धस्याष्टमाध्ययनतया** नवमादन[11]वमात्प्रत्या-**ख्यानात्**षट्-[12]पञ्चाशदधिकशतद्वयमान-[13]माहाविदेहीयहस्तिप्रमाणमषीपुञ्जलेख्यात्पूर्वादुद्धृत्य महा त्मना व्यरचीदम् ।

निरचायि च[14]"**अथ प्रभवः प्रभुः । शय्यम्भवो यशोभद्रः संभूतिविजयस्तथा।। भद्रबाहुः स्थूलभद्रः, श्रुतकेवलिनो हि षट् ।**" इति कलिकाल-सर्वज्ञ **श्रीमद्धेमसूरि** वचना-च्छ्रुत-केवलिता, सा च संपूर्णचतुर्दशपूर्वविदामेव, केवलिता च [15]लोकाऽलोकाऽऽलोकाऽऽभोगप्रत्य-लक्षेवलालङ्कृत-महर्षितुल्यप्ररूपणारुषितत्वात् ।

अपलपन्ति च लुम्पका लुप्तस्वश्रेयोमार्गा एतद् वदन्ति च '**नेदमष्टमाध्ययनं दशा-श्रुतस्कन्धस्य**" इति, परं नैतत्समञ्जसं, यतो विलोक्यते चूर्णौ विवृतमेतद्दशा[16]श्रुतीयायां

लभ्यन्ते च प्रतयोऽपि अष्टमाध्ययनतोल्लेखिन्योऽनेकाः, काचित् काचिच्च तथा लिखिताऽपि प्राचीना, श्रीमति च स्थानाङ्गे स्पष्टमुल्लेखोऽस्याष्टमाध्ययनतया स्थाने [१७]दशमे, तुर्ये च समवायाख्ये [१८]प्रवचनपुरुषाङ्गभूतेऽङ्गे दृश्यतेऽस्यातिदेशो [१९]"जहा कप्पे" इति वचनेन [इति] नाऽऽरेकाऽस्याऽष्टमाऽध्ययनतायां दशाश्रुतस्कन्धस्य ।

[२०]"**समणे भगवं महावीरे बहूणं समणाणं०**" इत्यादिवचनतो नेदं व्यरचि महापुरुषेणाप्यनेने'–त्यप्य[२१]तिरेका न हितावहा, [२२]"सणयं सोदाहरण" मित्यादि वचनादे[२३] तस्मिन्नपि केषाञ्चित् साङ्गोपाङ्गानां [२४]तत्रत्यानां सूत्राणां न्यासात् सूत्र[२५]मिदमेव[२६] । एवमेव च [२७]**प्रज्ञापनादौ गौतमाद्यभिधानाङ्कितेऽपि** निर्धार्यम्, नतू[२८]च्छृङ्खलप्रेरितैर्भाव्यं नास्तिकैः ।

स्वकालाद्यभ्यन्तरज्ञापनाय [२९]चान्तरेषु स्थविरावल्यां चाख्यायि श्रीदेवर्द्धिगणिपूज्यैः स्वं यावत्कालोऽन्तरं च [३०]एतस्य एतदाधारेण श्वेताम्बराणां च प्रामाणिकता निश्चीयते [३१]मथुरापुरीयशिलालेखावलोकनतः, यतो दृश्यते [३२]तत्रभगवत्यस्मिन्नाऽऽख्यातानि शाखा-कुलाऽऽदीनि, प्राचीनतमाश्च ते लेखा इति सुस्थं समम् । पञ्चशती चाचार्याणां शासनप्रवराणामासीत्तदा पुस्तकाऽऽरोहणससंदि, [३३]नचर्ते तस्या विश्वासमर्हेदाऽऽख्यातोऽप्यर्हताऽऽगमो विश्वासमन्यथा[३४] तत्रभवन्नाम्नैव प्रख्यापयेत्सर्वमाविष्कृत्य स्वमनीषाकल्पितं, [३५]पुराण[प्रभाव]प्रस्थापकान्ययूथिकवत् ।

तदियतावसेयमेतद् यदुत पर्यवसानस्थविरावलिमेदं[३६] रचितमन्येन, नत्वन्यदिति, पाश्चात्यपट्टावलीव तस्या न्यासात्, भाषाशास्त्राऽपेक्षयाऽपि नाऽस्याऽर्वाचीनता, तथाविधस्वादुसुगम पदप्रबन्धमयाद्यनेककारणानामऽत्राऽवलोकनात्त[३७]द्धेतुभूतानाम् । सामाचारी[३८]प्रकरणमपि तथा विधसुविहितयोग्यं समाचारवृन्दमाविर्भावयत् किमिव न तोषयेत् [३९]सद्गतिनिदानसदाऽऽचारलोलुपान् ।

[४०]तदेवं श्रीमदकलङ्कमहावीरादिऋषभपर्यन्ताञ्जिनाधिपान्, [४१]सुधर्मसुधर्मावनतांह्रिपद्मसुधर्माऽऽदिदेवर्द्धिगणिक्षमाश्रमणपर्यवसानान् स्थविरान्, स्वर्गाऽपवर्गनिबन्धनश्रामण्यसाधक[४२]पर्युषणाऽऽदिप्रत्युपेक्षणाऽन्तान् समाचारान् प्रकटयत् प्रकटप्रभावमेतदिति मङ्गलमेव तत्र भवतां श्रमणानाम्, विशेषतश्चात्र[४३]स्थाने प्रतिष्ठान इवार्हतां वर्षावासस्य अनन्तानुबन्धिनिवारणप्रत्यलसांवत्सरिकप्रतिक्रान्तिनिखिलकर्मक्षयक्षमतपःकर्मप्रभृतिप्रचुरतरधर्माधारस्य ।

अत एव चाऽऽचारोऽप्यं शास्त्रीयो यदुत-यदा भवति श्रमणानां भगवतामर्हताऽ[४४]वलोकनेन वर्षावासस्य क्षेत्रे चिकीर्षा वर्षावासीया दृढा, तर्हि विद[४५]ध्युर्निशीथेषु पञ्चसु निशीथवर्णितकल्पेन कल्प[४६]कर्षणं समस्तसाधुमध्यगता गीतार्थाः, श्रीमज्जिन-गणभृदावलिस्मरण-सामाचारीज्ञानानां परममङ्गलत्वात्, परमपुरुषनामतत्समाचारश्रवणेनोद्भूतेविघ्न वृन्दारकविलयस्य,

प्रशस्तपरिणामानामविकलकारणतायां च तस्या आवश्यिकी सा ततः । साध्वीनां च स्वाचार[४७]-साध्वीनां दिवापि कर्षणम्, परं विहितयोगानामर्हत्येतत् कर्षणादि ।

उपेक्ष्या एव च हीनश्रद्धाना योगेषु, न ह्याऽऽप्तोपज्ञमेतद्यदुत ज्ञानैकान्तोऽपि क्रियैकान्तवद्[४८]कान्तपदप्रदः, [४९]आहाराऽशुद्ध्याद्याऽऽलम्बनानि तु कूटान्येव सन्ति स्वाऽभिनिवेशित्वाऽऽख्यायकानि च, यतो नह्याऽऽदिष्टं केनापि यद्रक्षणीयमेतदन्यथा भविष्यति यज्ञनियुक्तानां मांसानदनवत्प्रत्य[५०]पाय इति, प्रत्युत प्रायश्चित्तप्रतिपत्त्यादिना शोधनीयमाऽऽमतमाऽऽम्नायवद्भिः । नह्याऽऽम्नातमाऽऽप्ताऽऽगमे कुत्राप्यऽ[५१]योगं ज्ञानम्, अज्ञानं चाचार्यत्वादि, श्रीमतां वज्रस्वामिनां पदानुसारिणामप्ययोगित्वाद्वाचनाचार्यपदप्रार्थनाप्रतिहतिः श्रुता [५२]चेदाऽऽवश्यकाऽनुयोगिभिरपि कथं तदा योगहीनत्वाऽऽलम्बनं श्रेयस्कामानां श्रेयसे विधेयम् ।

व्यतिक्रान्तेषु च अशीत्यधिकनवशतकेष्वब्दानां (९८०) श्रीमन्महावीरसत्केषु आनन्दपुरे वर्त्तमानशासनाधिपचैत्ये पुत्रमरणार्त्तस्य ध्रुवसेनस्य समाधये [५३]साधितं समक्षं सच्चिवादिपरिषदः समयोत्सवं [५४]तन्पुरो वाचनं, ततः प्रभृति सकलश्रमणसङ्घस्या[५५]न्वक्षं वाच्यते [५६]उदूढयोगैर्मुनिभिः । अनियमस्तु कल्पसूत्रीययोगस्य नमस्कारवदाचीर्ण इति ।

अस्य च जातेष्वपि चूर्णिटीप्पणान्तर्वाच्यादिषु वाचकानां च न तथाविध आनन्दः प्रतिपर्युषणं वाचने श्रवणे चापि, "न ह्यविस्तृतमाशु बोधयेदबोध"-मिति वितताऽऽदितः श्रीमद्भिस्तपागणसुरद्रुमरक्षण[५७]वृतिप्रभैर्**धर्मसागरै**र्वृत्तिरस्य, **दीपिका** चानु अन्वर्थाऽदीपि **शुभविजय**पादैः, सत्योरप्यनयोर्बृहद्वृत्त्योः प्राकृतबाहुल्यात् वादगहनत्वात् विस्तृतत्वाच्च कथञ्चिदाऽऽरब्धा महोपाध्याय**श्रीविनयविजयगणिभिः सुबोधिका**ऽभिधा वृत्तिः सम्प्रत्युपदीक्रियमाणा, समयश्चास्या अष्टादशीयो वैक्रमः शतकः । [५८]शोभावहा स्यादेवेयं चेन्नात्र [५९]द्वेषावेशपुष्टा स्याद्वचस्ततिः [६०]तन्मूला च [६१]यथातथाऽर्थप्रथापरा क्वचित्क्वचिद्वाक्यपद्धतिः । नचोचितमेतत् पर्युषणापर्वणि [६२]सकलनिःश्रेयसाभिलषणीयाऽव्ययपदाध्वारावनकल्पकल्पसमग्रसत्त्वक्षामणा प्रधानस्वदोषपरगुणख्यायिनि, [६३]पर्वाहोबद्धकर्मणोऽपि[६४] दुरन्ततमत्वात्, न चासत्पक्षपोषणे खंडने चावितथस्यासंभाव्यमे[६५]तत्, परमस्तु परम[६६]भावाभिपातुकानां श्रेयो मार्जनीयं च मध्यस्थतान्वितदृशा मध्यस्थैः ।

विवादस्थानानि तावदाचेलक्यादीनि अमूनि मुख्यवृत्त्या द्वयोरपि पूज्ययोरनया रीत्या च,

**श्री धर्मसागरोपाध्यायाः—**

"देवदूष्यापगमे सर्वेषां जिनानामाचेलक्यम् ।"

**श्री विनयविजयोपाध्यायाः—**

"आद्यान्त्ययोः साधिकाद्वर्षादाऽऽचेलक्यं, शेषाणां सर्वेषां न तत् ।"

**समाधिरत्नः**–वर्त्तमानचतुर्विंशत्यपेक्षयाऽऽद्यान्त्ययोर्यावत्त्रयोदश मासान् सचेलकत्वं चातः परं, परेषां न तथेति सत्यपि सङ्ग तेनाऽनगारवदाऽऽचेलक्यं तीर्थाधिपानामौपचारिकं, किंतु वास्तवमेव, तच्चभवत्यसति वस्त्रे, असत्ता चापगमे देवदूष्यस्य **'असंत चेला य तित्थयरा सव्वे'** इति **पञ्चकल्पभाष्य** वचनात्, [६७]"तीर्थकरा जिना असच्चेलाः सन्तोऽचेला भवन्ति शक्रोपनीतदेवदूष्यापगमान्तर" मिति **पञ्चाशकसूत्र** वृत्त्यादिषु समुपलम्भाच्चेति ।

**श्री धर्मसागरोपाध्यायाः**–

"न मरीचिवचनमुत्सूत्रं कोटाकोटीसागरपरिमित संसृतेः ।"

**श्री विनयविजयोपाध्यायाः**–

[६८]**समाधिरत्नः**-[६९]"**दुब्भासिएण इक्केणे**"–त्याद्यविरुद्धवाक्यावलोकनाद् र्भाषितता नियतैव, वृद्धिश्चानन्तसंसारस्योत्सूत्रभाषिणो भवत्यनालोचकस्य तीव्राध्यवसायस्य च, स तु तत्र मन्द एव, '**इत्थंपि इहयंपीति**' वाक्येऽपिशब्दद्वयोल्लेखात्, व्याख्यातं [७०]चाभियुक्तैरावश्यकऽऽवृत्त्योरप्येवं, उत्सूत्र–दुर्भाषितयोश्च स्पष्ट एव भेदः, [७१]"उस्सुत्तो" "दुब्भासिओ" इत्यनयोः स्पष्टं पार्थक्यात् । "**उस्सुत्तभासगाण**" मित्यादौ चानन्तसंसारिता स्पष्टितैव सूत्रोत्तीर्णवादिनाम् ।

**श्रीधर्म०–'स्वर्गते वज्रस्वामिनि तुर्यं व्युच्छिन्नं संहननं ।"**

**श्री विनय०–"संहननचतुष्कं व्युच्छिन्नं ।"**

समाधिरत्नः—

**"दुष्कर्मावनिभिद्वज्रे स्वर्गमीयुषि ।**

**व्युच्छिन्नं दशमं पूर्वं, तुर्यं संहननं तथे–"**

ति परिशिष्टोक्तेः । "**तंमि य णिव्वुए अद्धणारायं वुच्छिण्णं**" इति [७२]वृत्तिचूर्ण्योः स्पष्टोल्लेखाच्च तूर्यस्यैवोच्छित्तिः, [७३]**तन्दुल वैचारिकादि** तु संहननावस्थानकालज्ञापकतयोपपद्यते ।

उपदर्श्योल्लेखमात्रेण मुख्यानि, समासान्तानित्यत्वादिसमाधेयानि तूपेक्ष्यन्ते, अवेक्ष्यते च '**इत्यार्यरक्षित स्वरूप**"मित्युपसंहारे **आर्यरक्षभिन्नानामार्यरक्षितानां** चरित्रं न्यस्तमित्यनुपयोगसाम्राज्यं, भवति च छद्मस्थस्यानाभोगो ज्ञानावृतिमत्त्वादिति न केषांचिदपि हानिरनाग्रहवतामिति ध्येयं सुधीभिः ॥

अत्र प्रथमं 'कल्प' शब्दवाच्यस्याचतया कल्पकर्षणकालादिज्ञापकतया चाचेलक्यादिः कल्पो दशधाऽऽख्याय श्रवणं तत्सहचारिचैत्यपरिपाट्यादिकमष्टमतपः सोदाहरणं च महाफलमिति दर्शितं ।

आचेलक्य[७४]विधानानवधारणेन '**ये सर्वथा नाग्न्यं प्रतिपन्ना**' न ते विज्ञाः, यतो न

महाव्रतनिदानं परीषहविजयो हिंसाविरत्यादीनामपि ³⁴तथाभावात्, "श्रीपार्श्वसन्तानीयाः श्वेतवाससोन्ये त्वन्त्यार्हत्सन्तानीया"³⁵ इति तु बालप्रलपितं, उभयेषामप्यनभिगमनीयं च ।

प्रारम्भे च **कल्पस्य 'पंचहस्तोत्तर'** इत्यत्र **श्रीजिनवल्लभोपज्ञं** षट्कल्याणकमतं **खरतराऽभिमताऽभियुक्तश्रीमद्धरिभद्रसूर्यऽभयदेवपाद**वचननिर्दर्शनेन निर्लोठितं ।

**कल्पकिरणावल्यां** चैतद्व्यतिकरे प्रवर्त्तनकारणम-नाभोगोऽ-भिनिवेशोऽ-पूर्वसाधनता स्वपक्षेणोत्सवारम्भ, आर्यिकाकर्णनं, तत्कृता स्खलना, हठः कल्याणकीयोत्सवे श्रीजिनवल्लभीय' इत्यादि सविस्तरमुद्दिष्टं **गणधरसार्धशतकाधारेण**, पश्चाद्वस्तुषट्कमिदमेव विवृण्वता च्यवन-कल्याणके शक्रस्य समृद्धिः, शृङ्गारः, सातोपभोगश्च वर्णितः, **'मग्नेनापि सुखातिशये तन्निदाने धर्म उद्यमोऽवश्यं विधेय'** इति ज्ञापनाय उपबृंहितश्च शक्रस्तवः, शक्रस्तवोऽप्यत एव हेतोः पठ्यते **प्रणिपातदण्डकः** 'विकृतं त्वेकदेशे नान्यदि' ति नाऽऽवश्यकाऽऽदि-प्रणिपात दण्डकानां **'दीवो'** इत्यादि प्रथमान्तपदर्राहितानां न शक्रस्तवता ।

यद्यपि च द्व्यशीतिरात्रिंदिवातिक्रमे गर्भसङ्क्रमः, प्रतिपादितं चात्राप्येवं, तथापि यच्छ-क्रस्तवा नन्तरमेव भणितिरविलम्बेन, सा चिरं दुःस्थव्यवस्था नोपनिबन्धनीयेतिहेतोः,

तत्त्वतस्तु त्र्यशीतितमे दिने, निर्जीर्णे नीचगोत्रे, चलितमासनं, दत्ते चोपयोगे ज्ञाते च तत्रावतारे कृतापरावृत्तिर्गर्भस्य, युक्तं चात एवाभिग्रहधारणमपि तदा । यतः परावर्त्तिते गर्भे चका-राऽऽक्रन्दं ज्ञातगर्भपरावर्त्ता स्वप्नचतुर्दशकापहारदर्शनेन **देवानन्दा**, दृष्ट्वा च तां तथाविधां संजातमातृभक्तिप्राग्भारोऽस्याद्भगवान्निश्चलः, जाता राजसचिवसख्यादिपरिवृता रत्नकुक्षिधारिणी **त्रिशला** आपन्नमूर्छा, दृष्ट्वा च दुःखवृन्दं विममर्श प्रभुः परिणामवैचित्र्यं, विदधे चाभिग्रहं 'यावन्मातापितृ जीवनं न प्रव्रजिष्यामी'–त्यात्मकं, वर्णयित्वा च पुण्यप्राग्भारसूचनप्रत्यलां दोहदततिं पूर्त्तिं च तस्याः, कर्मोदयादि³⁶ज्ञापकज्योतिश्चक्रचारज्ञानपुरस्सरं प्रमोदकारणानि चाख्यायोपनिबन्धुः पूज्यपादा जननमखिलकल्याणकरं निखिलाऽसुमतामनाहतैश्वर्यस्य भगवतः ।

महोत्सवं च ततः जनुषः श्रीमतोऽमराधिपविहितं निर्वर्णदिक्चक्रमहोत्सवमभिषेकस्य चालनं चाऽमराऽचलस्य, गार्हस्थ्यं चामलकीक्रीडा-लेखशालामोचनै-न्द्रव्याकरणोत्पत्ति-परिणयन-मातापितृ-स्वर्गम-बृहद्भ्रात्राऽऽग्रह-वर्षद्वयाऽवस्थान-सांवत्सरिकदान-प्रव्रज्यामहोत्सव पर्यन्तं स्पष्टं स्पष्टितवन्तः

निष्क्रम्यागारात्प्रतिपन्ने च प्रव्रज्यां स्वाभाविक उपसर्गसंसर्गोऽनेकधा जातः सोढश्च सर्वोपि महात्मना, तेन ख्यातश्च धन धान्य-राज्य-राष्ट्रवृद्धि प्रभृतेर्मातापितृदत्तं **वर्धमानाऽभि-धानं** परावृत्य **महावीराऽऽख्यया** त्रिदशगणैः परीषहोपसर्गेन्द्रियादिरिपुगणपराकरणाज्जातो यथार्थोऽनगारः ।

लक्ष्यतेऽनेन ग्रन्थकृतामभिमतमत्र यदुत न केवलो वेषो बहिस्त्यागो वा श्रामण्यं किंतु व्रतोच्चारण-तत्पालन-परीषहसहने-र्यासमितत्वाद्यलङ्कृतिरेव ।

मननीयं चाऽत्र निर्दिष्टमनगारवर्णनं समितिभिरीर्यादिभिर्गुप्तिभिः कषायैर्विलीनैरन्तर्बहिः-शान्तवृत्त्या आश्रवममत्व-किंचन-ग्रन्थो-पलेपरहिततया कांस्यपात्री-शङ्ख-जीव-गगन-वायु-शारदसलिल-पुष्करपत्र-कूर्म-खड्गिविहग-भारण्ड-कुञ्जर-वृषभ--सिंह-मन्दर--सागर-चन्द्र-सूर्य--जात्यकनक--वसुन्धरा हुताशनदृष्टान्तैः ( निरूपितया प्रतिबन्धस्य ) असत्तया च द्रव्य-क्षेत्र-काल-भावविषयया सततमात्म-श्रेयोऽर्थिभिः साधुभिस्तदनुसृतेर्मोक्षाङ्गतामभिमन्यमानैः । ज्ञान-दर्शन–चारित्राऽऽलय-विहार-वीर्याऽऽर्जव-मार्दव-लाघव-क्षान्ति-मुक्ति-गुप्ति-तुष्टि--सत्य-संयम-तपः-सुचरितोपसेवित-निर्वाणमार्गाश्वा-त्मभावनाकारणानि श्रीमत आख्यातानि ।

कैवल्यं च यथा यादृश, उत्पन्नं, जातश्च यथा लोको, गणधारिणश्चेन्द्रभूत्याद्या जीव-कर्म-तज्जीवतच्छरीर-पञ्चभूतसमानजातिनियम-बन्ध--देव-नारक-पुण्य-परलोक-मोक्षसन्देहभाजः कृताहङ्का-रादिप्रभवाऽवज्ञाप्राग्भारा अपि अबोबोधुः(!)सपरिवाराः, निर्वृतश्च भगवान् त्रिंशद्वर्षाणि गार्हस्थ्ये द्वादश साधिकानि छाद्मस्थ्ये त्रिंशत्कैवल्ये परिपाल्य मध्यमाऽपापायां कार्त्तिकामावास्यायां, जातं चान्तरं श्रीमतो देवर्द्धिगणिनः पुस्तकप्रचारिणोऽशीत्यधिकनवशतमानं, विहारश्च भगवतो जातो मगधा-वनौ प्राचुर्येण, चतुर्मास्योप्यत एवाऽस्थिक-चम्पा-वैशालिक-वाणिज्य-राजगृहीयनालन्द-बाहिरिका-मिथिला-भद्रिका-लम्भिका-श्रावस्ती-प्रणीतभूमि-प्रभृतिष्वेव जाताः ।

'जन्मपूतं क्षत्रियकुण्डं निर्वृतिपूता चेयं मध्यमा न तथा वर्णितवर्णनास्पद' मिति कश्चित्, तन्न चारु, नहि जैनैस्तावदभिमतोत्कृष्टता धनधान्यादिना, किन्त्वात्मसमृद्ध्यैव, प्राप्तर्द्धिवर्णना तु पुण्यप्राग्भारफलदर्शनाय, तथा च "चिच्चा रज्जं चिच्चा रट्ठ" मिति सूत्रमप्याऽऽह तदानीं तस्याऽ नल्पर्द्धिकतां, कथितश्च "सिद्धत्थे राये" त्यनेन च राज्याऽन्वयः "सिद्धत्थे खत्तिए" इति तु गर्भसंक्रम[९६]कारणतयैवोक्तं क्वचित्क्वचिदिति विमर्शनीयं विबुधैर्विगतमालिन्यैः ।

तदेवमाऽऽख्यायाऽन्तिमार्हच्चरितमाऽऽसन्नोपकारित्वेन पश्चानुपूर्व्याऽभिप्रेतत्वाद्वा जिनचरिता-ऽऽख्यानस्य श्रीपार्श्वप्रभ्वादिचरितानि प्रारब्धानि व्याख्यातुम् ।

तत्र श्रीपार्श्वप्रभु-नेमिजिनयोश्चरिते आवेद्य शेषाणामजितान्तानां विंशतेरन्तराण्ये-वाऽऽख्यातानि विस्तृतिभिया कुतोऽपि वाऽन्यस्मात् कारणात्, तच्च्यवननक्षत्रादि तु सर्वमस्त्येव चाऽऽवश्यके [१०]प्रथमाऽनुयोगप्रधाने वर्त्तमानाऽवसर्पिणीवरव्यवहारप्रवर्त्तकत्वेन चाऽऽविर्भावितं श्रीयुगादिनाथचरितमन्ते सविस्तरं ।

तत्र श्रीपार्श्वप्रभुवृत्ते तपोऽज्ञानावष्टब्धं, तत्फलं, तद्वतां भवान्तरानुयायिवैरवत्ता, सम्यग्दृक्-प्रभावात्तद्वतां श्रेयश्च, श्रेयमन्येषामुपद्रवकारिणामपीति ।

श्रीनेमिजिनेश्वरचरिते परिग्रहप्रसक्तानां भयं स्वजनाद् विबुधवाक्यादप्यनिवृत्तिः शङ्कायाः, प्रेरणं दाराणां विवाहादावविधर्मिष्ठानां, तादृशेऽपि सदयताऽऽशयदार्ढ्यं निर्लोभताचिंतनं, भयास्पद-

स्य सोदरस्यापि बलहीनत्वाऽऽकाङ्क्षोपायाऽन्वेषणा, तस्य निष्कामता, प्रव्रज्या, पत्यनुयायिता सत्याः, विषयवासनामत्तवाचालनरवचनचेष्टाप्रसंगेप्यचलतः शीलप्रष्ठानामिति ।

चरिते **युगाऽऽदीश्वरस्य** सृष्टिव्यवहाराऽऽरम्भो, राजादीनामुभयलोकहिताऽपेक्षया शास्तृत्वं, राज्यस्य प्रजोपकारिता, कला-महिलागुणानां चोद्गाहतृता, निर्वाणाऽभिकाङ्क्षिणां परिहारो राज्याद्यृद्धेः, निरभिष्वङ्गताऽऽहारे देहे परिजने यत्र कुत्रापि च, मोचनं च भावदयापरीतान्तःकरणतया स्वजनानामपि, उपदेशो राज-रङ्कसमतया, निःश्रेयसायोचितकारिता चोत्तमानामनुत्तमपथप्रवृत्तानां, भक्तिश्चोपकारप्रवराणां कलेवरस्यापि पवित्रपुद्गलानां परिग्रहः श्रेयस्कामानामित्यालोचनीयं विवेकलोचनानां ।

तदेवं निगदिते निरन्तरोपकारश्रेणिसाधितजन्तुजातकल्याणानां चरिताभिधान आद्ये वाच्ये वाच्ये द्वितीये च स्थविरावलिलक्षणे, आरभ्य **त्रैशलेया**द्यावच्छ्रीदेवर्द्धिगणिनस्तावत्स्थूललक्ष्याः स्थविरावल्यः प्रोक्ताः, अनेकानां शाखानां कुलानां च तिरोभूतत्वेन यथार्थतयाऽलक्ष्यमाणत्वात् न यथावल्लक्ष्यन्तेऽधुनातनाः (तनाः) ।

विशेषतोऽवधारणीयं चेह **श्रीमज्जम्बूस्वामि**चरिते संस्कारप्राबल्यं, शीलसन्नाहयुतता, प्रतिबोधशक्तिश्चाऽप्रतिहता ।

वर्ण्यमाने **श्रीस्थूलभद्रे** भगवति ब्रह्मचर्यसंकल्पदार्ढ्यमागमानुसारिगुरोर्महिमाऽव्याबाधा चतुर्मासीस्थितिः, संसर्गेपि योषितोऽस्खलिता शीलसंपत्तिः, प्रतिबोधशक्त्या मार्गावतारस्तस्यास्तया च रथकारस्य, प्रतिपातः सिंहगुहाश्रयिणो दर्शनमात्रात्, क्लेशपरंपराऽसहनं व्रतस्थितिश्च ।

श्रीमति **वज्रस्वामिनि** तु प्राग्भवस्मृतिर्बाल्येऽपि वैराग्यं, मातुरुद्वेगाय रोदनं, सभायां वादो, रजोहरणग्रहणायाऽन्याऽनादरः, पदानुसारिता, तीर्थप्रभावना, संघवात्सल्यमुपयोगकुशाग्रता च । आचार्ये **आर्यसमिते** योगचूर्णप्रभावः, **प्रियग्रन्थे** च मन्त्रचमत्कार इति ।

ततो वाच्ये तृतीये पर्युषणाकरणसमाचारी पञ्चाशतैव दिनैरिति निर्णयस्तत्र शास्त्रीयः, चतुर्मासीयाशन-विकृति-ग्लानवैयावृत्त्य-गोचरचर्या-गृहाग्रवस्थान-सङ्खडी-लोच-वर्षागमनो-पाश्रय-मात्रकाऽऽदिग्रहण-क्षमणप्रभृतिः प्रकटीचक्रे प्रकटयशस्कैः पूज्यैरत्र ।

विद्यन्त एवाऽनेकाः प्रस्तुतटीकाव्यतिरिक्ताष्टीकाः, परमाधुनिकसाधूनां न तथाऽऽनन्दप्रदाः प्राकृताऽऽदिप्राचुर्यात्ता इति प्रार्थिताः पूज्या **विबुधविजयैः श्रीरामविजयपादारविन्दमधुकराभैः** नूतनवृत्तौ, प्रार्थनाभङ्गभीरुभिरारब्धा पूज्यैः शोधिता चेयं **श्रीभावविजयगणिभिः श्रीविनयविजयोपाध्यायसपक्षैः** । वाचनप्रथा चाऽस्याः पर्युषणापर्वणि प्रायः सर्वत्रेति देवचन्द्रलालभाई जैनपुस्तकोद्धाराख्याल्लक्षद्रम्मात्मकात् मुद्रितायाश्चाप्यस्या मुद्रणमारब्धमस्माज्ज्ञानकोशाचदध्यक्षैः ।

विद्यन्तेऽस्य चूर्णिर्मागधी भाषामयी, किरणावली-दीपिके इति च वृत्ती, अन्तर्वाच्यानि चाऽपरिमितानि, खाऽऽयख्याताः कल्पलताद्याश्च वृत्तयोऽष्टाऽष्टादिव्याख्यानमय्यश्च, सन्त्येवात्र तत्तन्मताऽनुगम्या इति विरम्यतेऽथातःक्षन्तव्यमुक्तं चेदलीकं मतिमोहाऽऽदिना कृपाऽभिलाषुके मयि विधाय कृपां श्रीमदकलङ्क-देवपूज्य-चतुर्वर्ण-श्रमणसङ्घपादपङ्कजचञ्चरीके ॥

मास्याषाढे सिते वर्षे ★ द्वीपरसनन्देन्दुगे ।
आनन्दोऽनन्तजिद्भक्तश्चतुर्दश्यां जगाविमम् ॥१॥

## संसारिजीवानामिच्छा

अभिलषन्ति समेऽपि च सौख्यं,
　　दुःखेन वर्जितमनन्तम् ।
ईप्साऽपेतं तत्परमृते-
　　ऽव्ययं न भुवि कुत्राऽपि ॥

\+ + +

## ममता-त्यागशिक्षा

तन्न विरहय्य चरणं,
　　सत्यपि युगले विबोध-दर्शनयोः ।
चरणार्हो न च सममः,
　　का वार्त्ता बाह्यलुब्धस्य ? ॥

पू० श्री आगमोद्धारकाऽऽचार्यप्रणीत-
**श्री दानधर्म पञ्चपञ्चाशिका-**
प्रकरण श्लो० ३५-३६

---

★ द्वीप षड्नन्द चन्द्रगे

श्रीकल्पसूत्रवृत्ति—

सुबोधिका

# प्रस्तावना-टिप्पणम्

( आनन्द-लहरीसंज्ञम् )

१. अद्वितीयश्चासौ महिमा च, तद्रूपरत्नानां रत्नाकरस्तम् इति विग्रहः। प्रतिपर्युषणायामाबालगोपाल-प्रथितकीर्त्तिभाक्त्वेनाऽऽजैनकुलोत्पन्नसामान्यश्राद्धोत्तमयतीनामवश्यश्रवणीयत्वेनाऽक्षरशः यस्याऽपूर्व-जनमनश्चमत्कृत्याऽऽधायकमहिमा समेषां प्रथितोऽस्ति, तस्य सूचैतत्पदेन व्यज्यतेऽत्र पूज्यवर्यैः श्रीमद्भिरागमोद्धारकैः।

२. एतच्छब्दस्य मुख्यो ह्यर्थ उदारत्व-दातृत्वादिरूपो वर्त्तते, परमत्र लाक्षणिकत्वेन बुद्धिगतौदार्यत्वं विवक्ष्य तद्वत्सु मूर्धन्याः=शेखरा इत्यर्थः करणीयः।

३. श्रेयःभूतं=परमकल्याणरूपं यत् निःश्रेयसम्=मोक्षाऽऽख्यं, तस्य निबन्धनानां=दर्शन-ज्ञान-चारित्राणां निदानभूतं यत् इति विग्रहः।

४. 'प्रणेतृ' शब्देनाऽत्र सङ्कलनाऽपर्याय-निर्यूहणा'-प्रणयनरूपं कर्त्तृत्वरूपमवबोध्यम्। मौलिकी रचनाऽऽदिरूपं न सङ्गच्छते श्रीमद्भद्रबाहुस्वामिनाम्, दशाश्रुतस्कन्धाऽष्टमाऽध्ययनतया पूर्वगतोद्धृततया चाऽस्य महामहिमशालिनः श्रीकल्पसूत्रस्य 'पर्युषणाकल्पा'ऽपराऽऽख्यस्य प्रथिततमत्वात्।

५. अयं हि शब्दः आगमिकशैलीपरिचितानां नह्यभिनवः, यतोऽस्मिन्नेव श्रीकल्पसूत्रे तीर्थकृतांऽतत्तच्छासनोपज्ञमुक्तिमार्गस्य वहमानत्वनिर्देशप्रसंगे 'पट्टपरम्पराऽर्थे 'युग' शब्दः "युगान्तकृद्भूमि" पदद्वारा प्रयुक्तोऽस्ति, ततश्चात्र "षष्ठपट्टधरत्वेन"-ति तात्पर्यगर्भोऽर्थोऽवबोध्यः।

६. वीरनिर्वाणसत्कद्वितीयशताब्द्यामित्यर्थः।

७. 'रजनीचर' शब्दो हि सामान्यतः राक्षसार्थवाची वर्त्तते, परमत्र तु सामान्यतः रात्रिविचरणशीलत्वरूपाऽर्थविवक्षया रात्रौ येषां प्रचारः साहजिक एतादृशपापव्यापाराऽऽसक्तदुर्मतिजनतारूपतात्पर्ये 'रजनिचर' पदं ज्ञेयम्।

८. एतत्पदेन सम्पृक्तत्वार्थो ज्ञेयः।

९. कालश्च परिश्रमश्चेति कालपरिश्रमौ, आयतौ विस्तीर्णौ=बहू च तौ कालपरिश्रमौ चेति आयतकालपरिश्रमौ, ताभ्यां लभ्यानि, एतादृशानि यानि पूर्वाणीति समासं कृत्वा तेषां लाभेन त्रिकलानामिति सम्बन्धयोजना कार्या।

१०. इदं हि पदम् समस्तार्थवाचि अत्रापि ज्ञेयम्।

११. 'अवम' शब्दो हि नवीनवाची अप्यस्ति, ततश्च नास्ति अवमं यस्मात् इति विग्रहः। अथवा हीनाऽपरपर्यायोऽप्यऽ'वम' शब्दोऽस्ति, अतश्च 'अनवमा'-दित्यस्य 'श्रेष्ठात्' इत्यप्यर्थो भवेत्।

१२. पर्युषणापर्वणि प्रतिवर्षं वाच्यमानायां श्रीकल्पसूत्रसुबोधिकावृत्तावन्यत्र च बहुत्र ग्रन्थेषु यथोत्तरं द्विगुणहस्तिप्रमितमषीपुञ्जविलेख्यत्वं पूर्वाणां व्यावर्णितमस्ति, ततश्च यथोत्तरं द्विगुणवृद्धया नवमपूर्वस्य षट्पञ्चाशदधिकद्विशत ( २५६ ) हस्तिमितमषीलेख्यत्वमापद्यते, अनन्तरपूर्वस्याष्टमस्य हि यथोत्तरवृद्धयाऽष्टाविंशत्यधिकशत १२८ हस्तिमितमषीलेख्यत्वात् ।

१३. आम्नाऽभिजनाऽभिसन्ध्यनुसारं पञ्चधनुःशतमितत्वमेतेषां हस्तिनामभिमन्तव्यं सुज्ञैः ।

१४. एषा हि सार्द्धगाथा श्रीअभिधानचिन्तामणौ (देवाधिदेवकाण्ड श्लो० ३३-३४½) समुपलभ्यते ।

१५. लोकश्च अलोकश्च लोकाऽलोकौ, तयोरालोकः=ज्ञानं, तस्याऽऽभोगः=विस्तारः तस्मै प्रत्यलं=समर्थं एतादृशं यत् केवलं=केवलज्ञानं तेनाऽलङ्कृता ये महर्षयः=केवलिनः, तेषां तुल्यया प्ररूपणया रुषितत्वं सहितत्वं तस्मात् इति विग्रहः ।

१६. दशाश्रुतस्कन्धसम्बन्धिन्यामिति भावः, 'चूर्णौ' इत्यत्राऽस्य सम्बन्धः ।

१७. श्रीस्थानाङ्गसूत्रे प्रथमस्थाने (सू० ७५ पत्र ५६ पृ० १ पं० ८) समुपलभ्यते ह्ययमुल्लेखः ।

१८. सर्वसत्त्वोपकृतिदक्षानामागमानां पुरुषाऽऽकारेण स्थापनायाः 'नन्दिचूर्णि' गाथया संसूचितायाः पूज्याऽऽगमोद्धारकपादैः सर्वप्रथमं चित्रापितायाः सूर्यपुराऽऽगममन्दिरभूमिगृहे स्थापितायाश्च "आगमपुरुषे"-तिसंज्ञया प्रथितायाः अत्र विवक्षाऽस्ति ।

आगम-पुरुषसम्बन्धिमौलिकस्वरूपजिज्ञासुभिः टिप्पणीसम्पादकस्य गूर्जरभाषालिखितं "श्रीआगमपुरुषनुं रहस्य" संज्ञपुस्तकमवेक्षणीयं धीधनैः ।

१९. श्रीकल्पसूत्रचरमभागीयसूत्रोल्लेखोऽयम् ।

२०. शङ्काऽर्थक "आरेका" पदवत् इदमपि पदं शङ्कार्थकमेवेति विज्ञायते ।

२१. एतदपि 'श्रीकल्पसूत्र' चरमसूत्रीयमिति ।

२२. एतस्मिन्=प्रकृते 'श्रीकल्पसूत्रे' ।

२३. नवमपूर्वस्थानामित्यर्थः ।

२४. श्रीकल्पसूत्रम् ।

२५. चरमसूत्रनिर्दिष्टरूपेण श्रीमहावीरप्रभुनिर्दिष्टम् ।

२६. 'प्रज्ञापना' सूत्रं हि स्थविरैऽऽरार्यश्यामाचार्यैः सङ्कलितं, तथापि उपयोगिनां तेषां तेषां सूत्राणामानुपूर्वीश अक्षरानुपातिसमावेशे कृतेऽपि कुत्र कुत्र यथार्हं सङ्कोचस्यापि कृतत्वात् 'विरचित'-मितिप्रथितेऽपि समीचीनत्वमवधार्यम् ।

२७. उच्छृंखलैः=कुतर्कबलजीविभिः वादिविशेषैः प्रेरितैः इति भावः ।

२८. श्रीवीर-पार्श्व-नेमि-ऋषभतीर्थकृतां हि चरितानां प्रान्त्यभागे समुल्लिखितेषु सप्तमे हि व्याख्याने श्रीनेमिचरित्रादूर्ध्वं श्रीऋषभचरित्रादर्वागुल्लिखितेषु जिनान्तरेषु चेत्यर्थः ।

२९. अष्टमे हि व्याख्याने ।

३०. श्रीकल्पसूत्रस्य पुस्तकारूढीकृतस्येत्यर्थः ।

३१. मथुरापार्श्ववर्त्तिकंकालीटीलासंज्ञप्रोत्तुङ्गलघुगिरितुल्यप्रदेशखननलब्धस्य ब्रिटिशगवर्मेंट व्यवस्थापितस्य प्रचुरतरविशिष्टैतिह्यसामग्रीजातस्य समुल्लेखोऽत्राऽऽगमावतारैः श्रीमद्भिर्विहितोऽस्ति ।

३२. नैकप्राचीनशाखा-कुल-गण सूचकत्वेन प्रामाणिकैतिह्यसन्दर्भसङ्ग्राहकत्वेन शिलालेखस्यापि पूज्यत्वाऽर्थ-सूचकमिदं विशेषणं सापेक्षतया सङ्गमनीयमत्र ।

३३. तस्याः=आचार्यपञ्चशत्याः विश्वासं=प्रामाणिकत्वेन निश्चितिं ऋते=विना अर्हता=तीर्थकृता आख्या-तोऽपि=निरूपितोऽपि आगमः=श्रुतज्ञानं विश्वासं='पुस्तकारूढो हि आगमः प्रामाणिक' इति प्रथितिं न अर्हेत्=नौचितत्वेन मान्यो भवेदिति अर्थानुसारिणी अन्वययोजना पदानामवबोध्या ।

३४. अन्यथा=वाचनासमये सङ्गतानामाचार्याणां पञ्चशत्याऽर्पितया प्रामाणिकत्वमुद्रया विश्वासाऽर्हाणां पुस्तकाऽऽरूढाऽऽगमानां प्रामाणिकत्वव्यवस्थारूपवस्तुस्वीकाराऽभावे हि तत्रभवन्नाम्नैव=श्रीमत्पूज्य-देवर्द्धिगणीऽऽक्षमाश्रमणनाम्नैव सर्वं=पुस्तकारोह्यमाणं श्रुतम् आविष्कृत्य=प्रतिपाद्य स्वमनीषाकल्पि-तं=स्वमतिकल्पनाप्रथितम् प्रख्यापयेत्=माननीयं भवेत्"

इति दुरूहाऽनिष्टाऽऽपत्तिप्रदर्शनेन पूज्याऽऽगममर्मज्ञाऽऽचार्यपादैः श्रीदेवर्द्धिगणिपादानां श्रुतस्य पुस्तकारोहणादिकं तत्कालीनाऽऽप्ताऽभिजनाऽऽचार्यपञ्चशतीमान्यतरत्वं संसूचितम् ।

३५. यथा चाऽन्ययूथिकैः=दर्शनान्तरीयैः पुराणानां स्वमतिकल्पनया विरचनां कृत्वा तत्तदाऽऽप्तजनाऽभि-सन्धिमूलकत्वव्यवस्था विशकलिता, तथा चात्र जातं भवेत् इति तर्कोत्प्रेक्षाऽत्र बोध्या ।

३६. पर्यवसाने=अष्टमव्याख्यानप्रान्त्यभागे स्थितं स्थविरावल्याः भेदरूपं=पृथगर्थसूचकं श्लोकयुग्मं पुस्तका-ऽऽरोहणाऽऽगमवाचनाकारकश्रीयुतदेवर्द्धिगणिपादपरिचयावहमिति तात्पर्यगमकविग्रहाऽऽधारेणाऽत्र सङ्गतिः कार्या ।

३७. 'तत्' पदेनाऽर्वाचीनत्वाऽभावः प्राचीनत्वं वाऽवबोध्यम् ।

३८. इदं हि पदं नवमव्याख्यानसूचकं विज्ञेयम् ।

३९. सद्गतेः निदानरूपे सदाचारे लोलुपाः सततमुद्युक्तास्तानिति विग्रहमत्र सम्प्रधार्य सदाचारपालन-निबद्धकक्षानिति भावार्थोऽत्र विज्ञेयः ।

४०. भूयोभूयः लुप्यन्ते कर्मादिभिः जीवाः ययेति लोलुपा वासना, सा न विद्यते येषां ते इत्यलोलुपास्तान्, मोहोद्रेकरूपवासनारहितानित्यर्थः ।

४१. सुष्ठु धर्मो विद्यते यस्य स इत्येतादृश'सुधर्मा'पदेन लक्षणाविधया प्रथमदेवलोकस्य तद्वासिदेवानां तदिन्द्रस्य वा ग्रहणं विधायोपलक्षणात् सर्वैः देवैः अंनते अंह्रिपद्मो यस्य सः एतादृशसुधर्मा=सुध-र्मास्वामीसंज्ञपंचमगणधरः स आदौ यत्र, तथा देवर्द्धिगणिक्षमाश्रमणः पर्यवसाने यत्र तानिति समा-सेनाऽत्राऽर्थसंयोजना गमनीया धीधनैः ।

४२. नवमव्याख्याने 'पर्युषणाव्यावर्णनमादौ प्रतिलेखनोद्देशश्चान्ते' इति-सूचकमेतत् पदमत्र ।

४३. एतद्धि पदमग्रेतन "अनन्ता..................धर्माऽऽधारस्य वर्षाऽऽवासस्य" इत्येतेन सह संयोजनीयं ।

४४. अर्हत्ता=अर्हतीति अर्हन्=योग्यस्तस्य भावः अर्हत्ता=योग्यता तस्य अवलोकनेन, एतत्पदस्य वर्षावासस्ये-त्यनेन सह सम्बन्धः गमनीयः ।

४५. "निशीथमर्द्धरात्रमुच्यते" इत्यभिधानसंग्रहोक्तेः प्रस्तुतकल्पसूत्रस्य दशाश्रुतस्कन्धगतत्वहेतुकच्छेद-सूत्रीयगोपनीयत्वं वर्षावासस्थितिकल्पस्य पञ्चरात्रिकमर्यादया प्रारभ्यमाणत्वं संसूच्यते ।

४६. एतद्धि पदं बुद्धिरूपपिटकतोऽन्यूनपदमात्राबिन्दुकं यथावस्थितमेव मूलसूत्रस्य श्रद्धाबहुलं पठनं विधेय-मिति सूचयति ।

४७. तत्पराणामित्यर्थः ।

४८. कान्तं=महानन्दं यत् पदं मुक्तिरूपं तं प्रदत्ते योऽसौ इति विग्रहः ।

४९. अश्रद्धानमूलकयोगाऽकरणरुचिमन्तो हि तृणेनाऽऽत्मानं चिच्छादयिषुचौरवद्धि कूटयुक्तिप्रदर्शनमेवं कुर्वन्ति यत्—"योगवहने नीवीकल्प्यवस्तूनामाधाकर्माऽऽदिदोषदुष्टत्वं तत्तत्क्रियाऽशुद्धिर्वसतिशुद्धेरभावः, कालग्रहणादिविधिसत्यापनाभावःसंघट्टाऽऽउत्तवागयग्रहणमर्यादाशैथिल्यमित्यादिदोषापत्तिर्बहुधे"-त्येतत्सर्वमसारमिति पूज्यागमप्रज्ञावतंसैरभिव्यज्यते ।

५०. वैदिकमतावलम्बिभिर्हि यज्ञादिषु मन्त्रसंस्कृतमांसादेरभक्षणे प्रत्यवायापत्तिः प्ररूप्यते, ततश्च प्रत्यवायभियाऽपि कैश्चित्तद्भक्षणेच्छुभिः मन्त्रसंस्कृतत्वादिधिया निर्दोषत्वमभिमत्य मांसाद्युपभोगः क्रियते, तद्वदत्र नीवीमध्ये आधाकर्माऽऽदिदोषदुष्टमुपभोज्यमेवेति न जहांगीरीयाज्ञा कैरपि बलादापाद्यते अतः एतद्व्याजेन योगेऽश्रद्धानं तु प्रबलमोहोदयाभिव्यञ्जकमिति भावः ।

५१. अयोगं=योगवहनरहितमित्यर्थः ।

५२. आवश्यकसूत्रव्याख्या सर्वाऽऽगमानां प्राथम्येन लभ्यते, तस्या अपि ज्ञानं धारयतां सामान्यसाधूनामप्ये-तत् सुविदितं यत्—

"गुरूणां बहिर्भूमिगमनप्रसङ्गमुपलभ्य साधूनामुपधित्रिण्टलिकाव्रजं साधुगणत्वेन संनिवेश्य तत्पुरो गम्भीरध्वनिना विविधाऽऽगमवाचनाऽभिनयं नाटयतां प्रभावकप्रवराणां श्रीवज्रस्वामिनां वाचनामभिलाषुकैः समस्तसाधुभिः वाचनाऽऽचार्यपदप्रदानद्वारा वाचनादानाऽनुग्रहं समभिलषद्भिः विहिताया अनुनयपूर्णप्रार्थनायाः श्रीमद्भिः गुरुवरैः योगवहनपूर्वं गुरुनिश्रया श्रुतानध्ययनेन हेतुनाऽस्वीकारः कृतः"

इत्येतत्प्रसङ्गस्याऽत्रोल्लेख ऊहनीयः समुपासितगुरुचरणैर्विद्वद्भिर्प्राज्ञवरैः ।

५३. 'विहित' मित्यर्थः । एतत्पदस्याऽग्रेतन 'वाचन'-मित्यनेन सहाऽन्वयो विज्ञेयः ।

५४. 'तत्' पदेन पुत्रशोकार्त्तस्याऽऽनन्दपुराऽधिपतेर्ध्रुवसेनस्य निर्देशोऽत्र विज्ञेयः ।

५५. अनु=अनुकूलमत्राभिमुख्येन अक्षाणां=इन्द्रियाणामिति विगृह्य समक्षं=प्रत्यक्षमित्यर्थोऽत्र विज्ञेयः ।

५६. उत्=उत्कर्षेण गुरुनिश्राऽऽदिना ऊढाः=विहिताः तत्तदनुष्ठानाऽऽसेवनाऽऽदिना योगाः=श्रुतोपचाररूप-तत्तत्तपोऽनुष्ठानानि यैरितिविग्रहद्वारा सम्यग् यथामर्यादं योगवहनकारिसाधूनामुपलक्षणमत्र विज्ञेयम् ।

५७. 'वृति'-पदेन धान्याऽऽदिरक्षणार्थं अभिक्षेत्रं कृषकैः दीयमानकण्टकाद्यनभिभवनीयवस्तुजातभित्तिरूप-लक्षिता, या च भाषायां 'वाड़' इति कथ्यते ।

अत्र चैतत्पदरूपकेण पूज्यानां श्रीमतां धर्मसागरोपाध्यायानामविच्छिन्नपरम्पराश्राजिजिन-शासनरक्षाप्रयोजकत्वमभिव्यज्यते ।

५८. एतेन वाक्यसन्दर्भेण प्रस्तुतायां वृत्तौ कुत्रचित् दृश्यमानसागरशाखीयविदुषां तेजोऽभिभवकरणे-हाऽऽभासं ध्वनन्ती तात्त्विकपर्यालोचनादक्षाणां सुधियां रूचिवैषम्यकारिणी मिष्टकर्करिकान्यायेनाऽऽ-ज्ञानां बुद्धिभेदकारिणी चापेक्षावशंवदत्वपरिहानसूचिका मार्मिकवाक्यपद्धतिः सूचितेत्यस्वारस्यगर्भं सूच्यतेऽत्र श्रीमद्भिरागमावतारैर्ध्यानस्थस्वर्गतैरागमोद्धारकपादैः ।

५९. अत्र खलु 'आवेश' पदेन तत्तन्निमित्तबलेन सरागसंयमाऽऽदिहेतुना साहजिकोत्पद्यमानोर्मिव्रातरूपा ऽप्रशस्तचित्तवृत्तिसूचनं ज्ञेयम्, तेन च सानुबन्धद्वेषस्य विवक्षा जलयष्टिन्यायेन च प्रासंगिकोत्पद्यमा-

नाशुभचित्तवृत्तीनां तत्तन्निमित्तापाये विलीयमानत्वप्रसिद्धिमुपजीव्य प्रस्तुतवृत्तिकर्तॄणां चित्तदोषे ज्ञातेऽपि महापुरुषत्वाऽऽघातः श्रूयते ।

६०. 'तत्' पदेन पूर्वनिर्दिष्टद्वेषाऽऽवेशपरामर्शोऽत्र ।

६१. 'यथा-तथा' पदेनाऽत्रोर्मिमूलकाऽसम्बद्धाऽविचारितपदरचनासम्भवेनाऽत्राऽसङ्गतिप्रायहेतूपन्यासाऽऽदिसूचनं ज्ञेयम् ।

६२. सकलेषु निःश्रेयसेषु=उत्कृष्टकल्याणरूपेषु अभिलषणीयं यत् अव्ययपदं मोक्षरूपं तस्य योऽध्वा रत्नत्रयीसमाराधनरूपस्तस्याऽऽराधने कल्पः=समर्थः यः कल्पः=पर्युषणाकल्पाऽपराऽह्वदशाश्रुतस्कन्धीयाऽष्टमाऽध्ययनरूपकल्पसूत्रं, तस्य समग्रं=रहस्यरूपं यत् सत्त्वानां क्षामणं, तस्य प्राधान्यमुद्दिश्य स्वदोषाः परगुणाः ख्याप्यन्ते यत्रेति समाससङ्गतिरर्थानुसारिणी विज्ञेया ।

यस्मिन् हि पर्वाधिराजे सकलजीवानां क्षामणं मुख्यं तत्रैव परमपवित्रकल्पसूत्रश्रवणप्रसङ्गे आवेशमूलकाऽसम्बद्धप्रलापरूपसन्दर्भेण सुप्तद्वेषसर्पोत्थानं हि सर्वथा अनुचितमिति परमार्थः ।

"अन्यदिने कृतं पापं, पर्वदिने विछुट्यति ।
पर्वदिने कृतं पापं, वज्रलेपो भविष्यति ॥"

-इति प्रथिता गाथाऽत्र स्मर्त्तव्या ।

६४. 'अपि'-पदं हि पर्वदिने कषायोदीरणस्यानौचित्यहेतुना सह पर्वदिनेऽनुचितकृत्यस्य दुरन्ततमत्वरूपहेतोरभ्युच्चयं निर्दिशति ।

६५. 'एतत्'-पदेन पर्वदिनेषु कषायोदीरणाऽऽदिपूर्वोक्तहेतुपरामर्शः ।

६६. 'परमभावे'=जीवनशुद्धिअंगभूते परमार्थाऽऽलोचने अभिपतन्ति ये ते इति विशुद्धसल्लक्ष्यशालिनामितिभावः ।

६७. श्रीपंचाशक प्रकरणे (पंचा० १७ गा० ११ वृत्तौ) समुपलभ्यते हीदम् ।

६८. अत्र हि वृद्धेर्नियमस्याऽभाव इति मध्यमपदलोपिसमासविवक्षा कार्या, तेन सर्वेषामुत्सूत्रभाषकाणामानन्तसंसारो भवेदेवेति न नियम इति विज्ञेयम् ।

६९. इयं हि गाथा आवश्यकनिर्युक्तौ (गा० ४३८) एवमुपलभ्यते, तथाहिः-

"दुब्भासिएण इक्केण, मरीई दुक्खसायरं पत्तो ।
भमिओ कोड़ाकोड़िं, सागरसरिसणामधेज्जाणं ॥"

७०. परमपूज्यत्वसूचकेनैतत्पदेन पूज्याऽऽचार्यहरिभद्रसूरीणां श्रीयुतमलयगिरिसूरीणां च परामर्शोऽत्र विज्ञेयः ।

७१. एते हि पदे श्री आवश्यकसूत्रीयप्रतिक्रमणाऽऽख्यचतुर्थाध्ययनगत "इच्छामि ठामि काउस्सगं जो मे देवसिओ" इति दैवसिकाऽतिचाराऽऽलोचनसूत्रगते विज्ञेये ।

७२. अत्र च प्रकृतविषयसङ्क्रामकशैल्या विचार्य 'श्रीआवश्यकसूत्रसम्बन्धिन्यो' रित्यध्याहार्यम् ।

७३. श्रीतंदुलवैचारिक (सू० १५) वृत्तौ एवं हि पाठ उपलभ्यते यतः-

"× × × तथा श्रीवीरात् ५८४ वर्षे श्रीवज्रे
दशमं पूर्वं संहननचतुष्कं च गतमिति."

एतद्धि वर्णनं खलु संहननचतुष्ककालाऽवस्थितिज्ञापनपरमाऽऽवश्यकचूर्णि-वृत्ति-श्रीत्रिषष्टिशलाकापुरुषचरिताऽऽदिग्रंथोल्लेखाऽनुरोधेन सङ्गमनीयम् ।

अन्यथा चूर्णिकृदाद्यभिमतेन सह विरोधोद्भावनं स्यादिति सद्गुरूत्तंसाऽऽगमतत्त्वतलस्पर्शिगीतार्थमूर्धन्याऽऽगमोद्धारकाऽऽचार्यमतल्लिकानां हृद्गतः गर्भार्थः समन्वयशैल्योहनीयः ।

७४. आचेलक्यविधानस्य यत् मर्म-रहस्यं तस्याऽनवधारणेनेति मध्यमपदलोपिसमासमुपयुज्याऽत्र सङ्गतिः कार्या ।

७५. 'तथा' पदेन महाव्रतनिदानत्वपरामर्शोऽत्राऽवबोध्यः ।

७६. एषा हि मान्यता गच्छाऽभिनिवेशवतामुपकेशगच्छीयानां स्वगच्छप्रतिष्ठाविवृद्धीच्छावतां स्वाभिमत्येन विकल्पिताऽस्ति ।

७७. सुखातिशये मग्नस्याऽपि धर्मोद्यमस्याऽवश्यंविधेयत्वाच्छक्रस्तवस्योपबृंहत्वादेव हेतोरित्यर्थः ।

७८. ज्योतिश्शास्त्रानुसारेणलौकिकजनैरापादितमुख्यत्वनिरासायाऽत्र "ज्ञापक" पदं प्रयुक्तं श्रीमद्भिः ।

एतेन च व्यज्यते यत्–ज्योतिश्शास्त्रं हि कर्मोदयादेर्ज्ञापकमेव, न हि तेनैवाऽऽपद्यते बलात् किमपि, आपद्यमानसुखाऽऽदिकं हि प्राक्कृतकर्मोदयाऽपेक्षमित्यतः ज्योतिःशास्त्रसूचितविषमग्रहाऽवस्थितिज्ञानेन शोकादेरकरणीयता प्रशस्येति ।

७९. ब्राह्मणकुलस्य भिक्षाककल्पकुलत्वेन तदपेक्षया विशिष्टतां सिद्धार्थनरेन्द्रकुलस्य निरूपयत् "खत्तिए" पदं जात्यकुलसूचकं विज्ञेयमिति पूज्याऽऽगमप्रज्ञाः सूरिवर्याः दध्वनुरत्र ।

८०. अयं हि शब्दः दृष्टिवादस्य भेदपञ्चकीयतृतीयभेदाऽनुयोगाऽऽन्तरभेदयोः प्रथमानुयोग-गण्डिकानुयोगरूपयोः सूचकःसन् कथा-चरिताऽऽदिग्रन्थानां प्रथमानुयोगत्वेन रूढसंज्ञां समर्थयति ।

८१. समर्थ्यते चैतत् ग्रन्थप्रान्तभागीयप्रशस्तिगतेनाऽमुना श्लोकेन, तथाहिः–

"श्रीरामविजयपण्डितशिष्य–श्रीबिजयविबुधमुख्यानाम् ।
अभ्यर्थनाऽपि हेतु–र्विज्ञेयोऽस्याः कृतौ विवृतेः ॥"

८२. एतद्धि व्यक्तीभवति प्रशस्तिगतेनाऽधस्तनश्लोकद्वयेन, तथाहिः–

"समशोधयंस्तथैनां, पण्डितसंविग्न—सहृदयवतंसाः ।
श्रीविमलहर्ष–वाचकवंशे, मुक्तामणिसमानाः ॥
धिषणानिर्जितधिषणाः सर्वत्र प्रसृतकांतिकीर्तिकपूराः ।
श्रीभावविजयवाचककोटीराः, शास्त्रावसुनिकषाः ॥

प्रशस्ति श्लोकौ १३-१४



श्री आगमोद्धारकाऽऽलेखितप्रस्तावनासंग्रहस्वरूपे

# श्रीआनन्दरत्नाकरे

## षष्ठं रत्नं

## श्रीअध्यात्ममतपरीक्षाप्रस्तावना

श्रीमद्वाचकेन्द्राय नमः

### अध्यात्ममतपरीक्षोपक्रमः

समाकर्णितपूर्वमेतद्विपश्चितां यदुत [1]श्रीमदकलङ्कज्ञानकलित-जिनेन्द्रप्रणीते जन्तुजात-हिताऽऽवहे पौर्वाऽपर्यविरोधकलङ्कविकलेऽपि च जैनेन्द्रशासने [2]विहायस इव दिनरात्रिभ्यां श्रीश्रमणसङ्घस्य जातो द्वैधीभावः श्वेताम्बर-दिगम्बराभ्यां, द्वयेऽपि च [3]वावदन्त एव अहमहमिकया सर्वज्ञाऽनुगतिकर्तां स्वेषामन्येषां तु संसारापारपारावारपरिभ्रमण निबन्धनमाचख्युर्निन्हवतां.

केचिन्नवीनवर्त्मोद्भवभावनाभावितास्तु [4]तृतीयप्रकृतिका इवोभयायो(?)भयानुसारिनराहंणालोभान्धा द्वयेषामुत्सर्गापवादाऽनुगतां दिगम्बरश्वेताम्बराणां प्राचख्युः [5]कल्पितामश्रद्धान-[6]-निबन्धने सत्यप्यदृष्टवैव तद्, आख्यान्ति च त्रयोऽपि यथास्वमाध्यात्मिकतां स्वां स्वयं, कतमश्चैषां श्रीमदाप्तमार्गाऽनुसारी यथार्थतयाऽऽध्यात्मिकश्च समुदाय ? इति यद्यपि [7]साक्षात्साक्षात्कारिज्ञानविकलेऽस्मिन् किल काले दुरवसेयं यथावत्, तथापि यावत्तीर्थं अनघधर्मस्य श्रीमदाराध्यतमपादोपदिष्टस्यानुवर्त्तनात्सर्वज्ञोदितेरिव स्यादेव न किं [8]ततो [10]निर्णयः ? किमुच्येत च युक्त्यन्विते तु ?, [11]तस्मिन् सति तन्न भवति, [12]तन्नाऽनाऽऽश्वासः कुत्राप्याऽऽगमगदिते पारगताऽनुमते तत्त्वे.

भविष्यति चैवमपि आसन्नभव्यानां यथार्थतया तत्त्वाऽर्थोऽधिगमः श्रद्धानाऽऽदि चाश्रवादीनां, [13]परेषां तु न विद्यमानेऽपि श्रीमति परमेश्वरे [14]भास्वत्युलूकानामिव प्रकाशः स्वपरप्रकाशकः भवेत्, अन्यथा स्युरेव [15]तत्कालीना [16]अशेषा अपि सत्त्वाः सत्पदभाजो, न चैतदिष्टमपि मतं केनापि, तथा च [17]कार्य एव यथार्थतयाऽधिगमाय तत्त्वानामायासः, नह्ययथावद् युक्तं रसायनमप्यपहरेद्व्याधिलेशम्, अपि तु कुर्यादेव व्याधिशतानि दुरुद्धराणि, न [18]चर्ते धर्मं विद्यते

[19]सकलाऽनादिरूढमूलाऽऽमयविनाशकं रसायनमपरं, [20]कृतमप्यायासं निर्णयाय तत्त्वानां परोपकारपरायणा विना [21]निबन्धं तीर्थप इव गणभृत्प्रतिष्ठां पदार्थसंपत्तिद्वारा न [तं] सफलयितुं पारयन्ति, ततश्च युक्त एव श्रीमन्न्यायाचार्याणामायासो यथार्थतत्त्वनिर्णये तदुपनिबन्धे च.

अनुसारिणश्च पूज्याः पूज्यतमचरणानां **श्रीमदुमास्वातिवाचक-जिनभद्रक्षमाश्रमण-कलिकालसर्वज्ञशब्दानुशासन**[22]**शासनसर्वतन्त्रस्वतन्त्रहेमचन्द्रप्रभूणां** पारगतगदिताऽऽगमानां च विद्यमानानामाचारादीनां तीर्थप्रभृतिनदीभूधराणां, परे तु यद्यप्यनुसरन्ति **स्वाराध्यतमान् कुन्दकुन्दाऽमरचन्द्र-प्रभाचन्द्राऽऽदीन् वाराणसी**दासाद्यास्तत्कालीना[23]नग्नाटाग्रेसरा [24]अध्यात्मव्याजेन मोषकाः श्वेताम्बराध्वन इति ख्याताः, परं नावलम्बयन्त्यागमं पारगतगदिततया, तन्मतं हि "**व्युच्छिन्नमेवाऽऽगमकदम्बकं श्रीमद्गणभृत्प्रणीतं समूलं** [25]**तिष्ठते धर्मस्वरूपं इन्द्रनन्द्यादिप्रणीत आगम इति**"

सत्यपि च [26]चतुरशीतिजल्पपट्टकोल्लिखितेष्वनेकशो विवादसम्भवे मुख्यतयाऽत्र[27] [28]तन्मूलभूता धर्मोपकरणधारितादिकाः साधिता न्यायाचार्यैरत्र, व्यक्तो हेतुर्दिगम्बरपृच्छाऽऽध्यात्मिकोपहासश्चेति द्वयमत्र निर्माणे, स्पष्टश्चासौ [29]गाथायामेकचत्वारिंशत्तमायां, तथा च यः कश्चित्परुषवाक्प्रसरोऽत्र स तदीयपृच्छावैचित्र्योपहासमूलक एव भविष्यति इत्यनुमातुं सुलभमेव मध्यस्थानां.

"न्यायाऽऽचार्यपादाश्च कदा कतमं भूमण्डलं मण्डयामासुः ? का च श्रीमतामुपकारिता ? का च जन्माऽऽदिपाविता भूः ? [30]असाधारणविद्याव्रततिवृन्दारकद्रुनिभ-श्रीमद्भिर्निदानामरवनायमाना के तत्रभवत्पूज्याः पूज्याः ? के च[31]ततोभवद्भिर्विहिता मिथ्याज्ञानाऽ[32]न्धतमसतिरस्कारतत्पर-कल्पान्ततरणिविधानवेधसः सदालोका ग्रन्थालोकाः" इत्यादि वेद्यं विद्याऽवदातचतुष्कैर्द्वा[33]**त्रिंशद्द्वात्रिंशिके**क्षिभिरिव श्रीमद्ग्रन्थमालातो मुद्रितायाः, [34]शेषा इव शेषीभूताः श्रीमतां ग्रन्थमणयोऽल्पा अपि ख्यापयन्त्येव महिमोदधेर्माहात्म्यमनघं, कथंकारं च कलयामासुरभावं [35]शेषा अल्पेप्यन्तरे श्रीमतां छन्दोवृत्त्यादिका इति न [36]नियतमवस्यते, सामान्येन तु [37]ज्ञानावरणनिदान-ज्ञानसाधनोपेक्षादीनि कारणानीति चकास्याच्चतुरेतरजनजातचेतसीत्यलमतीतकालीन-[38]फलातीतविचारणया.

**प्रथमगाथोपक्षेपः**—स्मृतिमानिन्युस्तावदुपकारितया परगुरुं [39]शठाऽसुरकमठविहितविघ्नजलाऽविध्यातध्यानाऽग्निसाधितस्वाऽऽत्म**श्रेयांसं श्रीमत्पार्श्वप्रभुं** [40]वरीवर्त्तदनगारशतालङ्कृत 'विजयशाखा' [41]वीरुत्कन्द—**श्रीमद्विजयदानसूरीश्वरपट्टाऽचला**[42]ऽचलप्रभ-**श्रीमद्धीरसूरिचरणसरोरुहसेवाषट्पद-श्रीमद्विजयसेनपट्ट-नभोङ्गणनभोमणिं श्रीमन्तं विजयदेवसूरीन्द्रमपरगुरुं** न्यायाचार्यपादाः कृतज्ञशिरःशेखराः.

निर्दिष्टं चाभिधेयनिर्देशकमभिधानं, सम्बन्धप्रयोजनयोस्तु परापरगुरुस्मरणाऽभिधाननिर्देशेनाभिधेयनिर्देशेन च स्पष्ट एवावगमः,

**२तः१६गाथोपक्षेपः**—अध्यात्म, तद्वतो (च) निक्षिप्य चतुर्धा **निरस्तं** देहादि(द)रिषोपकरणानामध्यात्मप्रतिकूलत्वं, यतो न धर्मोपकरणे रतिः परिणामो रक्षणानुबन्धी, ध्यानविघ्नं शुद्धोपयोगानुपकारिता, स्त्रीवदवश्यमपकारिता. (च)

**१७तः४१गाथोपक्षेपः**—रागद्वेषस्वरूपं निक्षेपचतुष्केनोपदर्श्य साधितं प्रवृत्तेर्योगहेतुकत्वं, फलाकाङ्क्षाया एव च रागद्वेषाऽऽपादितत्वं, आहारादेरिव न वस्त्रादेर्विराधना, परिमाणयुते शुद्धाऽऽहारोपभोगे क्षुत्परीषहजय इव [४३]सत्यप्युपकरण उपकारके जिताऽऽचेलक्यपरिषहता, निरुपचरिताऽचेलता तु जिनेन्द्राणामेव, तदनुगत्वे तूपदेशादि न युक्तं छद्मस्थस्य, जिनकल्पस्तु तपः-सत्त्व-सूत्रै-कत्व-बलभावना-निर्णीताऽऽत्मलब्धीनां, कारणिकता त्वाहारस्येव वस्त्रस्य, न च निर्मूर्च्छानां द्रव्यतोऽपि परिग्रहता, पापहरणं च [४४]तत्सिद्धान्ताऽनुयायिनामित्यादिप्रबन्धेन निरस्तं **धर्मोपकरणस्य परिग्रहत्वं.**

**४२तः५७गाथोपक्षेपः**—तादृशाध्यात्मयोग्यो व्यवहारक्रियावान् समिति-गुप्तियुतो वाचंयम इति समुपक्रम्याऽऽहत्यभावकथनेन क्रियालोपका अपेतबोधिबीजाः, प्रमाणं व्यवहारनिश्चयोभयमतं, समौ च द्वावप्येतौ, व्रताऽऽदिनिबन्धनं स्वपरत्वव्यवहारो व्यवहारादिति **व्यवहारः**, कृपणानां भोगाऽभावाद्विषयगृद्धानां स्वभावोपलम्भाऽभावान्निःसङ्गभावनाया (नया) रागद्वेषविलय इति [न] (?) तथा किन्तु परिणामाद् बन्धमोक्षाविति च [४५]**निश्चयः** ।

**५८तः६५गाथोपक्षेपः**—द्रव्यभावलिङ्गयोगान्मोक्षो विस्तरश्च तत्र वन्द्यत्वेतरविषयो, व्यवहाराद्बलवान्निश्चयो यतोऽसौ फलसाधकक्रियारमणः, कार्यगुणानां कारणगुणानुरूपत्वाच्छङ्कितं ज्ञानप्राधान्यं सर्वनयमयत्वे च सकलादेशता, तद्द्वयमपि ज्ञानस्य सारश्चरणमिति सर्वनयता सर्वमान्यतेति च समर्थ्य निराकृतं.

**६६तः७१गाथोपक्षेपः**—अभेदवृत्तौ निश्चयाधीनः सकलाऽऽदेश इति प्रमाणता निश्चयस्य, अनुपचार इति भावविषयरतिनिश्चयबलवत्ता न युक्ता अपरोपचारात् कारणजत्वाच्च, भाववृद्ध्या यावत्केवली क्षीणाऽज्ञानादिदोषः.

**७२तः१२३गाथोपक्षेपः**—क्षुत्तृष्णे न तस्येति पक्षे सिद्धिदूषकत्वे मनुजत्वं तथा, दुःखत्वेऽस्त्येवाऽऽसां निराकर्तुं, क्षुत्तृष्णापरिषहजयश्च 'नत्वाऽर्थे' तत्सद्भावाऽऽवेदकः, क्षुदादिहेतुः पर्याप्त्याऽऽदिर्नाऽसातं, मोहहेतुका क्षुत्तृष्णा नाऽन्यत्रात् , अवमकोष्ठत्वाऽऽदिनाऽऽहारसंज्ञाऽभावाद् विनापीच्छामाहार इति नाऽतिचारोपि तत्र, प्रशस्तध्यानहेतुरयमिति नाऽब्रह्मवत् आहारचिन्ताऽऽर्त-

ध्यानं, क्रन्दनादि अविप्रयोगचिन्ता च न सर्वज्ञस्य, न च विना मोहं घातिवद्वेदनीयं दुःखदं, अनुकूलत्वाऽऽदि च न सुखाऽऽदिलक्षणमप्रमत्ताऽऽदिष्वभावात्, नाऽज्ञानजमिन्द्रियजं दुःखं, विभोः निम्बरसलववद्वेदनीयं,न दग्धरज्जुवत् न च केवलं क्षुधाऽऽदिप्रतिबन्धकं, बल-वीर्ययोर्भेदान्न बलहानिर्दोषः, योगकृतक्रियेव बन्धो निर्बीज इति शङ्कायां स्वभावत एव बन्धः कथं न ? वाणी च न कथं स्वाभाविकी ? खेदोदीरणा च न वचनप्रयत्ने, उदीरणं वीर्योद्भवं स्वभावपक्षे तु सुगतगतिः, केवलियोगैर्नोदीरणा खेदस्य, प्रमादाऽभावात्, तथा न दुष्प्रणिधानं रागद्वेषाऽभावात्, अतिचारप्रसञ्जकत्वाभावान्नाऽऽहारस्तत्कथेव प्रमादः, न निद्राहेतुर्दर्शनावरणीयत्वात्तस्याः, स्तोकत्वाऽनुज्ञा तु तत्प्रसङ्गात्, न च वीतमोहानामपवादाः, पात्रं देहवन्न ममत्वे हेतुः,ध्यानाऽभावान्न तद्व्याघातः, औदारिककायाऽवस्थान-वृद्धी नान्तरेणाऽऽहारं, परमौदारिकत्वाऽऽदिकल्पनं च संहननाऽऽदिसत्त्वादसमञ्जसमेव, पुष्पादिवन्न मतिज्ञानोत्पाद आहारात्, ईर्यापथिकी गमनादिवत् कथं आहारात् ? योग्यकालविधानान्नोपकारहानिः, हितादेर्न व्याधिः, मोहाभावान्न जुगुप्सा पुरीषादेरित्यादि निदर्श्य स्थापिता कवलभोजिता केवलिनां भगवतां.

१२४तः१७०गाथोपक्षेपः—सिद्धानां चाऽष्टगुणाऽन्विततामाविर्भाव्याऽन्यदीयमतेन सिद्धेषु चारित्रमित्यनूद्य, चारित्रस्यैहभविकत्वमाऽऽस्थाय, यथास्थितपक्षमचारित्रमित्याख्याय, सिद्धानामुपवर्ण्य भेदान् पञ्चदश, स्त्रीणामभावे सिद्धेः क्षपणकानां चतुर्विधत्वं न स्यात् सङ्घस्येत्यादीनि दर्शितानि बाधकानि, निराकृताश्च चारित्ररहिताऽऽत्महीनत्वादयस्तदुपन्यस्ता हेतवः.

१७१तः१८४गाथोपक्षेपः–पर्यन्ते चोपदिष्टमुपदेशसारमग्र्या सर्वमान्यया गिरा यदुत–"संयमयोगे यत्नः स्वर्गाऽपवर्गाऽऽस्पदाऽध्यात्मकनककषपट्टः" ख्यापितं च तत्र भगवद्वचः, "भुक्त्वा भोगान् यत्न इति, सामर्थ्याभाव इति, कालाभाव" इति च निराकृता दूरभव्योदीरिताः पक्षाः, प्रायश्चित्तप्रकारेण शुद्धौ च चारित्रस्य मिथ्यादुष्कृतस्य शब्दार्थः, सुश्रावकत्वस्य श्रेष्ठता च्युतधर्म्मणः साधोः, आत्मस्वभावाऽवस्थितिः संविग्नस्य, गीतार्थानां देशनाऽधिकारः एकाकिना विहरणं तु गीतार्थेतरयोर्द्वयोरप्ययुक्तमिति निवर्ण्य, प्रस्तुतप्रकरणनिगमनाय पर्यन्तसाध्यं रागद्वेषविलयाऽऽख्यमुपदिष्टं, श्रीमद्भिर्याचितं च गीतार्थपार्श्वात् प्रस्तुतप्रकरणशोधनं ।

प्रशस्तौ च [४६]जैनधर्मप्रसारकपर्षत्प्रसारित-श्रीमद्यशोविजयग्रन्थमालानिर्दिष्टवत् स्वगुरुपारम्पर्यं निरदेशि ।

विशेषस्त्वेषोऽत्र यदुत एतद्विधानं विजयमाने श्रीमद्विजयदेवसूरीन्द्रे जाते च पट्टाऽभिषेके श्रीमत्सुविहितानुष्ठानराग-बद्धहृदयस्य श्रीमद्विजयसिंहगुरोः, एष एव च महात्मा [४७]श्रीमत्प्रभृतीनामनेकेषां महापुरुषाणां क्रियोद्धारादेशको, येन विजयतेऽधुना शासनमभीष्टपुरप्रापक-ज्ञानक्रियायुगलोपेतमिति ।

नोद्विजितव्यं च विदुषास्मात्, (स्मिन्) काचित्कटुकवचनावतारात्, यतो यदाऽन्यैरसमञ्जसतराणि वाक्यानि देवगुरुसम्बन्धीनि हास्योपजनकतयाऽऽख्यातानि तदा [४८]कोऽन्यो भवेत्तादृशामृते उपाय एतादृशाद्ग्रन्थाऽऽविर्भावात्सरागसंयमिनां, [४९]भवति चाऽवज्ञानेऽपि परमाऽऽराध्यानां माध्यस्थ्ये सरागाणां मिथ्यात्वमनन्तानुबन्धिमूलं, नच शक्नोत्यवस्थातुं तीव्रभक्तिरागरक्तः शान्ततयाऽवज्ञाने, **श्रीमन्महावीरज्ञा**पितनिषेधेऽपि मध्ये उत्तरप्रत्युत्तरे कुर्वाणौ [५०]**गोशालेन सर्वानुभूतिसुनक्षत्रमुनिपुङ्गवौ** यथा, भवत्येव च तथाविधेन [५१]गतमाध्यस्थ्येन वादिना वादसमारम्भे [५२]ईदृश एव प्रसिद्धिः, अवलम्ब्य शासनोद्धाराऽऽदि स्यात्कर्त्तव्यमपि [५३]तत्, नहि [५४]वल्लभानितापि प्रजा सप्रजस्य राज्यस्य रक्षणाय न म्रियते युद्धादौ, रक्ष्यश्च युद्धादिप्रसङ्गवत्तथाविधवादसमाऽऽरम्भः इत्यलमतिप्रसङ्गेन ।

केनापि कारणेनाऽवाच्येन श्रीमद्विहितानां ग्रन्थानामस्त्येवाऽल्पता । मुद्रणे चाऽस्या नाऽनेकान्युपलभ्यन्ते पुस्तकानि ग्रन्थस्य शोधनादौ च, न ततस्तथाविधः समाऽऽयोगः, तथापि **श्रीमत्कान्तिविजयमुनिपुङ्गव**प्रहितान्मूलपुस्तकसमानादपि यथामति विधाय प्रयासमकारि शोधनमुद्रारश्च विहितोऽस्या जनमनोहारिण्याः श्रीमत्कृतेः, भवेच्चेत् स्खलितमत्र शोध्यं तत्रभवद्भिराधायाऽभिलाषुके श्रीश्रमणसङ्घरूपां [५५]**समुद्रपर्यवसानमानन्द**मादधानेऽभिधानतो मयि ।)

''आषाढाऽसितपञ्चम्यां, **नन्दादानन्दसाधुना**
(१९६७) [५६]**वसु**[७]-स्वादा -ङ्क[९]-विध्व[१]ब्दे,
**सूरते**ऽलेखि पावने ॥१॥''

## अध्यात्मप्राप्तिः कदा ?

गुरु आणाइ ठियस्स य,
बज्झाणुट्ठाणसुद्धचित्तस्स ।
अज्झप्पज्झाणम्मि वि,
एगग्गत्तं समुल्लसइ ॥''

—श्री अध्यात्ममतपरीक्षा गा. ७७

अध्यात्ममतपरीक्षोपक्रम-

# टिप्पणं

## ( आनन्दलहरीसंज्ञं )

१. श्रीमान् चासौ अकलङ्कज्ञानकलितश्चेति समस्य एतादृशश्चासौ जिनेन्द्रः, तत्प्रणीते इत्यन्वयः।

२. इदं हि पदं 'आकाश' वाचि, ततश्च यथा दिन-रात्रिगतप्रकाशाऽन्धकारकृतो हि आकाशस्य भास्वर-मलीमसत्वरूपोपाधिभेदः दृश्यतेतद्वयदत्रेत्यन्वयः कार्यः।

३. भृशम्=अत्यधिकं, अभीक्ष्णं=भूयोभूयः वा, वदन्ति=निरूपयन्ति इत्यर्थः।

४. संसाररूपे अपारे पारावारे=समुद्रे भ्रमणस्य निबन्धनं=हेतुभूतां निन्हवतामित्यन्वयः।

५. नपुंसका इवेत्यर्थः।
एते हि श्वेताम्बराणां वा दिगम्बराणामर्थं न हि किञ्चित् लाभं जनयन्ति; प्रत्युत एते तु स्वाच्छन्द्यानुरोधतः यथारुचि उभयत्र प्रविशन्ति।

६. 'कल्पितां' इत्यस्य 'उत्सर्गापवादानुगताम्' इत्यनेन सह सम्बन्धः
अथ च स्वाऽभिमतकल्पनयैवैते श्वेताम्बर—दिगम्बरयोः उत्सर्गाऽपवादाऽनुगतत्वं प्रतिपादयन्ति, वस्तुतः प्रकल्प्यमानं हि श्वेताम्बराणामपवादाऽनुगतत्वं दिगम्बराणाञ्चोत्सर्गाऽनुगतत्वं शास्त्रसिद्धं नास्ति।

७. स्वकल्पितोत्सर्गाऽपवादाऽनुगतत्वस्य अश्रद्धा संजायेत, एतादृशे हेतुव्राते सत्यपि "**तद अदृष्ट्वैव**" अर्थात्=तद्=स्वकल्पितस्याऽश्रद्धाजनक हेतुकदम्बकं, अदृष्ट्वैव=असमीक्ष्यैव इति भावः।

८. साक्षात्=बाह्या-भ्यन्तरसाहाय्याऽनपेक्षं साक्षात्कारि=अवबोधकारि ज्ञानं=केवलज्ञानं, तेन विकले=रहिते इत्यर्थः।

९. ततः=श्रुतज्ञानात्, सर्वज्ञोपदिष्टानुसारिण इति शेषः।

१०. काकुवाक्यमिदम्, स्यादेवेत्यर्थः।

११. तस्मिन् सति=युक्त्यन्विते हि आप्तोपदिष्टश्रुतज्ञाने सति तत्=दुरवसे य=दुर्बोध्यम् न भवति इत्यर्थः।

१२. अनाऽऽश्वासः=अविश्वासः।

१३. 'पर'पदेनाऽत्र प्राङ्निर्दिष्टाऽऽसन्नभव्यप्रतिपक्षाः दूरभव्याः ग्राह्याः, ततः परेषां=दूरभव्यानाम् इत्यथः।

१४. भास्वति=सूर्ये

१५. तत्कालीनाः=तीर्थंकरसत्तासनाथचतुर्थाऽरके वर्त्तमानाः।

१६. अरोषाः=तीर्थंकृत्सु रोषाऽभाववन्तः इति।
एतेन तीर्थंकृत्सु रोषाऽभावमात्रेण नात्मनीनपथोऽधिगतिः, परन्तु 'निषेधात्मकरीतिरिव विधानात्मकशैली अपि परमोपयोगिनी'-तिन्यायात् तीर्थंकृद्वचनेषु सुदृढाऽऽस्थामूलकविश्वासस्यापि शिवाध्वनीनतां प्रबलोपयोगितां प्राचख्युः श्रीमन्तोऽनवद्यहृद्यकरुणासनाथाः आगमोद्धारकवर्याः।

दध्वनुश्च तेनैकेनैव पदेन "समताभाव एव परमावश्यकः, एतेनैव च गातार्थ्यं समेषामनुष्ठानानामि' त्यादि मोहविवशज्ञानलवदुर्विदग्धानां बृहत्कायपुस्तक-निबन्धाऽऽदिना बुधजनानां बुद्धिभेदकारिणां प्रगल्भवावदूकतामिति ।

१७. तत्त्वानां यथार्थतया अधिगमाय आयासः कार्य एव इत्यन्वयः ।

१८. च ऋते इति पदच्छेदः । ऋते=विना इत्यर्थः ।

१९. 'सकल'पदस्य 'प्रदृष्टाऽऽमये'न सह सम्बन्धः, ततश्च अनादितः रूढानि मूलानिय स्य, अथवा अविद्यमानाऽऽदिरोहवन्ति मूलानि येषां, एतादृशानां सकलानाम् अदृष्टानाम्=आन्तराणां आमयानां=भावरोगाणां विनाशकमित्यर्थः ।

२०. "तत्त्वानां निर्णयाय कृतमपि आयासं परोपकारपरायणाः निबन्धं विना.................न तं सफलयितुं पारयन्ति" इत्यन्वयः ।

२१. निबन्धं=क्रमपद्धपदार्थविचारगर्भसुरचितलेखमित्यर्थः ।

२२. 'शासन' पदेनाऽत्र व्यवस्थितरचनाऽवबोध्या ।

२३. व्याजस्तुतिपरमिदं पदं ।
तेन "नग्नाटेभ्योऽपि ये अग्रे सरन्ति उन्मार्गप्रतिपादने" इति भावपरकव्युत्पत्तिरत्रावबोध्या । यतः नग्नाटाः=दिगम्बरास्तु व्यवहारमार्गमभिमन्यन्ते, देवदर्शन-षडावश्यकाऽऽदिस्वरूप-बाह्यक्रियाकलापं धर्माऽङ्गत्वेन मन्यन्ते, परं वाराणसीदासप्रभवा वाक्छूरा अध्यात्माभासपटवस्तु निश्चयनयमर्मानभिज्ञा अपि शुद्धात्म-द्रव्य-गुण--पर्यायाऽऽदिसुमधुरशब्दजालेन मुक्तिपदप्राप्तयेऽवन्ध्यहेतुभूतं राजमार्गनिभमपि बाह्यक्रियाऽनुष्ठानमयं व्यवहारमार्गमपलपमानाः आबालगोपाऽङ्गनाहितकारिणं शिवाध्वनमेव निन्हुवन्ति.
अतः व्याजप्रशंसयाऽत्र पूज्याऽऽगमोद्धारकश्रीभिरेतेषामुल्लेखः "नग्नाटाग्रेसरा" इति रहस्यपूर्णपदेन कृतः प्रतीयते ।

२४. "अध्यात्मव्याजेन श्वेताम्बराध्वनः मोषकाः इति=एवंरूपेण ख्याताः नग्नाटाग्रेसराः तत्कालीनाः वाराणसीदासाद्याः" इत्यन्वयः ।

२५. श्वेताम्बरमान्यताभ्यः विसंवादिन्यः दिगम्बरीया मान्यताः स्थूलरूपेण चतुरशीतिमिताः सन्ति, तासां निर्देशः "चतुरशीतिजल्पपट्टक" रूपेणाऽत्र विहितोऽस्ति, एतत्पट्टकाऽऽधारेण गूर्जरपद्यमयी रचना न्यायाऽऽचार्योपाध्यायमतल्लजैरेतैरेव प्राकृताध्यात्ममतपरीक्षाग्रंथप्रणेतृभिः विहिताऽस्ति, सा च पूज्योपाध्याय श्रीयशोविजयजी महाराजप्रणीतानां यथाशक्योपलभ्यमानगूर्जरकृतीनां सङ्ग्रहस्वरूपे "श्रीगूर्जरसाहित्यसंग्रहाऽऽख्यग्रंथे (प्रथम विभागे) मुद्रिताऽस्ति ।

२६. अत्र=प्रकृते अध्यात्ममतपरीक्षाऽऽख्ये ग्रन्थे इत्यर्थः ।

२७. अत्र 'तत्' पदेन 'विवाद' परामर्शः ।

२८. पुच्छा दियंबराणं,
केवलमज्झप्पिमाण उवहासो ।
अम्हाणं पुण इहयं
दोण्हपि पडिमारवावारो ।। गा० ४१ ।।

३०, असाधारणाः या विद्याः ता एव व्रततयः=लताः, तासां वृन्दारकः=समूहः, तदर्थं द्रुः=वृक्षः, तन्निभाः, तेषां श्रीमती या वृद्धिः, तस्याः निदानभूतं यत् अमरवनं=नन्दनवन, तद्विचारन्ति ये ते इति समासो ऽर्थलक्षी विज्ञेयः ।

३१. इदं हि पदं पूज्यपादैरित्यर्थक 'तत्रभवद्भि'रितिपदवत् पूज्यार्थकवाचि ज्ञेयमत्र,"अन्येभ्योऽपि दृश्यते" इतिसूत्रेण सप्तम्यन्त-पञ्चम्यन्त-भिन्नविभक्तिकेभ्यो भवदादियोगे त्रल्-तसिल्प्रत्यययोर्पूज्याऽर्थे विधानात् ।

३२. 'अन्धतमस' शब्दो हि शब्दकोशे गाढान्धकारवाची, ततश्च अन्धतमसः=गाढान्धकारस्य तिरस्कारे तत्परस्य कल्पान्ततरणेः=प्रलयकालीनसूर्यस्य विधानं=चेष्टा इव वेधः=ज्ञानं येषां इति तात्पर्यानुसारी विग्रहरचना कार्या ।

३३. यथाहि द्वात्रिंशद्द्वात्रिंशिकाप्रस्तावनायां श्रीमतां ग्रन्थप्रणयनाऽऽदिवृत्तं दृश्यते तथा श्रीमद्यशोविजय-जैनग्रन्थमालामुद्रिताऽध्यात्ममतपरीक्षाप्रस्तावनातो विज्ञेयमिति ।

३४. शेषाः=देवपूजावशेषरुपाः, "प्रसादी" इतिलोक (गूर्जर) भाषायाम् ।

३५. शेषाः=उपलभ्यमानेतराः ग्रन्थमणय इत्यर्थः ।

३६. 'अव' पूर्वक 'सो' धातोः विवक्षया ज्ञानार्थकस्य कर्मणि रुपमिदम् ।

३७. ज्ञानाऽऽवरणीयस्य निदानभूतानि ज्ञानसाधनानां पुस्तकादीनामुपेक्षादीनि इत्यन्वयगर्भः समासः ।

३८. फलंमतीतं यस्मात् इति विग्रहः, निष्फला इत्यर्थः ।

३९. शठश्चासौ असुरः, स चासौ कमठः, तेन विहितञ्च तत् विघ्नं=उपसर्गरूपं, तदेव जलं, तेन अविध्यात-श्चासौ ध्यानरूपो योऽग्निस्तेन साधितं स्वात्मनः श्रेयः येन तम् इति विग्रहः ।

४०. अष्टादश बह्व्यो वा शाखाः श्रमणानामासन्, तासु साम्प्रतं बाहुल्येन 'विजया'ङ्कितनामधारिणां यतीनां सत्ता यङन्तप्रयोगेणाऽत्र संसूच्यते ।

४१. वीरुत्=विस्तारयुता हि लता ।

४२. अचला=प्रबलतेजस्विभिरपि ग्रहान्तरसार्थैरधृष्या प्रभा यस्येति विशिष्टार्थविवक्षा-गर्भव्युत्पत्त्या 'सूर्य' वाचि एतत् पदं विज्ञेयम् । आपाततस्तु 'अचल' पदेन स्थिरत्वं शाश्वतत्वं वा प्रतीयेत, तच्चोदया-ऽस्त-ग्रहणा-ऽभ्रच्छन्नत्वादिभिः व्यभिचर्यतापि, परं "गुरुगमगम्या हि शब्दानां लक्ष्यार्था" 'इत्यभियु-क्तोक्तेः प्राक्दर्शितव्युत्पत्तिरेवाऽत्र शरणम् ।

४३. एतद्धि पदं सप्तम्यन्तं "उपकरणे" इति अत्र विज्ञेयम् ।

"व्योः" १--३--२३ सूत्रेण स्वरपरकत्वेन आय्आदेशीभूतस्य एतः यकारलोपोऽत्रविहितोऽस्ति । उपकारके=संयमोपग्रहकारणे उपकरणे इत्यन्वयः ।

४४ अमूर्च्छतया जिनाज्ञानुसारं संयमोपकरणानां धारणरुपसिद्धान्तानुसारिणामित्यर्थः ।

४५. अत्र "इति प्रतिपादितम्" इति अध्याहार्यम्, तस्य च प्राक्तनेन "आहृत्य भावकथनेने" तिपदेन सहाऽन्वयः बोध्यः ।

४६. श्री भावनगर(सौराष्ट्र)स्थ जैनधर्मप्रसारकसभाऽऽख्यसंस्थया मुद्रिते श्री यशोविजयजैनग्रन्थमाला" ऽऽख्यग्रन्थनिर्दिष्टस्य गुरुपारम्पर्यस्यात्रत्यगुरुपारम्पर्योल्लेखसाम्यमस्ति इति भावः ।

४७. 'श्रीमत्'-पदेन ग्रन्थकर्तॄणां पूज्योपाध्यायमतल्लिकानां निर्देशो विज्ञेयः।

४८. तादृशां सरागसंयमिनां एतादृशात् ग्रन्थाविर्भावात् ऋते कोऽन्यः उपायः भवेत् ? इत्यन्वयः ।

४९. परमाऽऽराध्यानामवज्ञानेऽपि सरागाणां माध्यस्थ्ये(सतीति शेषः), अनन्तानुबन्धिमूलं मिथ्यात्वं च भवति, इत्यन्वयः ।

५०. 'सहे' त्याध्याहार्यमत्र पदम् ।

५१. एतद्धि पदं दुराग्रहपरायणत्वगमकं विज्ञेयम् ।

५२. नैतत् षष्ठ्यन्तम्, किन्तु 'ईदृक्'शब्दस्य स्वार्थेऽच्प्रत्ययं कृत्वा विशेष्यभूत'प्रसिद्धि'शब्दानुसारं पुँल्लिङ्गे प्रथमैकवचनं विज्ञेयम् ।

५३. 'तत्'--पदेन कटुवचनावतारादिकमेतद्ग्रन्थसन्निबद्धं विज्ञेयम् ।

५४. 'वल्लभानिता' पदस्य हि 'वल्लभत्वेन मानिता' इत्यर्थस्योद्बोधनमत्रार्थानुसारेण भवति, परं 'वल्लभानिता' प्रयोगनिष्पत्तिस्तु पृषोदरादिकं कमपि नैपातिकसूत्रं शरणीकृत्यैव सङ्गमनीया ।

५. समुद्रः=सागरः पर्यवसाने=अन्ते यस्य सः एतादृशं आनन्दम् अभिधानतः आदधाने=धारयति मयि= आनन्दसागरे इत्यर्थः ।

५६. 'वसु' हि सामान्यतः 'अष्ट'संख्यावाचि प्रथितं वर्तते, परमत्र केनाऽपि हेतुना कुत्राऽपि शब्दकोशेऽप्रथित'सप्तसङ्ख्यार्थे प्रयुक्तमस्ति, कृतेऽपि भूरि प्रयतने न सम्यक् सन्तोषाऽवह-सङ्गतनिर्णयोपलब्धिर्जाता ।

## गुणपूजा—महत्त्व

"पुष्ट्यै गुणानां गुणिनां समादृतिः
पूजापदं स्यात् गुणिनां गुणास्पदम्" ॥

पू० आगमो०रचित तीर्थपंचाशिका श्लोक २२

श्रीआगमोद्धारकाचार्यदेवश्रीलिखितप्रस्तावनासंकलनस्वरूपे

# श्री आनन्दरत्नाकरे

## सप्तमं रत्नं

'वन्दारु०' वृत्त्यपराऽभिधान-श्रावकाऽनुष्ठानविधि-
प्रकरण—उपोद्घातः

॥श्रीगणधरेन्द्राय नमः॥ ननु भोः विपश्चिद्वृन्दविततकीर्त्तिपटहा विद्वद्व्राताः! निर्णीतचरमेतद् समेषां [1]समस्तसमस्ताऽज्ञानाऽन्धतमसानां [2]मोक्षप्रोक्षणपर्यवसानानां [3]सकलैहिकाऽऽमुष्मिकाऽकल्प्याऽर्थकल्पनकल्पतरुकल्पे श्रीमदपश्चिमतीर्थपतिप्रणीत [4]आ-शतक्रतु-कीटकरक्षणचणे शासनेऽनुष्ठानानां रसायनोपयोगारम्भे विरेचनमिवानुदिनमुभयसन्ध्यमनुष्ठेयं आवश्यकाऽनुष्ठानमाम्नातमादेयतयाऽऽदौ।

[6] आदिश्यते चाऽत एवेदमैदंयुगीनशासनं तत्र तत्र तत्रभवद्भिर्भगवद्भिः सप्रतिक्रमणाऽभिधानेन, न [7]चैवमाद्यन्ताऽन्यक्षीणाऽष्टकर्मणा[8]मरुहताम्, [9]एतदेव च सह पञ्चमहाव्रतोच्चारणेन तीर्थान्तरसङ्क्रमणकारणं भेदोपनिबन्धनतया[10]निबध्यते गणधारिभि[11]रप्रतिहताऽप्रमेयाऽप्रतिमगुणगणधारिभिः; एवमेव च परमाऽऽर्षमपि [12]'**अवस्स-कायव्वयं हवइ जम्हा**' इत्यनेन[13]प्रभुसम्मितेनाऽमरगणाऽनुल्लङ्घनीयेनोदाजहारानवद्येन वचनेन, आवश्यकं चाऽध्ययनषट्काऽऽत्मकाऽऽवश्यकक्रियाऽऽदरणमवश्यकर्त्तव्यता च चैत्यवन्दना-गुरुवन्दनाऽऽदीनामपि [14]अदीनानां अविचलपदावाप्त्यविकलनिदानत्वे सम्यक्त्वशुद्ध्याऽऽदिना त्वाऽऽत्मविशोधिकारकाणां यथैवाऽनगाराणां तथैव देशसंयमपवित्रिताऽन्तःकरणानामगारिणामपि, [15]तदनुसरतामा[16]वश्यकीयं [17]पूर्वोक्तमितिहेतोर्वाच्यैव [18]तेषामपि [19]तन्मर्यादेति श्रीमत्पूज्यपादैर्देवेन्द्रसूरिभिराख्याता **श्रावकानुष्ठानविधि**सञ्ज्ञितैतत्प्रकरणविधानद्वारेण [20]सा [21]तेषां, तथा च व्यक्ततमा[22]ऽऽस्याः प्रतिदिनमावश्यकता[23]ऽऽवश्यककार्यविधानसावधानान्तःकरणचक्षुष्काणां प्रतिभास्यति [24]प्रदर्श्येति सामान्येन निदर्श्यते तत्त्वनिदर्शननदीष्णानामभिधेयादिप्रतिपादकं किञ्चित्सुगमताऽऽधाय्येतस्य।

प्रणेतारश्चाऽस्य तावद् **विधेः श्रावकानुष्ठानस्य** सुगृहीतनामधेया भगवन्तो **देवेन्द्रसूरयः** श्रीमत्तपगच्छभागीरथीप्रवाहहिमगिरयः **श्रीमज्जगच्चन्द्रसूरीणा**[25]माचामाम्लविधान-

कार्मणवशीकृत-तपःश्रीलक्षणलक्षणामात्रचमत्कृत-यथार्थाचाररक्षणप्रवण-श्रीमेदपाटाधीश-वितीर्ण-तपाविरुदानां [२७]वचनाऽतिगभागधेयानां [२८]चित्रवालगच्छीयोपसंपद्ग्रहाऽवसरे सहचारिणः [२९]दुर्वासनाऽवष्टब्धहृदयकौशिकसहस्रकिरणतपोविधानरूपाऽसाधारणहेतुलब्धजन्मतपः पदोपदीभाव--वेलायां [३०]पारावारस्य [३१]वेला इवाऽभिन्नसत्ताकाः, [३२]प्रभावकपुण्डरीकाणां तेषामेव पट्टपूर्वाऽचला-ऽर्यमप्रभा अद्वितीयाः ।

जन्मादिसमयश्चैषाम्–

**"तदादि बाणद्विपभानु १२८५ वर्षे, श्रीविक्रमात्प्राप यदीयगच्छः । बृहद्गणाह्वोऽपि तपेतिनाम, श्रीवस्तुपालादिभिरर्च्यमानः ॥९६॥ गते स्वः, शैलद्विविश्व-१३२७ शरदि स्वगुरुद्वयेऽपि"**–इति युगप्रवरश्रीमन्मुनिसुन्दर(सूरि)प्रणीतगुर्वावलीतो निर्णीयते ।

तथा च त्रयोदशशतकमाधारभूतो[३३]ऽनेहाः पूज्यानां, ग्रन्था अपि पूज्यपादैर्वितताः **"[३४]सारवृत्तिदशाः कर्मग्रन्थदीपास्तमोऽपहाः । पञ्चाशिका सिद्धविचारवाच्या भाष्याणि वृत्तं च सुदर्शनायाः । उपासकानां दिनकृत्यसूत्रवृत्ती च टीकाऽपि च धर्मरत्ने"** इतिपर्यालोचनेनैदंयुगीनजनताहितकरणलब्धप्रभवैरसपत्नज्ञानविभवैरिति स्पष्टतरं ।

स्पष्टीभवति चात एतत् यदुत सवृत्तिकं कर्मग्रन्थपञ्चकं, श्राद्धदिनकृत्यप्रकरणं, सिद्धप्राभृत-वृत्तिर्धर्मरत्नवृत्तिर्बृहतीत्यादिकाः प्रभूताः प्रभुभिः प्रादुर्भाविता ग्रन्थाः । शैली चैषां भगवतामेषा यदुतोपयुक्ततमानां ग्रन्थानामेव कृतिः, कर्मग्रन्थाऽऽदिविलोककानां सुस्पष्टमेतद् हृहृदयगुहायां, दरी-दृश्यमानः श्रावकानुष्ठानविधिरप्येतादृश एव, यतो न श्रीमन्तो [३७]विरहय्य कैरपि पूज्यैः श्रावकाणां बोधनार्थमावश्यकाऽर्थस्य विहितोऽनून एतादृशः पृथक् प्रयासः ।

किञ्च-नैव भवत्यऽज्ञानां दृष्टान्तमन्तरेण [३९]कान्तातुल्यसरसास्वाददत्ताऽमितहर्षप्रकरकाव्य-निचयहेयोपादेयज्ञानो(हानो)पादानफलप्राप्तिवर्णनात्मकं हेयस्य [४०]हानौ ग्रहणे च ग्राह्यस्य तथाविधा प्रवृत्तिः, बालानां तु मुख्यतया[४१]मित्रसम्मितपञ्चाशक[४२]प्रभुसम्मिताऽऽवश्यकाऽऽदिशास्त्रेभ्योऽपि विशेषेण दृष्टान्तरूपमेवोपयुक्ततममिति नात्र विवादलेशः, अत एव च [४३]कथाऽनुयोगोपयोग एवा-दिष्ट [४४]आदेशप्रधानै[४५]रभियुक्तैः बालानामुपदेश्यतया, सत्स्वपि च केवलदृष्टान्ताऽऽदिमयेष्वनेकेषु चरित्रेषु [४६]साधारणेषु । अत्र ससूत्रवृत्तिदृष्टान्तान्वितत्वेन रचनायाः सुष्ठुतरं सौष्ठवाऽऽपादनमापादि-तमाप्तवचनप्रवचनाऽऽविर्भूताऽसीमसमतारसाऽऽस्वादोद्भूतकृपापीयूषवारिपूरै [४८]र्यथार्थप्राप्तज्ञानपूरैः सूरिपुङ्गवैः, विवेचितमपि आवश्यकसूत्रवृन्दं चैत्यवन्दन-गुरुवन्दनाद्यनुक्रमेणार्तावोपयुक्तेन विवृतमिति न कोऽपि शङ्काऽवकाशः प्रत्याख्यानसूत्राणामर्वाक् प्रतिक्रमणसूत्रात् [५०]व्याख्याने ।

ज्ञापितं [५१]चानेन[५१]भगवद्भि[५३]र्विधानदर्शनेन प्रवर्त्तमानगुरुवन्दनस्य [५४]चिरतरूढिमागत-त्वमिति, अवशिष्टं चावसितं प्रतिक्रमणसूत्रस्य सदृष्टान्तव्याख्यानकरणेनेति नमस्काराऽऽख्यात्

शासनधुराधरणधौरेय-परमेष्ठिपदभूषित-मोक्षसार्थवाह-पुरुषपञ्चकद्रव्यभावस्तुतिरूपात् सूत्रादारभ्य-यावत् सर्वाऽतिचारप्रतिक्रमणकारणतया प्रतिक्रमणसंज्ञितसूत्रपर्यवसानमत्र सूत्रवृन्दम् ।

विशेषश्चाऽत्राऽयं यदुत-चैत्यवन्दन-गुरुवन्दन-प्रत्याख्यानसूत्राणां व्याख्याने [५५]सम्पत्पदाऽधिकार-वर्णप्रमाण-गुरुस्वरूप-वन्दननैकार्थ-वन्द्याऽवन्द्याऽऽवश्यक-प्रत्याख्यानस्वरूप-तद्भङ्गा-ऽऽकार-शुद्धि-फलप्रमुखा विवेचिता अधिकारा [५६]अधिकारितमैकवेद्या ग्रन्थाऽन्तरेभ्योऽपि च दुरवसेयाः [५७]तद-समानोपकारकरणपटिष्ठस्याऽस्य मुद्रणमतीवावश्यकमिति न कस्य चतुरस्य चेतसि [५८]प्रपोस्फुर्यात् ।

मुद्रणं चास्य [५९]श्रेष्ठिदेवचन्द्रलालभाईत्येतन्नामयुग्ज्ञानोद्धाराऽऽधारभूतद्रव्यनिचयस्योद्भवाऽऽदि तु [६०]निवेदितपूर्वमेव [६१]मुद्रितरे श्रीमद्वीतरागस्तवोपक्रमे सविस्तरमिति न तद्वृत्तान्तनिवेदननेनाऽर्थः । मुद्रणाऽऽधारभूता प्रतिरस्य [६२]श्रेष्ठि-श्रीमनःसुखभाईविहितज्ञानोद्धारपुस्तकप्रबन्धादायाता ।

शोधने च क्वचित्क्वचित् द्वासप्तत्यधिकचतुर्दशशतमान (१४७२) विक्रम वर्षीयश्रीभृगुकच्छवास्तव्यमोदक[६३]ज्ञातीय-गोदा-डूंगरलिखापिता प्रतिराधारभूता ।

भविष्यन्त्यनेकानि स्खलितानि दृष्टिदोषात् सूत्राऽर्थमौढ्याच्चेति प्रमार्ज्य प्रेक्षणीयमिदमित्यर्थये [६४]परमाऽऽनन्दाऽऽलयावाप्त्यसाधारण-कारण-रत्नत्रयनिचयसादरश्रीश्रमणसङ्घपादपङ्कजमधुपायमानआनन्दोदन्वदभिधानः सविनयं [६५]ज्ञातस्खलितदोषदुरिताऽनुशयः मिथ्यादुष्कृतं वितीर्य परमपदरसिकः ॥

**नवसार्यां वरपुर्यां पार्श्वजिनेशांह्रिपूत[६६]सकलोर्व्याम् ।**
**वसु-रस-नन्दे-न्दु(१९६८) वर्षे कृत आनन्देन शिवततये ॥११॥**

## मार्मिक व्याख्या

रागत्यागी भवेद् देवः,
　　सङ्गत्यागी गुरुर्भवेत् ।
सक्तित्यागी च सम्यक्त्वी,
　　देहत्याग्यव्यये पदे ॥

—पू० आगमोद्धारकाचार्यश्रीप्रणीत
यतिधर्मोपदेश गा० ७३६

पूज्यपादाऽऽगमोद्धारकाचार्यश्रीलिखित-प्रस्तावना-

विषम-पदाऽर्थसूचिका

# आनन्दलहरी टिप्पणी

(वन्दारुवृत्ति-प्रस्तावना)

१. समस्तं=सम्-सम्यक्प्रकारेणाऽस्तं-विक्षिप्तं समस्तं=सकलम् अज्ञानरूपम् अन्धतमः यैस्तेषामिति व्युत्पत्तिरत्राऽवबोध्या ।

इदं हि विशेषणं "अनुष्ठानानां" इति पदस्य विज्ञेयम् ।

२. मोक्षस्य=सर्वकर्मविनिर्जरणरूपस्य प्रोक्षणं=पुङ्खनं ("पुंखणुं-वधामणु") इति गूर्जर भाषायाम्) भवति पर्यवसाने येषाम् अनुष्ठानानाम् इति तात्पर्यगामिव्युत्पत्तिरत्रावबोध्या ।

लौकिकशिष्टसमाचारेऽभ्यर्हणीयवस्तुन प्रोङ्खनेनाऽऽदराऽऽधिक्यसूचनवदत्र जिनशासने आबालवृद्धं प्राणिमात्राऽऽत्मशुद्धिकरणेऽमोघसाधनरूप-विविधक्रियाकलापेन मोहाऽपसर्पणं प्रकुर्वतामनुष्ठानानां राजमार्गत्वं संसूचयन्ति गीतार्थपादाः आगमोद्धारकवर्या सूरिप्रष्ठाः ।

अपरश्चाऽनुष्ठानानां मोक्षप्रोक्षणपर्यवसानत्वं प्रदर्श्यैतदपि दध्वनुराचार्यमतल्लिका यत्-प्रावृट्कालीन जलसम्पातलब्धजन्माऽलसकाऽऽदिक्षुद्रजन्तुवृन्दवत् कालविषमताऽऽदिलब्धरूपैःज्ञानवादिभिः विशुद्धाऽऽत्मद्रव्याऽऽलम्बनवादिभिः दुर्निश्चयवादवादिप्रमुखैरुद्भावितानां क्रियाप्रतिक्षेप-ज्ञानिनिर्दिष्टकर्तव्याऽपलापाऽऽत्मस्वरूपसंवेदनाऽऽभासप्रभृतिस्वरूपवाचोयुक्तीनां शब्दाऽऽडम्बरफटाऽऽटोपमात्राणामसारत्वमात्महिताऽऽवहदृष्ट्याऽवबोध्यं सद्गुरुचरणसेवालब्धनिर्मलविवेकाऽन्तश्चक्षुष्कैः समीक्षावद्भिर्विदुषांवरैरिति ।

३. सकलाश्च ते ऐहिकाश्चाऽऽमुष्मिकाश्च अकल्याः=कल्पनाक्षेत्रातीता ये अर्थाः तेषां कल्पनाकल्पने=रचनासूत्रणे कल्पतरुकल्पे=कल्पवृक्षसदृशे इति व्युत्पत्तिरत्र सङ्गमनीया ।

४. शतक्रतुः=इन्द्रस्तमभिव्याप्य कीटकपर्यन्तं सर्वजीवानां रक्षणे चणं=निपुणमिति विग्रहोऽवबोध्यः ।

५. अत्र च निर्धारणार्थकषष्ठी सप्तम्यर्थेऽवबोध्या, ततश्च प्राङ्निर्दिष्टं (समस्तसमस्ताऽज्ञानाऽन्धतमसानां मोक्षप्रोक्षणपर्यवसानानां) विशेषणद्वयं सप्तम्यां परावृत्त्यैवमर्थः सङ्गमनीयोऽत्र, तथाहि--समस्तसमस्ताऽज्ञानाऽन्धतमसेषु मोक्षप्रोक्षणपर्यवसानेषु अनुष्ठानेषु (मध्ये) इति ।

६. 'प्ररूप्यते' इत्यर्थः ।

७. 'आदिः=प्रथमः, अन्त्यः=चतुर्विंशतितमः ताभ्यामन्ये=द्वाविंशतिसङ्ख्याः, क्षीणाऽष्टकर्मणः ये तेषामितिव्युत्पत्तिरत्र ।

८. अर्हतां तीर्थंकराणामित्यर्थः ।

व्युत्पत्त्यर्थस्तु कर्मबीजप्ररोहाऽभाववद्भिरिति भवति, किन्तु तस्य सर्वसिद्धसाधारण्येनाऽत्र-व्याख्यानबलेन रूढ्या वा तीर्थकृतामित्यर्थाऽवगमो न्याय्यः ।

९. एतत्पदेनाऽत्र प्रकृतोपयोगि प्रक्रम्यमाणं "सप्रतिक्रमणधर्मवत्त्वं" विवक्ष्यते ।

१०. श्रीउत्तराऽध्ययनप्रभृतिसूत्राऽऽदिषु श्रीपार्श्वसन्तानीयश्रीकेशिगणाधिपवर्णनप्रसङ्ग" इत्यऽध्याहार्य-मत्र तात्पर्यगामिक्या धिया समुपासितगुरुकुलवद्भिः ।

११. 'अप्रतिहताश्च ते अप्रतिमाश्च अनन्यसाधारणा ये गुणास्तेषां गणस्तं धारयन्ति ये ते' इति व्युत्पत्तिः ।

१२. एषा हि गाथा श्रीअनुयोगद्वारसूत्रे (सप्तविंशतितमसूत्रानन्तरं तृतीयगाथात्वेन आगमोदयसमितिप्रका-शितमुद्रितपत्राकारपुस्तके एकत्रिंशत्तमपत्रस्य प्रथमपृष्ठौ द्वितीयपङ्क्तौ,) दृश्यते ।

१३. शास्त्रकाराणां वचांसि खलु त्रिरूपाणि, तथाहि:-

१ प्रभुसम्मितानि,

२ मित्रसम्मितानि,

३ कान्तासम्मितानि,

१ आज्ञाप्रधानानि निर्विचारं समर्पितभावेन स्वीकार्याणि प्रभुसम्मितानि ।

२ युक्तिप्रधानानि गुणदोषविचारबहुलानि निरवद्यश्रद्धामूलं स्वीकार्याणि–मित्रसम्मितानि ।

३ परमोदात्तकरुणागर्भाणि तत्तन्महापुरुषचरित्रप्रसङ्गोल्लेखबहुलानि भाववात्सल्यमूलानि उत्कृष्ट-धर्मानुरागोज्जीवनबलेन स्वीकार्याणि--कान्तासम्मितानि ।

अत्र हि श्रीऋषभदेव-महावीरप्रभुतीर्थकृतोः शासने दोषे सत्यसति वाऽपि नियतं समय-वेलयाऽवश्यं कार्याणि आवश्यकानीति सूचयन्ती ("अवस्सव्वकाय०" श्रीअनुयोगद्वारसूत्रगाथा) गाथा प्रभुसम्मितवचने आज्ञाप्रधानेऽवतरति ।

१४. "दीन" शब्दो हि "दैङ् हानौ" इतिधातुपाठाधारेण हीनशक्तिकत्वाऽर्थे यौगिकरूपेण भवति रूढिश्च वर्त्ततेऽशरणाऽऽधाररहित-कान्दिशीकजनस्य विक्लवताऽर्थसूचने, तथापि अत्राऽर्थाऽनुसन्धानतः यौगि-काऽर्थहीनशक्तित्वं विवक्ष्य 'अदीनाना'-मित्यस्याऽहीनशक्तिकानाम्, अर्थात् 'सम्पूर्णशक्तिमता' मित्यर्थसङ्गतिस्तात्पर्यानुरोधेन करणीया ।

एतत्पदस्याऽन्वयः अग्रेतनेन "अविचलपदाऽवाप्त्यविकलनिदानत्वे" इत्यनेन सह बोध्यः ।

तेन अविचलं यत् पदं = मोक्षरूपं, तस्याऽवाप्तेरविकलं निदानत्वं, तत्र अदीनानां = सम्पूर्ण-शक्तिमतां चैत्यवन्दनगुरुवन्दनाऽऽदीनामिति योजना कार्या ।

१५. अत्र 'तत्' पदेन सम्यक्त्वशुद्ध्याऽऽदिना स्वाऽऽत्मविशुद्धिकारकाऽनगारवत् अविचलपदाऽवाप्तिहेतु-भूतचैत्यवन्दनाऽऽदीनामवश्यकर्त्तव्यत्वं बोध्यम् ।

१६. आवश्यकमित्यर्थः ।

स्वार्थे 'इय्' प्रत्ययोऽत्राऽवबोध्यः ।

१७. 'पूर्वोक्त'--पदेनाऽत्रोपरिनिर्दिष्टमावश्यकक्रियायाः सोपयोगित्वमाद्याऽन्तिमतीर्थकृतां शासनस्य सप्रति-क्रमणधर्मवत्त्वमित्यादि समूहनीयं धीमद्भिः ।

१८. श्रमणोपासकानामात्मविशोधीच्छावतामित्यर्थः ।

१९. आवश्यकाऽनुष्ठानमर्यादेति भावः।

२०. आवश्यकानुष्ठानमर्यादा।

२१. प्रतिक्रामकानां श्रावकाणाम्।

२२. प्रस्तुतकृतेः 'आवश्यकानुष्ठानविधि'-संज्ञायाः।

२३. आवश्यकानां=सामायिकादीनां षण्णां यत् कार्यं, तस्य विधाने सावधानमन्तःकरणचक्षुः येषामिति-व्युत्पत्तिमत्र विरचय्यैतत्पदगत 'सावधान'--पदेनैतत् समभिव्यज्यते यत्–क्रियमाणसामायिकाऽऽद्या-वश्यकेषु विशेषावश्यकत्वं परमाऽनाहार्यमिति, तदर्थं चैतद्ग्रन्थप्रणयनं हि सार्थकमिति।

२४. अत्र शब्दानामन्वय एवं करणीयो यत्--"इति प्रदर्श्य एतस्य किञ्चित् सुगमताधायि अभिधेयाऽऽदि-प्रतिपादनं तत्त्वनिदर्शनदीक्षणानां सामान्येन निदर्श्यते" इति।

२५. कुशलाऽपरपर्यायोह्ययं शब्दः वैयाकरणमतल्लिकानां समभिज्ञातः।

२६. आचामाम्लानां=नीरस-निर्विकृत्यान्नमात्रैकवारभोजनरूपाणां विधानरूपं यत् कार्म्मणं, तेन वशी-कृता या तपःश्रीः, तस्याः लक्षणं स्वरूपं, तस्या लक्षणेन-अवलोकनेन चमत्कृतः।

पुनश्च यथार्थश्चाऽसौ आर्याणां च आचारः, तस्य रक्षणे प्रवणः, इत्येवंविशिष्टो यः मेदपाटा-धीशः-मेवाडसंज्ञितदेशस्य स्वामी महाराणाश्रीजैत्रसिंहाऽऽख्यः, तेन वितीर्णं 'तपा' विरुदं येभ्यः, तेषामिति व्युत्पत्तिरर्थाऽनुकूलाऽत्र कार्या।

२७. वचनानि अतिगतं भागधेयं येषां तेषां, वचनाऽगोचरभाग्यशालिनामित्यर्थः।

२८. पट्टावल्याऽऽदिग्रंथेष्वनुपलभ्यमानमेतद्धिवृत्तं सद्गुरुचरणसेवालभ्यमानमार्मिकधीषणादद्भिरुह्-नीयं ग्रंथांतरसमीक्षया।

२९, दुर्वासनाभिरवष्टब्धं यत् हृदयं तदेव कौशिकः, घूकः तदर्थं सहस्रकिरणतुल्यं यत्तपः तस्य विधानं तद्रूपो योऽसाधारणहेतुस्तेन लब्धं जन्म यस्यैतादृशस्य 'तप' पदस्य='तपा'इति विरुदस्य उपदीभावः-समर्पणं (महाराणाजैत्रसिंहसंज्ञितमेदपाटाऽधिपतिराजसभायामितिशेषः) तद्वेलायामिति व्युत्पत्तिः सङ्गमनीया।

३०. समुद्रस्येत्यर्थः।

३१. वेला=जलवृद्धिः. 'भरती' इति लोकभाषायाम्।

३२. प्रभावकेषु=प्रकर्षेण भव्यजनानां धर्मभावनाकारकेषु, पुण्डरीकाः=पुण्डरीकाऽऽख्यश्वेतकमलवच्छ्रेष्ठाः तेषां, प्रभावकश्रेष्ठानामित्यर्थः।

३३. काल इत्यर्थः।

३४. श्रीमद्भिर्देवेन्द्रसूरीश्वरैः विहितग्रन्थाश्चेमेऽनया गाथयाऽवबुध्यन्ते, तथाहिः–

१ श्रीदशाश्रुतस्कन्धसूत्रवृत्तिः

२ श्रीकर्मग्रन्थपञ्चकम्

३. श्री सिद्धपंचाशिकाप्रकरणम्,
४. श्री चैत्यवंदनभाष्यम्,
५. श्री गुरु ,, ,, ,
६. श्री प्रत्याख्यान ,, ,
७. श्री सुदर्शना–चरित्रम्,
८. श्री श्राद्धदिनकृत्यसूत्रम्,
९. श्री ,, ,, ,, वृत्तिः,
१०. श्री धर्मरत्नप्रकरणवृत्तिः (बृहती),

३५. ऐदंयुगीनी वा जनता तस्याः हितस्य करणाय लब्धः प्रभवः यैस्तैरिति व्युत्पत्तिर्विज्ञेया ।

३६. सपत्नः–सधर्मा, न सपत्नः असपत्नः स चासौ ज्ञानस्य विभवः येषां तैरिति विग्रहः ।

३७. 'विना' इत्यर्थः ।

३८. अनूनः सम्पूर्णः उपयोगीति भावः ।

३९. एतद्धि पदं 'दृष्टान्त' मित्यस्य विशेषणरूपं विज्ञेयम् ।
एतस्य हि तात्पर्यगामी विग्रह एवं बोध्यः—
कान्तायास्तुल्यः सरसो य आस्वादः, दत्त अमितश्चासौ हर्षस्य प्रकारो येन, एतादृशकाव्यनिचयः, हेयोपादेययोः ज्ञानं (हानं) उपादानं, तयो फलप्राप्तेः वर्णनम्, इत्येतत्त्रयाऽऽत्मकं दृष्टान्तं विना इत्यन्वयः सङ्गमनीयः ।

४०. त्यागे इत्यर्थः ।

४१. श्री पञ्चाशकादि–ग्रन्थानां बुद्धिगम्य–तर्क–युक्तिबहुलनीत्या सिद्धांतप्रतिपादकत्वादत्र मित्रसम्मितत्वमुदाहृतमस्ति ।

४२. श्रीआवश्यकादिग्रन्थानां सर्वज्ञमूलकत्वात् सर्वजीवहितकारिनैकविध–मोक्षमार्गस्याऽऽज्ञाप्राधान्येन प्रतिपादनात् प्रभुसम्मितत्वमत्र निदर्शितमस्ति ।

४३. धर्मप्रधानाः याः कथास्तासामुनयोगो व्याख्यानं तस्योपयोगः कर्तव्यबुद्धिरित्यन्वयसङ्गतिरत्र कार्या ।

४४. आदेशः–आज्ञा सा प्रधानं येषां तैरिति विग्रहः ।
अस्य पदस्य भावार्थो ह्ययमत्र बोद्धव्यो यत् "विश्वजनीनतामूलक–भाववात्सल्यवारांनिधि–परमोपकारि–श्रीतीर्थकृतां व्यत्यास-विपर्यासाऽऽदिमूलभूतमोहविलयहेतुक-सकलजीवातु-सदुपदेशप्रणेतृणामाज्ञाया एव प्राधान्यमस्ति, मुमुक्षूणां स्वेप्सितप्राप्तये" इति संसूचनायाऽत्र पूज्यपादाऽऽगमोद्धारकवर्यैः "आज्ञाप्रधानै" रिति मार्मिकविशेषणं प्रयुक्तमस्ति ।

४५. एतत्पदस्य सामान्यतो ह्यर्थः "**प्रामाणिकजनै**"रिति भवति, परमत्र लाक्षणिकशैल्या "परमोत्कृष्टज्ञानमूलक-प्रामाणिकत्वभ्राजिभिस्तीर्थकृद्भि" रिति सङ्गमनीयम् ।

४६. एतद्धि पदं "**चरित्रेषु**" इत्यस्य विशेषणं ।
विशेषतः कस्याऽप्येकविषयस्य मुख्यत्वं यत्र न भवेत्तानि हि साधारणानि चरित्राणि व्यपदिश्यन्ते ।

४७. आप्तवचनरूपं यत् प्रवचनं तेनाऽऽविर्भूतो योऽसीमश्चासौ समतारसस्याऽऽस्वादः, तेनोद्भूतो यः कृपारूपपीयूषरूपवारिणः पूरः येषां ते ।

४८. यथार्थश्चासौ प्राप्तः ज्ञानस्यः पूरः=समूहः यैः ।

४९. क्रमेणति शेषः ।

५०. एतस्य ह्यन्वयः प्राक्तनेन " प्रत्याख्यानसूत्राणा "मित्यनेन सह विज्ञेयः ।

५१. अत्र हि '**च**' पदं वाक्यालङ्काररुपं विज्ञेयम्, न समुच्चयवाचकं, प्राक्तनस्य विषयस्याऽत्राऽनवतारात् ।

५२. '**अनेन**' इत्यनेन प्राक्तनविषयस्य वन्दनकसूत्रादर्वाक् प्रत्याख्यानसूत्रव्याख्यासङ्गतिरुपस्य नाऽत्र परामर्शोऽवबुध्यते, तात्पर्यसङ्गतेरभावात्, परमत्र '**अनेन**' पदेन ग्रन्थकृतां बुद्धिस्थस्य प्रकृतस्य '**श्रावकानुष्ठानविधि**'संज्ञग्रन्थस्यैतद्गतवन्दनसूत्रव्याख्यासन्दर्भस्य वा परामर्शः सङ्गच्छते ।

५३. "विधानानि-भेदास्तेषां दर्शनेनाऽत्र ग्रन्थे निरुप्यमाणवन्दनविधौ"-इत्यर्थसङ्गतिरत्र कार्या ।

अथवा विधानं-विधिः पद्धतिरिति यावत्, तस्य दर्शनेन, अर्थात् अत्र ग्रन्थे प्रतिपाद्यमानवन्दनकविधिसन्दर्भेऽवलोकनेनेति भावः ।

एतेनाऽऽगमोद्धारकपादा एतदभिव्यञ्जयन्ति यत् "वर्तमानकाले या वन्दनप्रणालिका प्रचलति, तस्याः प्राचीनत्वमाप्ताऽभिसन्धिमूलकत्वमेतद्ग्रन्थगतविधिसन्दर्भेणाऽध्यवसीयते" इति ।

५४. अत्राऽलुक्समासोऽवबोध्यः ।

५५. निर्दिश्यमानं तत्'सम्पदा'ऽऽदिद्वारत्रयोदशकं भाष्यत्रयाऽऽख्यग्रन्थवर्णितमत्र विवेचनया वर्णितमस्ति ।

५६. अतिशयेनाऽधिकारीति अधिकारितमः, तैरेवैकवेद्या इति व्युत्पत्तिं कृत्वाऽत्र ग्रंथे वर्णिताऽधिकारत्रयोदशकाऽऽदिवर्णितवस्तुजातस्याऽधिकारानुरुपं गुरुगमवेद्यत्वं समभिव्यञ्जयन्ति श्रीमन्त आगमोद्धारकपूज्यपादाः ।

५७. न हि समस्तमेतत् पदम्, किन्तु 'तस्मादि'त्यर्थ परकं 'तत्' इत्यव्ययमत्र बोद्धव्यम् ।

५८. 'प्र' पूर्वक 'स्फुर्' धातोः यङन्तस्य सप्तमी ( विध्यर्थ ) रुपमिदम् ।

५९. एतेन समस्तेन पदेन 'शेठ देवचन्द्र लालभाई जैन पुस्तकोद्धारफंड" संस्थाया अभिख्या सूचिताऽस्ति ।

६०. पूर्वं निवेदितमिति निवेदितपूर्वमिति समासोऽत्र बाहुलकाद्याश्रयणेन सङ्गच्छते ।

६१. पूर्वं मुद्रित इति मुद्रितचरः इति विग्रहः, भूतपूर्वार्थे चरट्प्रत्ययस्याऽत्र विधानमस्ति ।

६२. 'श्रेष्ठी श्रीमनसुखभाई'ना विहितः ज्ञानोद्धारार्थं पुस्तकानां प्रबन्धः यत्र यस्माद्वे व्युत्पत्तिमत्तित्र संगमय्यैतत्पदेन "राजनगर (अहमदाबाद) स्थित शेठ मनसुखभाई भगुभाई ट्रस्ट" संज्ञसंस्थासूचन मत्र बोध्यम् ।

६३. अयं हि शब्दः "लाडवाश्रीमालीज्ञातिसूचको विज्ञेयः, 'लाडवाश्रीमाली'तिपदस्याऽऽप्तैतिह्यवित्-प्रमाणितोऽर्थ एवमपि श्रूयमाणोऽस्ति यत् "लाटदेशीया लाटदेशादागता वा श्रीमालीज्ञातीयाः लाडवाश्रीमालीत्यर्थे लाडश्रीमालीया उच्यन्ते," ।

एतज्जातीयानां बाहुल्यं भृगुकच्छे तत्प्रान्तीयमण्डले इदानीमस्ति, भृगुकच्छप्रदेशस्य परमार्हत-कुमारपालमहाराजराज्यकाले तदूर्ध्वमपि च लाटदेशत्वेन व्यवहृतिरभियुक्तप्रमाणिता श्रूयतेऽपि ।

६४. परमश्चासौ=सर्वोत्कृष्टश्चासौ आनन्दश्च तस्याऽऽलयः=मोक्षः तस्याऽऽप्तेरसाधारणं कारणं यत् रत्नत्रयं, तस्य निचयः व्यवस्थिताऽनेकधर्मक्रियासमूहरूपः, तस्मिन् सादरश्चासौ श्रमणप्रधानसङ्घः तस्य पादपङ्कजयोः मधुपवदाचरमाण इति तात्पर्यलक्षी अन्वयो विज्ञेयः ।

६५. जातानि यानि स्खलितानि तान्येव दोषाः तद्रूपं यत् दुरितं तत्संबन्धी अनुशयः—पश्चात्तापो विद्यते यस्येति विग्रहः ।

६६. सकलत्वमत्र सम्पूर्णार्थवाचि न विज्ञेयं, परं पार्श्वजिनेशांध्रिपूतत्वरूपकलासहितत्वं विवक्ष्यम् ।

श्री आगमोद्धारकाऽऽलेखित-प्रस्तावनासंग्रहस्वरूपे

# आनन्दरत्नाकरे

## अष्टमं रत्नं

### श्रीछन्दोऽनुशासन-ग्रन्थस्य उपक्रमः

॥ श्री गणधरेन्द्राय नमः ॥ ननु भोः [१]सहृदयहृदयाऽऽलवालोद्गताऽनवद्यविद्याव्रतति-फलयुगलाऽऽस्वादसतृष्णाऽन्तःकरणाः सहृदयाः निर्णीतचरमेतद् विद्वद्वृन्दारकैः [२]सर्वतन्त्रानुकूल्येन [३]निबिडतर-जडिमाऽवष्टब्ध-मानसवृत्तिप्रातिकूल्येन यदुत "न तावद्दते शब्दानुशासनाद [४]प्रतिमसुधारसायमानाऽनवद्यशब्दसृष्टिशर्वरीशायमानात्स्व:-[५]शिवश्रीप्रदानपटुराविर्भवति [६] अपेतपङ्को बोधो, यथार्थवादिता तु न भवत्येव कथङ्कारमपि तमन्तरेण, आगमोऽप्येतदेव निवेदयति निर्णीतमोक्षगमनानामसुमतां [७]'वयणविहत्तीइ कुसलो' इत्यादिना गतपापेनाऽऽलापेन।

जातेऽपि च विभक्तिवचनाऽऽख्यातकृदादिबोधे यावन्न वेविदितः शब्दानां यथावल्लिङ्ग-विभागो न तावद्भवत्युत्तरणं मृषावादाख्यायाः [८]पापव्याघ्यावसथायाः, आबालमनुभवसिद्धमिदं यदुत लिङ्गपरावर्त्तमात्रेणोद्भूतिः साक्षात् क्रोधकृशानोः श्रूयमाणेषु [९]स्वाश्रितवचनेष्वप्रतिक्रिया। [१०]अवगतेऽप्येतस्मिन् [११]द्वितये [१२]पापपङ्कापहारशोधिविततये न भवति यावन्नाऽऽत्मायत्तीकृतम [१३]विकलविभावाऽनुभावव्यभिचार्याऽऽदिसंकलितस्वभाव-रसभावाभिधानरत्ननिधानं काव्यानुशासनं तावद्यथावद्वक्त्राद्यभिप्रेता [१४]ऽर्थबोधोऽपरबोधनं [१५] च यथार्थतया नायक-प्रतिनायकादीनामभिप्रायक्रियादेः।

तद्युक्तमेव [१६]अतीता-ऽनाऽऽगत-वर्तमानकालीनाऽतीन्द्रियाऽर्थ-ज्ञानसम्पन्नताऽऽदिप्रभाव-लब्ध-कलिकालसर्वज्ञत्वबिरुदानां भगवतां क्रमेण श्रीसिद्धहेमाख्यं पाणिनीयाद्यखिलशब्दाऽनुशासन-यशस्तारागण-प्रभापटल-विकर्तनप्रभमनूनं [१८]त्रिमुन्यसमापितं [१९]समाप्तं शब्दानुशासनं, [२०]बालसुबोध्ययथावत्पृथग्ज्ञानकरणोपयोगिकरण [२१]मक्षराऽनुक्रमाऽऽक्रान्तयशःशरीरं लिङ्गानुशासनं, [२२]काव्यतद्धेतुस्वरूपगुणदोषरसादिस्वरूपविभावनापूर्वादर्शयमानमनुपमं काव्यानुशासनं चेति त्रयस्याप्रतिमस्य श्रीमद्धेमचन्द्रप्रभूणां जगति [२३]रचनं।

परं यावन्नाधिजग्मे विदुषा [२४]शकलितशङ्कादोषं छन्दोऽनुशासन[२५]मनेकच्छन्दोविज्ञानपोषं न तावद्यथावदुच्चार: काव्यानां निर्दोषत्वाधानं च सम्पनीपद्यते, कौतस्कुती च [२६]छन्दोभङ्ग-विरतिप्रभृतिविवेकवाग्मिता तु ? तदवश्यमादरणीय[२७]मखण्डपण्डानुगतविचाराणां [२८]धीसाराणामेतदपि[२९] [३०]प्रागुदीरितानीरितानुशासनत्रयी वेति न तत्र काचन [३१]विचारकणिका वेविद्यते [३२]विद्याव्रतततितिभूरुहां [३३]उज्झितमुहां [३४]स्वीकुर्वतामूहाम् ।

आविर्भावयितार[३५]श्चानवद्याऽनुशासनचतुष्काऽनुशासनाऽलंभविष्णवनुशासनचतुष्कस्य प्रसिद्धतमा:, जीवनवृत्तमपि च तत्रभवतां भगवतां न केनाप्यविदितमाबालगोपाङ्गनं ख्याततरं समासेने[३६]तरथाकरणे तु नैव [३७]तस्य [३८]तथा समीहा[३९] शक्तिश्च, [४०]प्रस्तुताऽपश्चिमानुशासनमानातिरेकतरस्य [४१]तस्य मध्यमतयाऽपि भावान्न [४२]तत्रापि यत्नो, न च योग्योपि मादृशोऽयं जनस्तादृगितिहाससाधनहीनसाधनतया यथावत्तया ।

परं सत्सु भरत-जयदेव-पिङ्गलाऽऽदिप्रणीतेष्वनेकेष्वनवद्येषु छन्दोऽनुशासनेषु किमिति [४३]सुत्रामधुरीकारकरणमिव किमिव न बोभवीति हास्यास्पदमेतद्वचनमिति चतुरचक्रचेतसि च वा स्यात् ! नच तच्चतुरं विचक्षणचक्रवालशोभा–(चङ्गता) वहं, यतो [४४]नेदृग्गुम्फं सुगमं वा तेष्वेकतरमपि । अन्यच्च तत्र तत्र केवलवेदोपयोगिच्छन्दोनुशासनेनाऽऽपादितं [४५]तत्तद्विशेषोपयोगि, प्रस्तुतं केवल-लोकोपयोगि-च्छन्दोऽनुशासनसमर्थमाविर्भावयाञ्चक्रुराराध्यतममनुशासनम् ।

एतच्च निःशेषस्यास्यानुशासनस्याभ्यासाद्यथावत् स्यादवधारितं परमाऽऽद्यश्लोकेऽपि तावत् भगवद्भिः 'लोकोपयोगिनां वक्ष्ये, छन्दसामनुशासनम्' इत्युत्तरार्द्धेन निदर्शितम् । शब्दाऽनुशासनादिभि: समानकर्तृकत्वं तूदाजह्रुः 'सिद्धशब्द-काव्यानुशासनः' इत्यनेन स्वयमेव भगवन्तः, दृब्धं चेदं श्रीमद्भिश्चौलुक्येश्वरे श्रीपरमार्हतकुमारपालेऽमारिघोषडिण्डिमवादके शासति राज्यम्, यत उपलभ्यते तत्र तत्र श्रीसिद्धराजस्याऽस्य च राजर्षेः स्तुतिरुद्राह्रियमाणेति ।

अत्र चाऽध्यायाऽष्टकं प्रणीतं [४७]प्रज्ञाऽवदातत्व ऽवज्ञातपुरन्दरगुरुभिस्तत्रादौ सञ्ज्ञाऽऽद्याऽध्याये द्वितीये च जाति शेष-जातिदण्डकानां छन्दांसि चत्वारि शतानि अधिकान्येकादशभिः, अत्र च क्षन्तव्यमागो दृष्टिदोषजं यत्सप्तनवत्यधिकशतद्वय्यतिक्रमेऽपिच्छन्दसां पुनश्चतुर्नवत्यधिकाच्छतमानादङ्कारम्भो जातोऽस्ति ।

तृतीये चाऽध्यायेऽर्धसमवृत्तानि हरिणप्लूताद्यानि अतिरुचिराऽवसानानि वक्त्रप्रकरणं चाऽनुष्टुब्भिः ।

अत्र च येऽनवधार्य [४८] निस्सीमप्रतिभाप्राग्भारपराकृत-पुरन्दरगुरु-सरस्वतीयुगलस्य [४९] सर्व-तन्त्रस्वतन्त्रधिषणाऽन्वितत्वमुदाजह्रुः परिशिष्टपर्वणि दुरुद्धरं विरोधं छन्दसां केषाञ्चित्, तैर्नाऽवबुद्धं द्वाविंशतितमपत्रीयं प्रायेणेतिपदम्, अवबुद्धं वा ईर्ष्यालुतया [५०] जैनधर्मधुरन्धरेभ्यो न स्मृतं, तथैव षष्ठपत्रगतं 'सर्वजातीनामपीति वृद्धाः' इत्यादि, यदि चाऽवधारितमभविष्यत्तदा नाऽलीकमुदपादयिष्यत्कलङ्कम्, मन्ये प्रमार्जयिष्यन्ति स्वयं ते इति न विशेषेण समीक्ष्यतेऽत्र ।

अत्रैव पदचतुरूर्द्ध्वममृतधारान्तम् उद्गताप्रकरणं सप्तभिः उपस्थित-प्रचुपितप्रकरणं च, त्रिभिः सौम्य-ज्योतिषी च निरूपितवन्तो विषमवृत्तप्रकरणे मात्राछन्दसि च वैतालीयं त्रिंशता, मात्रासमकादि नवभिर्निर्वर्ण्य निगमितवन्तोऽध्यायं तृतीयम् ।

तुर्ये चाध्याये आर्या-गलितक खञ्जक-शीर्षकाख्यानि वृत्तानि ख्यातान्यनेकधा, अत्र च आ तृतीयाध्यायात्संस्कृत एवोदाहरणानि [५१] अलब्धमध्यस्वमतिहृदनिर्व्यूढप्रवाहककल्पानि चाऽखिलान्येतानि, परतश्च आर्याप्रकरणे च प्रायेण संस्कृत-भाषाभाषितान्येव, परं क्वचित् क्वचिदस्त्येवाऽप्राकृतजनरूचिविषयीभूतं जीवस्वभावगुणतया मूलभाषातया प्राकृतगीर्ष्वप्युदाहरणवर्णनम्, गलितकाऽदौ तु तानि तत्रैवोपनिबद्धानि ।

पञ्चमे त्वध्यायेऽत्रोत्साहादीनि छन्दांसि मुख्यतया व्यावर्णिताऽपभ्रंशभाषोदाहरणानि ख्यापितानि, षष्ठे षट्पदी-चतुष्पदीनां शासनम्, सप्तमे चाऽनेकधा व्यावर्ण्य द्विपद्यभिधानमतिरुचिरतरं प्रकरणं, प्रान्ते प्रस्तार-नष्टो-द्दिष्ट-सर्वैकाऽऽदिगलक्रिया-सङ्ख्याऽध्वयोगाऽऽख्याः षट् प्रतिपादिताः प्रत्ययाः [५२] प्रत्येयाः [५३] प्रतीतप्रतिभानामष्टमेऽध्याये सूरिभिः ।

तदेवमतीवोपयोगिनोऽस्याऽऽरब्धं मुद्रणं मोहमयीनगरीवास्तव्यगुणगरीयस्त्वलब्धगुरुगरिम्णा श्रीसङ्घेन परयाऽस्माकमखिलश्रमणसङ्घपादपङ्कजचञ्चरीकायमानानां प्रेरणया, क्षन्तव्यं च क्षान्त्यादिनिखिलाऽक्षतगुणाऽगारतया रत्नाकरायमानैर्निर्मानै [५४] रमेयगुणरत्नरत्नाकरायमानश्रीमज्जिनवरोदितोदितोदितशासन-शासनप्रभावकैर्वितीर्य दयां [५५] मन्तुक्षमामूलभूतामस्मास्विति प्रार्थयामहे [५६] आत्मगुणलीनमानस-चरणपङ्कजषट्पदा आनन्दोदन्वदभिधानाः ॥

नवसायां रमासार-पूर्णायामार्यराजनि ।
श्रीपार्श्वपादपूतायामपूर्यानन्दसाधुभिः ॥१॥

एतन्मुद्रणाधारभूता प्रतिः श्रीराजनगरीयश्रीउमाभ्रातृश्रेष्ठिभाण्डागाराल्लब्धपूर्वा दुर्लभैव च प्रतिरस्येति भविष्यन्त्यशुद्धयः प्रचुरा अत्र, ज्ञापनीया वयं परं ता यतो द्वितीयसंस्करणे सह भव्यजनैरस्माकमुपकारकारिण्यो द्रुततरमिति प्रार्थनाऽवधारणीया धीमद्भिर्भवद्भिः ।

# * श्री छन्दोऽनुशासनोपक्रमपूर्तिः *

क्वचित्किञ्चिदनुसृत्य भवेन्मतान्तरमुपन्यस्तं नामान्तरमिति छन्दोरचनाकर्तृणामपरेषामभिप्रेतानि आख्यानान्तराणि दिदर्शयिषया बाहुल्यं केवलं भरतस्यैकस्यापि मतेनेति तन्नाम्नाऽन्यनाम्ना चान्यानि समुदितानि संगृहितान्यत्राभिधानान्तराणि ।

अन्यनामनि यत्रोपलब्धो विशेषो लिखितः सोऽपि इति चिन्हे कृत्वान्तरे, भविष्यति च विदुषामेतदवलोकनेनापि "सकलप्रमाणपथावतीर्णच्छन्दोऽनुशासनप्रवणापरग्रन्थनवनीतास्पदत्वमस्य छन्दोऽनुशासनाभिधानस्य शास्त्रस्य ॥

## भरतमते

३–केशा-धूः
मृगी-तडित्
मदनः-रजनी
सुमुखी-ललिता
विलासिनी-जया
समृद्धिः-पुण्यम्
सुमतिः-भ्रमरी
विदग्धकः-वागुरा
पङ्क्तिः-कुन्तलतन्वी
सती-शिखा
अभिमुखी-कमलमुखी
रमणी-नलिनी
शशिवदना-मकरशीर्षा

मुकुलं-वीथी
शफरिका-गिरा
४–उष्णिक् शिखा
कलिका-भोगवती
हरिविलसितं-(द्रुत) गतिः
प्रमाणी-मत्तचेष्टितम्
५–भुजगशिशुसृता-मधुकरिका
पणव-कुवलयमाला
(मन्सगाः इत्यपि)
रुक्मवती-पुष्पसमृद्धिः
६–श्री रुचिरा (यत्यनियमे प्रत्ययबोधः)
स्वागता-(भद्रिका) अपरवक्त्रम्

सुमुखी–द्रुतपादगतिः
७ कमलदलाक्षी–रुचिरमुखी
द्रुतविलम्बितं-हरिणप्लुतम्
भुजङ्गप्रयातम्-अप्रमेया
स्रग्विणी–पद्मिनी
९ नन्दिनी–मनोवती
१० मालिनी–नान्दीमुखी
११ ऋषभगजविलसितं
मत्तगजविलसितम्
१२ पृथ्वी-विलम्बितगतिः
मन्दाक्रान्ता-श्रीधरा

(अत्र चाङ्कस्थानानि छन्दोऽनुशासनप्रतिगतपृष्ठसूचकानि ज्ञेयानि । प्रथमनाम मूलप्रतिस्थं द्वितीयं च नाम भरतमुनिमान्यतानुसारं विज्ञेयम् । सं०)

*

# अन्यमते

३ स्त्री-पद्मम्
मदः-पुष्पम्
पङ्क्तिः-अक्षरोपपदा
अभिमुखी-मृगचपला
शशिवदना-मुकुलिता
४ कलिका-सोपानम्
हरिविलसितम्-चपला
मधुकरिका-वज्रम्
९ कामिनी-तरङ्गवती
१० रुक्मवती-चम्पकमाला
रुक्मवती-सुभावा
कुमुदिनी-कुसुमसमुदिता
माला-प्रमिता
११ श्रीः-सान्द्रपदम्
श्येनी-निःश्रेणिका
१२ वंशस्थं-वसन्तमञ्जरी
वंशस्थं-अभ्रवंशा
कलहंसः-द्रुतपदा
कलहंसः-मुखरम्
उज्ज्वलं-चपलनेत्रा
कुसुमविचित्रा-मदनविकारा
कुसुमविचित्रा-गजलुलितम्
कल्याणं-काञ्चनम्
प्रियंवदा-मत्तकोकिलम्

वैश्वदेवी-चन्द्रकान्ता
मालती-वरतनुः
प्रमुदितवदना-गौरी
प्रमुदितवदना-चञ्चलाक्षी
तामरसं-कमलविलासिनी
विभावरी-वसन्तचत्वरम्
मेघावली-वसन्ता
१३ सुवक्त्रा-अचला
कुटिलगतिः-नर्त्तकी
नन्दिनी-कनकप्रभा,
जयाः-सुमंगली
कुटजं-भ्रमरः
त्वरितगतिः-लघुगतिः-चपला
१४ वसन्तः-नान्दीमुखी
वसन्ततिलका-उद्धर्षिणी
(सैतवः)
सिंहोन्नता-काश्यपः
वलना-लता
धृतिः-मणिकटकम्
स्खलितं-महिता
कान्ता-वनमयूरः
कुटिलं-हंसश्येनी
१५ शशिकला-चन्द्रावर्ता
(पिङ्गलः)

स्रकु-माला (पिङ्गलः)
चित्रा-मण्डूकी चञ्चला
कलभाषिणी-अरविन्दकम्
सुन्दरं-मणिभूषणं, रमणीयम्
१६ संगतं-पद्ममुखी, सुरता
समुद्धरणं-सोपानकम्
कामुकी (सुगौः)-सोमडकम्
जयानन्दं-प्रवरललितम्
१७ वंशपत्रपतितं-वंशदलम्
अतिशायिनी-यादवी
हरिणी-वृषभललितम्
अवितथं-नर्कुटकं (जयदेवः)
१८ काञ्ची-वाचालकाञ्ची
उज्जवलं-मालिका
उत्तरमालिका
निशा तारका
भङ्गी-विच्छित्तिः
१९ मेघविस्फूर्जिता-रम्भा
(स्वयम्भूः)वञ्चितं-विचितम्
२० मुद्रा-उज्ज्वलम्
चित्रमाला-सुप्रभा
कामलता-उपमालिका
२१ सिद्धिः-चित्रलता
रुचिरा-शशिवदना

२२. मदिरा-लताकुसुमम्
२३. हंसगतिः-महातरुणी-दयितम्
२४. मेघमाला-मञ्जा
नीलालका
(अर्धसमे) मालभारिणी
नितम्बिनी
(विषमे) कलिका-मञ्जरी
(पिङ्गलः)

उपक्रान्तिश्छन्दसामकाराद्यनुक्रमेण नाऽत्राऽऽचीर्णा, यतो मूलमत्र पाथक्येन मुद्रितमेव, उदाहरणसूची तु नैवेतादृशे प्रकरणे उपयोगिनीति न तत्राऽऽद्रियामहे, यदि च भविष्यति द्वितीयावृत्तौ सोपयोगिताऽस्याः, तामपि प्रकाशयिष्यामः ।

## 卐 मार्मिक–सुभाषित 卐

★ परस्वभावे रमणं विहाय,
रमस्व जीवाऽऽत्मगुणे शुभे त्वम् ॥

★ उद्वीक्षतेऽनुक्षणमात्मरूपं
स एव मार्गे प्रतिपन्न आत्मा ॥

★ कर्माणूनां रसततिमशुभां
साम्यरूढः क्षिणोति ॥

★ शुद्धं रूपं मंक्षु संसारक्षत्यै ॥

—पू० ध्यानस्थ–स्वर्गत आगमोद्धारकश्री-
–विरचित-सूक्त–संचयतः ।

श्रीपूज्यपादागमोद्धारकाऽऽचार्यश्रीलिखितप्रस्तावना-
विषमपदार्थसूचिका

# आनन्दलहरी-टिप्पणी

( छन्दोऽनुशासनम् )

१. सहृदयानां हृदयं तदेवालवालः तत्रोद्गता याऽनवद्या विद्यारूपा व्रततिः—लता, तस्याः फलयुगलं सम्यग्ज्ञान-क्रियारूपं, तस्याऽऽस्वादार्थं सतृष्णं—उत्कंठायुक्तं अन्तःकरणं येषां ते इति व्युत्पत्ति-रत्रार्थानुपातानुसारं विज्ञेया ।

२. सर्वानि च यानि तन्त्राणि=दर्शनान्तरीयशास्त्राणि । तेषामानुकूल्येन, सर्वदर्शनसम्मतरीत्येत्यर्थः ।

३. अतिशयेन निबिडा या चासौ जडिमा=अज्ञानदशा तयाऽवष्टब्धा, व्याप्ता या मानसवृत्तिः, तस्याः प्रातिकूल्येन गाढाऽज्ञानदशाबलोत्पद्यमानविरुद्धभावाऽपसारणेनेत्यर्थः ।

४. नास्ति प्रतिमा—साधर्म्यवती व्यक्तिः यस्यैतादृशो यः सुधारसः, तद्वदाचरमाणा या अनघा=दोषरहिता शब्दसृष्टिः तस्याः शर्वरीशः=चंद्रस्तद्वदाचरमाणादिति विग्रहः ।

५. स्वः=स्वर्गः, शिवश्रीः=मुक्तिलक्ष्मीः, तयोः प्रदाने पटुः=निपुण इति विग्रहः ।

६. पङ्कस्य मलिनत्वार्थे विवक्षां कृत्वा अत्र **'निर्मलः'** इत्यर्थसङ्गतिः कार्या ।

७. एषा हि गाथा प्रायः निशोथचूर्णिगता संभाव्यते ।

८. पापरूपा या व्याघ्री भावजीवितव्याघातिका, तस्या आवसथा=वसतिः, तस्या इति व्युत्पत्तिः ।

९. स्वसम्बन्धि—वाणीव्यवहारेष्वित्यर्थः ।

१०. एतद्धि विशेषणं "क्रोधकृशानोः उद्भूतिः" इत्यस्य विज्ञेयम् ।

११. शब्दानुऽशासन—लिङ्गाऽनुशासनस्वरूपे ।

१२. पापरुपपङ्कस्याऽपहारः—निरासः, तद्रूपा या शोधिस्तस्याः विततिः प्रसारस्तस्मै ।

१३. अविकलैः व्यवस्थितस्वरूपैः विभावाऽनुभावाऽव्यभिचार्यादिभिः संकलितः स्वभावो येषामेतादृशानां रस—भावादीनां यदभिधानं तान्येव रत्नानि, तेषां निधानरूपं इति विग्रहः ।

१४. एतत् पदस्य प्राक्तनेन 'न भवति' इत्यनेन सहाऽन्वयो बोध्यः ।

१५. एतस्याऽपि "न भवति" इत्यनेन सहाऽन्वयः ।

१६. अतीतश्च अनागतश्च वर्तमानश्च योऽसौ कालस्तमथवा येऽतीन्द्रिया अर्थास्तेषां ज्ञानेन सम्पन्नताऽऽदिरूपो यः प्रभावस्तेन लब्धं **कलिकाल**सर्वज्ञत्वरूपं बिरुदं यैस्तेषामिति विग्रहोऽत्रावबोध्यः ।

इदं हि पदं अग्रेतन "श्रीहेमचन्द्रप्रभूणा"मित्यस्य विशेषणं विज्ञेयम् ॥

१७. पाणिनीयाद्यानि च तानि अखिलानि=समस्तानि शब्दानुशासनानि तेषां यशःरूपो यस्तारागणः, तस्य या प्रभा, तस्याः पटले विकर्तनः—सूर्यस्तत्समप्रभम् इति व्युत्पत्तिः ।

१८. इदं हि पदं सर्वव्याकरणेषु मूर्धन्यरूपेण गीयमानस्य पाणिनीय-व्याकरणस्याऽपूर्णताद्योतकं काकूत्प्रेक्षागमकं विज्ञेयम् ।

महर्षिपाणिनिना सूत्राणि रचितानि, मुनिकात्यायनेन वार्त्तिकं विरचितम् , भगवता पतञ्जलिना महाभाष्यं सन्दृब्धम् , तथाऽपि पाणीनीयं शब्दाऽनुशासनं बहुत्र शब्दव्याकृतावसमर्थमूनं वाऽनुभूयते विद्वद्भिः ।

१९. सम्पूर्णं सर्वप्रकारेणेत्यर्थपूरकमिदं पदम् , नहि सम्पूर्णीकृतमित्यर्थः ।

२०. बालैः सुष्टु बोध्येत यथा तथाप्रकारं, यथावत्=यथार्थं पृथग्=व्यवस्थितरीत्या यद् ज्ञानं, तस्य करणे उपयोगिकरणभूतमित्यर्थः ।

२१. स्वर—व्यञ्जनानामाबालप्रथितानुक्रमसङ्गतिनाऽवधारणादिसौकर्यगुणयुक्तमित्यर्थः ।

२२. काव्यं, तस्य हेतवः, स्वरूपं, गुणाः, दोषाः, रसः, तदादीनां यत् स्वरूपं तस्य विभावना=पर्यालोचनं तदर्थं अपूर्वः=विलक्षणः आदर्शः=दर्पणं तद्वदाचर्यमाणमिति तात्पर्यानुसारी विग्रहः ।

२३. अस्य पदस्य सन्दर्भादिगतस्य "तद्युक्तमेवे"त्यनेन सहान्वयः ।

एवं च **तम् अतीताऽनागत..........सर्वज्ञत्वबिरुदानां भगवतां श्रीमद्धेमचन्द्रप्रभूणां क्रमेण श्री सिद्धहेमाख्यं......शब्दानुशासनम्..........लिङ्गानुशासनं........काव्यानुशासनं चेति जगति अप्रतिमरचनं युक्तमेव"** इति तात्पर्यानुगुणोऽन्वयः ? बोध्यः ।

२४. शकलितः=खण्डीकृतः शङ्कारूपो दोषः येनेति व्युत्पत्तिः ।

२५. अनेकेषां छन्दसां विज्ञानरूपः योगः यस्मादिति व्युत्पत्तिर्विज्ञेयाऽत्र ।

२६. छन्दोभङ्गाः=उच्चारे वर्णमात्रादिन्यूनाधिक्येन स्खलनं, विरतिः=छन्दसि कुत्र कियदक्षरेषु कियतीसु मात्रासु च विरामः, एतत्प्रभृतिर्यो विवेकस्तेन या वाग्मिता=कुशलता इति विग्रहः ।

२७. अखण्डा=सम्पूर्णा या पण्डा=सदसद्विवेकशालिनी बुद्धिः, तयाऽनुगताः विचाराः येषां, तेषां ।

२८. धीः बुद्धिः सारा=प्रधीना येषां तेषां, श्रेष्ठबुद्धिमतामित्यर्थः ।

२९. छन्दोऽनुशासनमपि ।

३०. प्राक् उदीरिता=व्यावर्णिता चासौ, अनीरिता नाम कस्यापीरणं=सहायकर्म नास्ति यस्यामित्येतादृशी या अनुशासनत्रयी=शब्दानुशासन–लिङ्गानुशासन–काव्यानुशासनरूपा ।

३१. अत्र हि **'कणिका'**शब्दप्रयोग एतद्ग्रंथस्योपयोगित्वेन स्वीकृतौ न कस्याश्चिदल्पप्रमाणाया अपि शङ्काया लेशमात्रप्रसर इति ध्वनयति ।

३२. विद्यारूपा या व्रतत्यः लताः तासां ततिः श्रेणिः, समूहो वा, तदर्थं भूरुहः=वृक्षा इव ये तेषां । विद्यासम्पन्नविदुषामित्यर्थः ।

३३. मोहयति यत् तत् मुह्=मोहः (क्विबन्तप्रयोगः) उज्झितः मुहुर्यैस्ते तेषां, वस्तुविचारे व्यामोहरहितानामित्यर्थः ।

३४. ऊहा=पूर्वापरसङ्गतिपर्यालोचनस्वरूपा तां स्वीकुर्वताम्, पूर्वाऽपरसङ्गतसमीक्षाविचारशक्तिमतामित्यर्थः ।

३५. अनवद्यं यत् अनुशासनं=व्यवस्था, तद्रूपाणां शब्द–लिङ्ग–काव्यछन्दःरूपविद्यानां ज्ञानानां यत् चतुष्कं तस्य यत् अनुशासनं–सम्यक्बोधस्तत्र अलंभविष्णु=समर्थं यत् अनुशासनचतुष्कं= शब्दानुशासन–लिङ्गानुशासन–काव्यानुशासन-छन्दोऽनुशासनरूपशास्त्रचतुष्कं तस्येति व्युत्पत्तिरर्थानुसारिणी विज्ञेया ।

३६. इतरथा नाम प्राङ्निर्दिष्टसमासादितरः=विस्तरस्तथाकरणे=विस्तरतः व्यावर्णने ।

३७. तस्य=जीवनचरित्रस्य ।

३८. तथा=विस्तरतः व्यावर्णनारूपेण ।

३९. स्थल–समय–सङ्कोचादिकारणत इति शेषः ।

४०. प्रस्तुतं=छन्दोऽनुशासनरूपं अपश्चिमं=अन्तिमं यदनुशासनं, तस्य मानेन सापेक्षत्वरूपेण अतिशयेनाऽतिरेकः=महत्त्वरूपो यस्य इति तात्पर्यगामी विग्रहः ।

एतद्धि विशेषणं अग्रे निर्दिष्ट**'तस्ये'**तिपदलक्ष्यजीवनचरित्रस्य विज्ञेयम् ।

एतस्य विशेषणस्य अयं भावः अनुमीयते यत् ।

एतद्धि छन्दोऽनुशासनं प्रणिनीषितानुशासनचतुष्टयेऽन्तिमं, अतः एतस्य हि मुद्रणावसरे ग्रन्थकर्तुः जीवनचरित्रं नाऽतिसंक्षेप–विस्तरेणाऽपि समुल्लिखनीयमिति ।

४१. जीवनचरित्रस्य ।

४२. तत्राऽपि=मध्यमरीत्या जीवनचरित्राऽऽलेखनेऽपि ।

४३. सुधा=अमृतं तस्य मधुरीकारः=मधुरीकरणं तस्य करणं=चेष्टेति भावः ।

४४. चतुराणां=विचारदक्षाणां यत् चक्रं तत्त्वसमीक्षा–गोष्ठयादिषु बोभूयमानं वृत्ताकारेण जायमान-पर्षदो रूपं, लक्षणया चक्राकारस्थितपर्षदि संमिलितविदुषामपि चक्रत्वेन व्यवहृतिमपेक्ष्य जाता-वेकवचनं च विवक्ष्याऽत्र तस्य चेतसि इति सङ्गन्तव्यम् ।

४५. ईदृक्=प्रस्तुतग्रन्थसदृशः गुम्फः रचनाप्रकारः विद्यते यस्य तदिति विग्रहः ।

४६. तत्तद्विशेषा=वेदादयस्तेषामुपयोगि इति विग्रहः ।

४७. प्रज्ञाया यदवदातत्वम्=नैर्मल्यं, तेनावज्ञातः पुरन्दरस्य=इन्द्रस्य गुरुः=बृहस्पतिर्यैरिति विग्रहः ।

४८. निस्सीमा चासौ प्रतिभा च, तस्याः यः प्राग्भारः तेन पराकृतम्=अभिभूतं पुरन्दरगुरु–सरस्वत्योः युगलं येन तस्य इति तात्पर्यगामी विग्रहः ।

४९. सर्वतन्त्रेषु=सर्वशास्त्रेषु स्वतन्त्रा साहाय्याऽपेक्षारहिता चाऽसौ धीषणा=बुद्धिस्तयाऽन्वितत्वम् इति भावः ।

५०. अत्र चतुर्थी "**क्रुद्द्रुहेर्ष्यासूयार्थानां**"मिति (२–२–) सूत्रेण व्याप्याऽर्थे ज्ञेया ।

५१. न लब्धं मध्यं=अवगाहो यस्याः, एतादृशो यः मतिरूपो ह्रदः, तस्मात् निर्व्यूढश्चासौ प्रवाहः, तत्कल्पानि इति व्युत्पत्तिः ।

५२. प्रतीतिविषयं नेया इत्यर्थः ।

५३. प्रतीता=प्रख्याता प्रतिभा येषां, तेषाम् ।

५४. अमेयानि च तानि गुणरत्नानि तेषां रत्नाकरायमानाः, तथा श्रीमद्भिः जिनवरैरुदितं यत् उदि-तोदितं=अतिशयेन उदयापन्नं शासनं=नियमनं यस्यैतादृशशासनस्य प्रभावकाः तैरिति भावः ।

५५. मन्तुरपराधः तस्य या क्षमा तस्याः मूलभूतानाम् ।

५६. आत्मनो ये गुणाः मौलिकशक्तिविशेषाः, तेषु लीनं मानसं येषां तेषां चरणपङ्कजयोः षट्पदरूपा इत्यर्थानुकारिणी व्युत्पत्तिर्ज्ञेयाऽत्र ।

५७. सकलाश्च ते प्रमाणपथि अवतीर्णाश्च छन्दसामनुशासने प्रवणाः, अपरे च ते ग्रन्थाश्च तेषां यत् नवनीतं=सारभागः तस्याल्पत्वमिति तात्पर्यगामी विग्रहोऽत्राऽवबोद्धव्यः ।

श्रीआगमोद्धारकाऽऽलेखित-प्रस्तावनासंग्रहस्वरूपे

# आनन्दरत्नाकरे

## नवमं रत्नं

### श्रीजल्पकल्पलता-प्रस्तावना

विदितपूर्वमेतद्विदुषां समेषा[1]मपेतद्वेषपुषां [2]हृद्गुहाऽऽहितधर्मधैर्यकेसरिकिशोरपोषाणां यत् वैक्रमीये त्रयोदशे शतके [3]निखिलखिलस्खलनाऽस्खलितबलप्राग्भारपुण्यसंभारभ्राजिष्णु-भूघनहतमारविकारसंचार- विधिवद्धिधूतराज्यादिसमस्तसारनिकराऽनादिकालीनकर्मततिनिहति-प्रभुप्रभावलब्ध- रमारामादिसङ्ग्व्यासक्तपारगतपुरुषोत्तमपशुपतिप्रभृतिलौकिकगणाऽर्च्यदेवसंदोहा वितर्क्य-परमयोगिवेद्य-केवलावलोकनलम्पट-केवलविच्छ्रीमज्जिनेन्द्रशासनानुसारिशासनश्रीप-त्यास्थाने भास्करायितं श्रीमद्भि[4]राशाम्बरपराभूतिसमर्पणप्रवणैर्यथार्थाभिधानैः श्रीदेव-सूरिभिः।

स्पष्टं चैतत्[5]स्पष्टितगुर्वावली-बोधजातस्वान्तपरिकर्मणां—

'श्रीदेवसूरिरपरश्च जगत्प्रसिद्धो,<br>
वादीश्वरोऽत'गुणचन्द्रमदोऽपि बाल्ये ॥१३॥<br>
येनार्दित[7]श्चतुरशीतिसुवादिवेला-<br>
लब्धोल्लसज्जयरमामदकेलिशाली।<br>
वादावहे कुमुदचन्द्रदिगम्बरेन्द्रः,<br>
श्रीसिद्धभूमिपतिसंसदि पत्तनेऽस्मिन् ॥१४॥

—इत्यादि विलोककाना[8]मखिलविन्मतजोषकाणाम्।

समजायन्त च [9]श्रीसिद्धाधिपहृदरविन्दावासपद्मापरिवृढा वादाग्रगण्यलब्धिनिधानभूता लोके[10] समस्तसारेतरनिरीक्षणचणे वन्द्यतमचरणकमलाः श्रीमन्तो[11]ऽनेकवादविजयलब्ध-कीर्त्तिमुखरितदिक्चक्रवालवादिगजघटाविशरणनदीष्ण-शार्दूलशौर्यशरणशिष्यश्रेणिविस्फारित-यशोनिचयाः अनेके शिष्या [12]भुजिष्याः। प्रादुर्भूतश्च भाग्यै[13]र्वाःप्रवाहप्रोषितसद्बुद्धिकस्तूरि-परिमलानां "ब्राह्मणश्रमणं" इतिन्यायसत्यापनसादराणां [14]दिवसनाथालोकप्रसर इवो-लूकानां द्विजातीनां मत्सरोऽनूनो [15]विवेकेक्षणक्षोदकः।

हेतोरमुष्मादेव श्रीमतां [१६]परमपुण्यपाथेयपुष्टात्मश्रीमद्वर्णनीयपादानामागमनोत्सवेऽकाण्ड एवारब्धं [१७]विवादलास्यं [१८]वाराणसीवासवासितानिवर्त्तनीयासममोहनीयमलम्मुषितान्तःकरणनिलयज्योतिरालयाविवेकालयेन शंकरग्रामण्या, पर्यनुयुक्ताः परमगुरवः [१९]शैशव – यौवन – वार्धक्यरूपावस्थात्रितयविहिताऽनेकदुर्दमवादिवृन्दजागर्जद्गजघटाकुम्भकषणकण्ठीरवायमाणा वाद्युपाध्यलङ्कृताः [२०]स्वाभाविकसौभाग्यभङ्गीपरिवृतकरणाः [२१]प्रतिभाप्राग्भारपराभूतपीयूषपायिप्रणयार्चितचरणदेवाचार्याः श्रीमदाराध्यपादाः श्रीमद्देवाचार्याः कान्तासम्मिततया शब्दार्थप्राधान्यं प्रोज्झ्य [२२]केवलरसप्राधान्यावगाढानेकस्वरूपे काव्यविषयेऽर्थप्राधान्यमनुसृत्य [२३]साधनीयार्थसिद्धिसाधनसाधनसावधानायामान्वीक्षिक्यां चौष्ठगोष्ठीमिषेण।

तादृशे चावसरे[२४]ऽवसरवेदवेधसामन्तिषदामुपस्थानं नाऽसमञ्जसं प्रत्युतोभयपक्षनिष्पक्षपातप्रशंसाप्रबन्धास्पदम्, अन्तर्भाषणादि–प्रतिबन्धकापत्तिस्त्वा[२५]पाद्यमानास्थानधर्माख्यानकुशलवार्त्ता वृत्तान्तप्रख्येष्वन्तेवास्यधिकारबहिर्भूतेषु, श्रीमतां च [२६]चौलुक्यचन्द्रश्रीसिद्धराजमौलिमुकुटद्योतिचरणचरणरुहामनेके अभवन् श्रीमन्तो रत्नप्रभ–माणिक्यमुनि–महेन्द्रसिंहाद्याः [२७]गुरुप्रवरपरिचर्यापर्याप्त्याप्तपारमर्षादिप्रचुरतरराद्धान्तसिद्धान्तावादविजयाहवा[२८]हृतजयश्रियः[२९]सिद्धान्ततत्त्वनदीष्णताकनकनिकषपट्टा विदिता जगतीतले जंगज्जन्तुजातजीवितत्राणक्षमक्षमादिगुणगणाङ्गीभूताः, समापतितश्च मल्लप्रतिमल्लन्यायेन वादसमरो [३१]जगज्जनयितृविषयस्तत्र मुनिमाणिक्येन[३२]माणिक्यदृढतातिशायिना माणिक्येन महात्मना, एष एव महात्माऽपरेष्वप्येतादृशेषु शेषेषु प्रयोजनेषु दिनकर इव दिने स्वप्रभावं प्रादुरभावयदेव।

प्रभावकचरितेऽपि श्रीमद्देवसूरीयप्रबन्धे तत्प्रभावः परमो बोबुध्यत एव, यतस्तत्र कुमुदचन्द्रवादप्रकरणे

अथाह देवसूरीणां, माणिक्याख्यो विनेयराट् ॥

कः कण्ठीरवकण्ठकेसरसटाभारं स्पृशत्यङ्घ्रिणा,
कः कुन्तेन शितेन नेत्रकुहरे कण्डूयनं काङ्क्षति।
कः सन्नह्यति पन्नगेश्वरशिरोरत्नावतंसश्रिये,
यः श्वेताम्बरदर्शनस्य कुरुते वन्द्यस्य निन्दामिमाम् ॥९४॥

अथ चोवाच माणिक्यं, विज्ञप्तिं लिख मामिकाम्।
श्रीमत्पत्तनसङ्घाय, विनयातिशयस्पृशम् ॥१११॥'

एष एव च महात्मा महो हातुमशक्त इहापीति कुशलोदन्तानुयोगमाप्लुत्य भट्ट-भणितितति[३२]मनतिक्रम्याततवानास्थानं वादस्य [३३]जगत्कर्तृत्वसद्भावेतरद्रूपं ।

न चात्र [३४]नोद्यमें[३५]नोद्यधिषणाधिगतधर्माधारागमधारैर्यदुत न तावच्छङ्करोऽनुमन्यते जगत्कर्तृतां, यतोऽद्वैतवादरसिको हि सः, स्पष्टं चैतत्तदीयशरीरकमीमांसायां पदे पदे, यत-[३६]स्तदितिहासाऽनुशीलनशालिभिः[३७] प्रतिभाभारिभिर्भगवद्गीताभाष्यवाक्यव्रजम[३८]मरुकमहीपतिमहिषीसमाजिगमिषाविषयक– पद्मपादान्तेवासिव्यक्तवचनवीथिविनोदनानुग्रहरिप्र-भवानुकरणख्यानंचावष्टम्भयद्भिः कथमेकान्तो ब्रह्मकान्तिकः [३९]कान्तस्तेषामित्येकान्तयितुमे-कान्तःकरणीभवितुमाभाव्येत ।

[४०]नैवाथवाऽस्ति तस्य स्ववचननियन्त्रितस्यान्योऽध्वा, यतः प्राक् प्रकटितवान् यदुत [४१]सर्वाऽऽस्तिकवर्गवर्णितप्राप्तिकमनीयकैलासवासाऽसाधारणकारणकाशीविकाशाऽवकाशादा-गैर्ममत्रेति, तेन [४२]लब्धाऽपूर्वलाभक्षयकृतिक्रियाकारिताऽऽविष्कारादनन्तरं किमन्यद् देयं[४३]स्या-दनुत्तरमुत्तरमनुत्तममनीषिणा[४४]मिति तदेवोत्तरितवान् ।

भवतु वाऽसम्मतं, [४६]वेदानुसारिसमस्तसृष्टिस्पृगनुसरणायाश्रितं, परं तत्रोपन्यस्तो-[४७]ऽनेकसन्न्यस्तेतराश्रितो हेतुः कार्यत्वाख्यः कार्यसाधकतया, [४८]पिष्टश्चासौ [४९]तिल-पेषं पुष्टप्रतिभेन[५०]मुनिामणिक्येन श्रीमता माणिक्येन [५१]सावयवत्व–संस्थानवत्त्व–विकारित्व–कृतमितिप्रतिभोत्पादकत्वविकल्पशिलासूनुना [५२]तमसिद्धं विदधता, आविर्भावितमे-तद्[५३]वितेतेन श्रीमता ग्रन्थकृताऽऽद्येन [५४]गुणवाद्येन स्तबकेन ।

[५५]तत्राऽन्तराऽन्तरार्थे[५६]क्रिया–घटनापद्धतिप्रकटन–कूटस्थनित्यतानिराचरीकरणाऽऽ-काशीयकाष्ठाक्रमशावदि (दी) ति–नभोद्रव्यावस्थानिबन्धनव्यापकता–सहगत्वरत्व–सप्रदेशत्वा-ऽऽदि संपादितं [५७]लक्षणसमीक्षणविचक्षणेक्षणीयं स्वरूपवृन्दम्, [५८]विचारखण्डितं वाऽचेतनोपा-दानाऽभूतभाविप्रागसतः स्वकारणसत्तासमवायेत्यादिकं कार्यरूपं प्रकल्पितं तच्चिदुत्पाद-वियदुत्पादाऽपवर्गाऽवस्थाऽवस्थानादिना यथायथं मतिमन्मनश्चकोरचन्द्रायमाणप्रबन्धेन ।

द्वितीये तु [५९]तस्मिन्विस्मितिविधायि यद् [६०]गृहीत–मुक्ताक्षराऽसमस्तपदाऽष्टादशा-ऽक्षर–नियतानुप्रास–गुप्तश्लोक–श्लेषश्लिष्ट–करपल्लवी–वाक्यान्त–वर्णैक्य-कृग्धातुक-चेक्रीयि-तक्रिया–नामधातुगम्यास्तिकाद्यं न्यगादि [६१]निगदितमहिम्ना महानुभावेन [६२]ततमातत-काव्यकोविदताऽनुयोगाऽनुयुक्तये । आन्वीक्षिक्यां तु [६३]आद्यस्तबककर्तृहेतुविशेषविशेषकर्त्तनाय दूषणमुदघोषि [६४]घुष्टामरयशसा, तत्र[६५]विरुद्धत्वमवरुद्धत्वात्सशरीरत्वेन कर्त्तृतायाः [६६]स्वाभा-

विकोत्पादुकतसकलितमूर्त्तीनां तरुगुल्मतृणाऽऽदीना[६६] [६७]मकलितधीमद्धेतुकानामबाधमुद्बोध-[६८]बोधनादकान्ताऽकामविरक्तानामनैकान्तिकता ।

विकल्पितं च [६९]विरुद्धबुद्धिकृदबुद्धिककुबोधविततध्वान्ततमोऽरातिना [७०]मुनिपति-पादपद्मपरागपानपीनमधुपायिनाऽगोचरे[७१] गणेशजनयितुर्विद्यादिप्रभावानन्नु चतुर्द्धा, [७२]चरा-चरोद्भवचरीकृतिचर्यायामा[७३]यतमप्रेक्ष्य प्रयोजनवत्ता-कर्मेरिति-स्वभावताद्दश्याऽऽभिधमभिहितं भिदां त्रितयं त्रिपुरासुरपुरत्रितयमिव ।

तथाच न चेद् बाधा कार्यप्रत्यक्षेऽप्यप्रत्यक्षत्वे कः कतुः एवापरः कालात्ययापदिष्टः कालत्रयेऽपीत्यभिप्रायात्, अशरीरत्वेन नैवासौ विश्वविधाता विश्वीयेऽर्थनिचये ततः सत्प्रति-पक्षता, दर्शिता उपाधिभेदा अपि ।

स्तबके [७४]चाऽस्तोकयुक्तिस्तबके तृतीयस्मिन्नुदीराम्बभूवे महाप्रभावेण यत् स्रष्टुः सृष्टेरैक्यमितरद्वा, व्यापकत्वे तस्य वपुषाऽशुचिपदार्थपङ्क्तिपरीतता, ज्ञानरूपेण तु तथात्वे न विधायिता विश्वस्य, [७५]असावश्याऽविनाभूता यथार्थोदितिनोदनपटिष्ठता पशुपतेरिव [७६]द्रव्या-दिनवानवार्थतावादिनः, तमश्छाययोरप्यपराभवनीयच्छाययोरबाधबोधविषयत्वात् ।

पर्यन्ते प्रस्तष्टं स्पष्टितं च धर्माऽधर्माऽऽकाश–काल–पुद्गलाऽऽदीनां यथायथं रूपं [७७]संक्षेपेणातितमेनावगम्य [७८]चागमेशितृशयवासपवित्रपवित्राङ्कः यथार्थमवगमं सोऽब्रीभणद-र्भकभारत्यभिधया यतिवर्यम् ।

सर्वं [७९]चैतच्छ्रीमद्रत्नमण्डनसिद्धान्ततत्त्वरत्नमण्डितात्मान आविर्भावितवन्तः श्रीमन्तो रत्नमण्डनाः, श्रीमन्तश्च श्रीमद्रत्नशेखरसूरिवर्येषु भासमानेषु [८०]श्रीमज्जिनशासन-नभोभागभानुमालिषु [८१]श्रीमन्नन्दिरत्न–पादमकरन्द–मुग्धमनोमधुपाः ।

सूरिवराणां [८२]भूमण्डलभामिनीमण्डनकालश्च षोडशशतीयो वैक्रम इति श्रीहीर-सौभाग्य–सोमसौभाग्य–विजयप्रशस्तिप्रभृतिग्रन्थतत्यवलोकनतो निश्चेचीयते [८३]निर्ण-यचणैर्मनीषिभिरिति [८४]श्रीप्रभूणामपि स एवाऽनेहा, [८५]नचोपलब्धिसृतिमायाता इतरे श्रीमदीया ग्रन्थाः, भविष्यन्ति [८६]परं अष्टमपत्रऽवोचाम[८७]चेत्युपलब्धेरनुमितेः, परं स्युश्चेदवगता निपुणज्ञापनीयोऽहमिति प्रार्थये [८८]सुध्यनघकृपादृष्टिमभिलाषुकः * * * ॥

वीरात् २४३८ तम वर्षे भाद्रपद–पूर्णिमायां लिखितम् ॥

श्रीपूज्यपादाऽऽगमोद्धारकाचार्यश्री लिखितप्रस्तावना—

विषमपदार्थसूचिका

# आनन्दलहरी-टिप्पणी

## ( जल्पकल्पलता—प्रस्तावना )

१. पुषणं=पुष्, ( पुष् धातोः क्विबन्तरूपम् ।

द्वेषस्य पुष्=द्वेषपुष्, अपेतः द्वेषपुड् येषां तेषामिति विग्रहः, द्वेषपोषणरूपाऽनर्थप्रवृत्तिरहितानां मध्यस्थानामित्यर्थः ।

२. हृदयरूपिणी या गुहा तस्याम् आहितः=विहितः धर्मविषयकधैर्य ( आपत्तिकालेऽपि मनःस्थिरता )-रूपकेसरिकिशोरस्य पोषः (पोषणं पोष इति घञन्तरूपम् ) यैस्तैरिति व्युत्पत्तिरर्थानुगामिका विज्ञेयाऽत्र ।

३. (अ) निखिलानि च तानि खिलानि=विघ्नाः, तेषां याः स्खलनाः, ताभिरस्खलितं बलं यस्यैतादृश-प्राग्भार( श्रेष्ठ )पुण्यस्य संभारः=समूहः, तेन भ्राजिष्णुः, भूघनः=देहः येषां ते इति प्रथमोंऽशः ।

(आ) हतः=प्रस्खलितः मारस्य=कामस्य विकाराणां संचारः यैरिति द्वितीयोंऽशः ।

(इ) विधिवत्=औचित्यविनियोगपूर्वकं विधूतः=विशेषेण ज्ञानगर्भवैराग्यरूपेण धूतः=त्यक्तः समस्तश्चासौ साराणां=श्रेष्ठानां ( वस्तूनामिति शेषः ) निकरः=समूहः यैरिति तृतीयोंऽशः ।

(ई) अनादिकालीना या कर्मणां सन्ततिः=परम्परा, तस्याः निहतिः=मूलोच्छेदरूपेण निश्शेषेण विनाशः, तस्य प्रभुः=समर्थः, एतादृशः प्रभावः लब्धः यैरिति चतुर्थोंऽशः ।

(उ) रमा च रामा चेति रमारामे, ते आदौ येषां एतादृशसङ्गेषु=परिग्रहेषु वि=विशेषेण आसक्ताः=प्रबलमोहोदयजन्यगृद्धिवन्तः, एतादृशाः ये पारगत( बुद्ध )पुरुषोत्तम( विष्णु )-पशुपति( महादेव )प्रभृतिभिः लौकिकगणैः=स्थूलबुद्धिजनैः अर्च्यः यः देवसंदोहः, तेन वितर्कयितुमपि न शक्येत यस्य=जिनेशितुरनुपमाऽऽत्मवैभवसामर्थ्यम् एतादृशः इति पञ्चमोंऽशः ।

(ऊ) परमयोगिभिः-केवलज्ञानिभिः वेत्तुं शक्याः=ये अप्रतिमाद्भुताऽऽत्मसमृद्धिमन्त इति षष्ठोंऽशः ।

(ऋ) केवलं=समस्तं लोकालोकविषयं पदार्थजातं तस्य अवलोकने=समस्तपर्यायसहितविशिष्ट-ज्ञाने लम्पटा=साहजिकरीत्या प्रवणा केवलवित्=केवलज्ञानं येषां ते इति सप्तमोंऽशः ।

उपरिनिर्दिष्टविशेषणसप्तक–संसूच्यमान–विशिष्ट–गुणालङ्कृता ये श्रीमन्तो जिनेन्द्रास्तेषां शासनं=आज्ञानिर्देशरूपं तदनुसरति यत् तत् शासनं तद्रूपा, या श्रीः तस्याः पतिः=राजा, तस्य आस्थानं=राजसभा तस्मिन्, इति सद्गुरूपासनासमुपबृंहितनिर्मलधीगम्याऽर्थानुसन्धानलब्धजन्मा विग्रहः बृहत्कायसमस्तपदस्यैतस्य विज्ञेयः ।

४. आशाम्बरेभ्यः=दिगम्बरेभ्यः पराभूतेः=पराजयस्य समर्पणं तस्मिन् प्रवणैः=समर्थैरिति ।

५. स्पष्टिता=विशदतरं वर्णिता गुरूणां आवली=क्रमागतपरम्परा यत्रैतादृशा या **गुर्वावली**नाम्नी कृतिः, तस्याः बोधेन जातं स्वान्तसः=निजचेतसः परिकर्मणं=अज्ञानज्ञानरूपेणाऽवबोधेन येषां तेषामिति विग्रहः ।

६. पूज्याऽऽचार्य**श्रीदेवसूरिभिः** बाल्याऽवस्थायामप्रौढदशायामपि **गुणचन्द्रा**ऽऽख्य–दिगम्बरवादि–पराभवः कृत आसीत् एतदर्थसंसूचनमत्र विहितमस्ति ।

७. चतुरशीतयश्च ते सुवादिनः=प्रखरविद्वत्तादर्पशालिनः वादकुशलाः पंडिताः, तद्रूपा या वेला=समुद्र-जले वृद्धिः, तया लब्धः उल्लसन् चासौ जयः, तद्रूपा या रमा, तस्याः मदः, तस्य केलिना शालते योऽसौ इति विग्रहः ।

चतुरशीतिवादस्थले महत्तम–विद्वद्धुरंधरवादकलाकुशल–पण्डितानां पराभवेनोत्पन्न-मदप्राग्भा-रस्य **श्रीकुमुदचन्द्र**वादिनः निर्देशोऽत्र विज्ञेयः ।

८. अखिलं=समस्तं निरवशेषं विदन्ति ये ते सर्वज्ञा इत्यर्थः, तेषां मतं=शासनं, तस्य जोषकाणां=सेवकानां, सर्वज्ञशासनाऽनुयायिनामित्यर्थः ।

९. श्रीसिद्धाधिपः=**श्रीसिद्धराजजयसिंहः** तस्य हृद्रूपमरविंदम्, तत्रावासः यस्याः, एतादृशी पद्मा=शोभा, तया तस्यां वा परिवृढाः=श्रेष्ठाः इति विग्रहः ।

१०. समस्तं यत् सारेतरयोः=साराऽसारयोः निरीक्षणं तत्र निपुणः तस्मिन्, एतद्धि पदं **लोके** इत्यस्य विशेषणम् ।

११. अनेके च ते वादाश्च, तेषां विजयेन लब्धा या कीर्तिः, तया मुखरितं दिशां चक्रवालं यैः, एता-दृशा ये वादिगजानां घटाः=श्रेणयः, तासां विशरणे=विनाशे नदीष्णोः यः शार्दूलः=सिंहः, तस्य यत् शौर्यं, तस्य शरणभूता=आश्रयस्थानरूपा या शिष्यश्रेणिः, तया विस्फारितः=प्रसारितः यशसां निचयो येषामिति व्युत्पत्तिरर्थानुसारिणी विज्ञेया ।

१२. सेवकाऽपरपर्यायमिदं पदं लक्षणया विशिष्टसेवाभावाञ्चितचेतस्कविनेयोत्तंसगमकं विज्ञेयं ।

१३. कुत्सितं च तद्भाग्यं च इति अभाग्यं (नञोऽत्र कुत्सार्थपरकत्वात्), तद्रूपं यत् वाः=जलं तस्य प्रवाहेन प्रोषितः=दूरीभूतः सद्बुद्धिरूपाया कस्तुर्याः परिमलो येषां तेषामिति विग्रहः ।

एतद्धि मत्सराऽऽधीनानां द्विजन्मनामशुभाऽऽयफलककर्मपरवशानां साहजिक–वारिप्रवाहवत् सर्वव्यापिन्याः सद्बुद्धेः शून्यत्वस्य कृत्रिमत्वं ध्वन्यते ।

१४. दिवसनाथः=सूर्यः, तस्याऽऽलोकः=प्रकाशः, तस्य प्रसरे इति विग्रहः ।

१५. विवेकरूपं यत् (ईक्ष्यतेऽनेनेति) ईक्षणं=चक्षुः, तस्य क्षोदकः=नाशकः, इत्येतेन पदेन मत्सरस्य विवेकविरोधित्वं व्यज्यते ।

१६. परमं च तत् पुण्यं, तद्रूपं यत् पाथेयं, तेन पुष्टः आत्मा येषां, एतादृशानां श्रीमतां वर्णनीयपादानामिति व्युत्पत्तिरत्र विज्ञेया ।

१७. विवादस्य=चर्चात्मकवादस्य लास्यं=नृत्यं इति व्युत्पत्तिरत्र, किंतु अत्र **'लास्य'**पदेनैतदभिव्यज्यते यत् 'फलाधायकशक्तिविरहेऽपि वैदुष्याऽभिमानमूलकवावदूकतया विवादप्रवणताऽऽदृतेति ।'

१८. वाराणस्यां यो वासः तेन वासितः, अत एव अनिवर्तनीयश्चासौ असमः=विलक्षणो यो मोहनीयरूपमलः, तेन मुषितं अन्तःकरणे निलयः स्थानं यस्याः ज्योतेः=विवेकरूपप्रकाशस्य यत् आलयं, तथा चाऽविवेकस्याऽऽलयभूतः तेनेति विग्रहः तात्पर्यानुसारी बोध्यः ।

१९. शैशवं=बाल्यावस्था च, यौवनं=युवावस्था, वार्धक्यं=वृद्धावस्था च, एतद्रूपानामवस्थानां यत् त्रितयं, तत्र विहितं यदनेकेषां दुर्दमानां वादिनां वृन्दरूपाया जागर्जती=अतिशयेन विद्यामदेनोन्मादप्रयुक्तवचोवती गजघटा=करिश्रेणी, तस्याः कुम्भस्य=गण्डस्थलस्य कषणं=हिंसनं, तेन कण्ठीरवः=सिंहस्तद्वदाचरमाणा इति व्युत्पत्तिरत्राऽवबोध्या ।

२०. स्वाभाविकं च यत् सौभाग्यं तस्य या भङ्गी=विविधता, तया परिवृतानि=व्याप्तानि करणानि=इन्द्रियाणि येषां ते इति ।

२१. प्रतिभायाः यः प्राग्भारः, तेन पराभूताः, पीयूषं पिबन्ति ये ते (ताच्छील्येन)=देवाः, तैः प्रणयेन अर्चितौ चरणौ येषां, एतादृशाः देवाचार्या=बृहस्पतयः यैरितिविग्रहः ।

२२. केवलं=निरपेक्षं यत् रसस्य प्राधान्यं तेनाऽवगाढं=व्याप्तं अनेकस्वरूपं यस्यैतादृशे इति ।

२३. साधनीयाः ये अर्थास्तेषां या सिद्धिः, तस्य साधने=करणे साधनानि=हेतवः तत्र सावधाना=तत्परा या तस्यामिति व्युत्पत्तिः ।

२४. अवसरः=प्रस्तावः समुचितकार्यकरणस्येतिशेषः,तद्रूपो यो वेदः, तस्य वेधा=ब्रह्मा, तत्तुल्यानामिति ।

२५. आपाद्यमानं यत् आस्थाने=सभायां धर्माख्यानं तथा कुशलवार्ता=सुखशाता, तस्या यः वृत्तान्तः तत्प्रख्येषु=तत्कथकेषु इति तात्पर्यानुसारं विग्रहोऽवबोध्यः ।

२६. चौलुक्याः=चुलुकाभिजनवंशोद्भवा राजानः, तेषु चंद्रतुल्यो यः श्रीसिद्धराजः,तस्य मौलिः=मस्तकं, तत्रस्थमुकुटेन द्योतितं चरणरूपं चरणं=जलं तत्र रुह=कमलं येषां, तेषामिति विग्रहः ।

२७. गुरूणां ये प्रवरा=श्रेष्ठाः तेषां परिचर्याया=चरणोपासनाया पर्याप्तिः=साफल्यं, तेनावाऽऽप्ताः पारमर्षादयः ये प्रचुरतराः ये राद्धान्ताः=स्थिरतरमतविशेषास्तेषां सिद्धान्ताः यैरितिविग्रहः ।

२८. वादस्य यो विजयस्तद्रूपो य आहवः=युद्धं, तत्र आहूता जयश्रीः यैरिति व्युत्पत्तिः ।

२९. सिद्धान्तभूतं यत् तत्त्वं, तस्य नदीष्णता=कौशल्यं, तदेव कनकं, तस्य निकषपट्टरूपा ये ते इति

३०. जगति वर्तमाना ये जन्तवः, तेषां जातस्य जीवितस्य त्राणे क्षमाः ये क्षमादयो-गुणास्तेषां गणस्याऽङ्गीभूता ये ते इति ।

३१. जगतः=संसारस्य जनयिता=उत्पादकस्तद्विषय इति ।

३२. माणिक्यं=श्रेष्ठरत्नम्, तस्य या दृढता=अनिर्भेद्यता तमतिशेते योऽसौ तेनेति ।

३३. जगतः कर्तृत्वं तस्य सद्भावः=सत्ता, इतरत्-असद्भावस्तद्रूपमिति ।

३४. शङ्कनीयमित्यर्थः ।

३५. अनोद्या=अशंकनीया या धिषणा=बुद्धिस्तयाऽधिगताश्च ते धर्मस्याऽऽधारभूता ये आगमास्तान् धारयति ये ते तैरिति ।

३६. तस्य=शङ्कराख्यविदुषः इतिहासस्तस्यानुशीलनं तदादिभिरिति ।

३७. प्रतिभायाः भारः=समूहः विद्यते येषां तैरिति ।

३८. **अमरुक**नगरस्य यो महीपतिः=राजा, तस्य महिषी=पट्टराणी, तस्याः समाजिगमिषा=समागमेच्छा, तद्विषयकं, तथा **पद्मपादा**ऽऽख्यान्तेवासिना व्यक्ता=प्रकटीकृता या वचनानां वीथिः=पद्धतिः, तस्य या विनोदना, तया नुन्नं=प्रेरितं यत् हरिप्रभवस्यानुकरणख्यानमिति तात्पर्यानुसारी विग्रहो-ऽत्रावबोध्यः ।

३९. सुंदर इत्यर्थः ।

४०. अत्राऽन्वयसङ्गतिरेवमवबोध्या-"अथवा स्ववचननियंत्रितस्य तस्य अन्यः अध्वा न अस्ति" इति ।

४१. सर्वे च ते आस्तिकाः तेषां यो वर्गः, तेन वर्णितः प्राप्तिः यस्यैतादृशः, कमनीयश्चासौ **कैलासे** वासः तस्य यत् असाधारणकारणं**काश्यां** विनाशभूते योऽवकाशः=निवासः तस्मादिति ।

४२. अत्र आगमम्-आगमनमित्यर्थः ।

४३. लब्धो यः अपूर्वस्य-विशिष्टधर्म्यक्रियाद्वाराजन्यस्याऽदृष्टविशेषस्य लाभः, तस्य क्षयं करोति योऽसौ, एतादृश्याः क्रियायाः कारितो य आविष्कारः तस्मादिति ।

४४. न उत्तरः—श्रेष्ठः यस्मादिति अनुपमित्यर्थः ।

४५. न उत्तमा यस्मादन्येषां मनीषा, एतादृशी मनीषा विद्यते येषां तेषामिति ।

४६. वेदाननुसरते या समस्ता चासौ सृष्टिः, तां स्पृशंति ये ते तेषामनुसरणमिति ।

४७. अनेके च ते सन्न्यस्ताः=सत्प्रतिपक्षाः, इतरे च ये दोषा, तैराश्रित इति ।

४८. पिष्टः=चूर्णीकृतः ।

४९ तिला यथा पिष्यन्ते तथा ।

५०. पुष्टा=प्रबला प्रतिभा विद्यते यस्य तेनेति ।

५१. सावयवत्वम्, संस्थानवत्त्वम्, विकारित्वं, कृतं इतिरूपा ये प्रतिभाया–उत्पादकत्वं येषां ते विकल्पा एव शिलासूः=लघुः पिषणयाषाणः (लोढी) तेनेति ।

५२. तम्=कार्यत्वाख्यं हेतुम् ।

५३. विततेन=विस्तृतेन, इदं हि विशेषणं "**स्तबकेन**" इत्यस्य ज्ञेयम्

५४. गुणैः वदितुं योग्यो योऽसौ इति, गुणश्रेष्ठ इत्यर्थः ।

५५. तत्र=प्रथमे स्तबके ।

५६. अर्थः=प्रयोजनं, तस्य क्रिया, इतरदर्शन्यभिमतं वस्तुनो हि गमकलक्षणभूतमिदमर्थक्रियाकारित्वम् ।

५७. लक्षणानि=वस्तुनः गमकानि, तेषां समीक्षणे विचक्षणाः=निपुणाः, तैरीक्षणीयमिति ।

५८. यङ्लुबन्तपमिरूम् अतिशयेन खण्डितमित्यर्थः ।

५९. तस्मिन्=स्तबके इत्यर्थ ।

६०. '**गृहीत**'पदस्याऽग्रेतनाऽ'**क्षर**'पदेन सह सम्बन्धो विज्ञेयः ।
तेन **प्रहेलिका**भेदगत **गृहीता**क्षर ' भेदो 'ऽत्र बोध्यः

६१. निगदितः=विशेषेण वर्णितः महात्मभिः महिमा यस्य तेनेति ।

६२. ततम्=निबद्धम् आतता=विस्तृतीया काव्येषु कोविदता, तस्या अनुयुक्तये इति ।

६३. आद्ये स्तबके वर्णितो यः कर्तृरूपो हेतुविशेषः, तस्य विशेषतः कर्तनाय इति ।

६४. घुष्टं अमरैः यशः यस्य तेन ।

६५. विरुद्धत्वनामकहेत्वाभासदूषितत्वमित्यर्थः ।

६६. स्वाभाविकीया उत्पादुकता=उत्पत्तिशीलता, तया आसकलिता=व्याप्ता मूर्त्तिः=स्वरूपं येषामिति ।

६७. अकलितः अज्ञातः धीमद्भिः हेतुः उत्पत्तिकारणं येषामिति ।

६८. उद्बोधः=विशिष्टरूपेण बोधनं तस्मादिति ।

६९. विरुद्धाऽसौ बुद्धिश्च तां करोति योऽसौ, एतादृशो यः अबुद्धिकानां कुबोधः, स एव विततं=विस्तीर्णं यत् ध्वान्तं=अन्धकारः तस्य तमोऽरातिः सूर्यः तेनेति विग्रहः ।

७०. मुनिपतिः=तीर्थकृत्, तस्य यत् पादपद्मं, तस्य परागस्य पानेन पीनः=पुष्टः मधुपायी=भ्रमरस्तेनेति ।

७१. गणेशः=गणपतिः, तस्य जनयिता=पुराणाद्यानुसारेण महादेवः=शङ्करः, नामसाम्येनाऽत्रापि **शङ्कराख्य**वादिनः अगोचरे=बुद्धिक्षेत्रागोचरे इति तात्पर्यसङ्गतिरत्र दृश्यते ।

७२. चरं च तत् अचरं च, तस्य य उद्भवः तस्य या चरीकृतिः, अतिशयेन कृतिः तस्य चर्या तस्यमिति ।

७३. आर्यतमैः प्रेक्ष्यं प्रयोजनवत्ता–कर्मैरिति–स्वभावतादृश्य इत्येतदभिधम् इति ज्ञेयम् ।

७४. अस्तोकाः=बह्व्यश्च ताः युक्तयः, तासां स्तबकरूपे इति ।

७५. यथार्थोदितिः=सत्यनिरूपणा, तस्य नोदनायां पटिष्ठता=निपुणता इति ।

७६. द्रव्यादीनां नवानां अनवार्थतां वदंते ये ते इति ।

७७. अतिशयेन संक्षेपेण इत्यर्थे "**अतितमेण संक्षेपेणे**"तिप्रयोगोऽत्र ।

७८. आगमस्य ईशिता=रचयिता तीर्थकरः गणधरो वा, तस्य शयौ=पदौ, तत्र वासेन पवित्रीभूतं पवित्रमङ्गं तस्मिन्निति ।

७९. श्रीमद्–शोभायुक्तं यत् रत्नजटितभूषणं, तद्रूपा ये सिद्धान्ताः, तद्गतैः तत्त्वभूतैः रत्नैः मण्डित आत्मा येषामिति ।

८०. श्रीमज्जिनानां शासनरूपो यो नभोभागः, तत्र भानुमाली=सूर्यः तद्रूपेषु इति ।

८१. श्रीमतां **नन्दिरत्नानां** पादयोः मकरन्दे मुग्धमनः मधुपवत् ये ते इति ।

८२. भूमण्डलमेव भामिनी तस्याः मण्डनं तस्य काल इति ।

८३. निर्णयकुशलैरिति ।

८४. श्रियाः प्रभवः तेषामिति ।

८५. उपलब्धिः=ज्ञानं तस्या, सृतिः–पंथः तामिति ।

८६. **परमि**त्यस्याऽत्र "**परन्तु**" इति अर्थः ।

८७. "**च**" इति पदेनान्यग्रन्थानामुपलब्धेरनुमितिर्जायते ।

८८. सुधीनां अनघा या कृपा, तस्याः वृष्टिः तामिति ।

श्री आगमोद्धारकाऽऽलेखित-प्रस्तावनासंग्रहरूपे

# श्रीआनन्दरत्नाकरे

## दशमं रत्नं

### श्रीयोगदृष्टि० उपोद्घातः

## योगदृष्ट्युपोद्घातः

॥ श्रीगणधरेन्द्राय बोभवतु नतितयः ॥

अवधारयन्तु [१]अनवधृतधिषणाऽधिगमाधरीकृत-धिषणाधिषणास्तत्रभवन्तः शुभवन्तः सैदम्पर्यं प्रकरणमेदुपदीक्रियमाण [२]ममानमानोन्मानवितरणचणमुद्दिश्या [३]ऽक्षताद्यन्तेक्षणीयं यदुत प्रणेतारोऽस्य [४] स्याद्वादज्योतिप्रभाप्रचयाऽवाप्ताऽबाधबोध्यपदार्थप्रकर—प्रतिहतानादिकालीन-शुभेतरवासनाभिव्यञ्जकपशुवधतगम्यगमाद्यनार्यकार्यकारणबद्धकक्ष —जैमिनीयाऽबाध्यप्रत्यक्षाऽऽदिप्रमाणप्रचयप्रमितिप्रमेयसमुदयापह्नवप्रचुरकाप्रेक्षाप्रसरश्रीव्यासादिमतगाः श्रीश्वेताम्बर-गणाऽग्रणीपदप्रतिष्ठिताः श्रीमन्तो हरिभद्रसूरयः ।

प्रादुर्भविष्यत्येव पर्यनुयोजकानां [५]परमपदप्रदानपट्वबाधबोधप्रेप्सूनाम [६]खिन्नाऽखिल-बोधधुराधौरेयमान्या प्रश्नततिरस्मिन्, यदुत कदा किमर्थं चाऽऽविर्भावो बोभूयाश्चक्रेऽस्य ग्रन्थचक्रे ? ।

तत्र प्रथमे तावत् पर्यनुयोगे —

"पंचसए पणसीए, विक्कमकालाओ झत्ति—अत्थमिओ ।
हरिभद्दसूरिसूरो, धम्मरओ देउ मुक्खसुहं" ॥५३॥

इतिविचारसारसारोदाहारात् स्पष्टं स्पष्टीभवति [७]स्पष्टतमयथार्थेतिहास—ग्रन्थाऽभ्यासानां (यत्) "वैक्रमीये शतके षष्ठे सूरीणामज्ञानध्वान्ततति तिरस्करणतरणीनां भूमण्डलभामिनीतिलकायिता सत्ता ।"

ये चाऽनवबुद्धसिद्धान्ततत्त्वाः संगिरन्ते यदु "न स्यात्तावन्मात्रेऽन्तराले सति व्यवस्थिताऽऽगमव्यावर्णनं विस्तृततरं, सिद्धान्त—पुस्तकाऽऽरोहकालोऽपि यतः स एवेति भाव्यमनेहसाऽर्वाचीनेनेति" (ए) तदयुक्ततमता प्रतिभापथमापतिष्यति तदीयां चतुश्चत्वारिंशदधिकग्रन्थ-

चतुर्दशशतीमवाप्तबौधैर्वार्धक्येऽपि विनिर्मितां प्रायश्चित्तरूपतया स्वीकृतां [८]कृतधीविषयविषयां विलोककानां विवेचकानां, व्यक्तविबुधव्यक्तीनां सामर्थ्यप्रतिभानं तत्र, तथा च नोक्ताऽऽशङ्का-कणिकापि।

अन्यच्च पुस्तकव्यवस्थाया व्यवस्थया विद्वद्भिः संभूय भूयो भव्यभव्याऽवबोधनिबन्धनबन्धुरतोद्बोधनेन प्रतिष्ठितत्वात् न तत्कालो लोकोक्तिप्रसारवत् नवीनकृतिख्यातिबद्धाऽत्र त्राणकारी तेषां यथायथं। [१०]तत्त्वाऽर्थसाधक–तत्वार्थवृत्तिकृत्सिद्धसेनगणीनां वचनततिमुपजीविनः श्रीमन्तः साधु साधितसाध्या इति तदर्वाक्तमाः स्पष्टतममित्यपि न [११]विचार-चणचर्वणीयं, यतः "तथा चाऽऽह महामतिः" इत्यादिवाक्यवृन्देन वर्णितो महामतिः सिद्धसेनदिवाकरो यथार्थाभिधानः [१२]कुविकल्पविश्वच्छायाच्छेदनच्छेक–शतसहस्रग्रन्थग्रथनाऽबोधतमस्तत्यवष्टब्धान्तःकरणविकासकरणकोविदतमत्वाद्, यतो दरीदृश्यन्त एव पूज्यपाद-वर्णितानां "प्रसिद्धानां प्रमाणानां" इत्यादीनां वचनवृन्दानां श्रीमद्दिवाकरपादप्रणीतेष्वेव न्यायाऽवताराऽऽदिषु मूलत आविर्भावः। श्रीमत्सिद्धसेनगणयस्तु द्वितीयाऽध्यायवृत्तौ संज्ञां व्याख्यायन्तो व्याख्यामुपवर्णितवन्तः श्रीनन्दीसूत्रीयां हारिभद्रीं, तथाच द्वयेषां [१३]श्रीमद्दिवाकर–गणिपदोपाधीनां सूरीणां पार्थक्यविलोकनेन स्पष्टं प्रतिभास्यति श्रीमतां तत्कालीनत्वं।

यच्च श्रीमत्सिद्धर्षिसमकालीनतामाकलय्य स्वान्तेन [१४]ध्वस्तज्ञानधाम्ना प्रतिपाद्यते तेषामर्वाचीनता "आचार्यहरिभद्रो मे, धर्मबोधकरो गुरुः" इति [१५]भवप्रपञ्चप्रपञ्चनपटूपमितभवप्रपञ्चां कथामालम्ब्यमानेन, तदपि पूर्वाऽपरविचारशून्यमेव, यतो वक्ति महात्माऽसौ स्वयं "अनागतं परिज्ञाय" इति, तथा च नैते समकालीना द्वये।

न च चर्च्यमेतत् यदुत गुरु–शिष्याऽऽदिव्यवहारो नाऽसमकालीन इति, यतो व्यवहार-विशेषाणां विशेषतया व्यवहारात्, न वाऽत्र व्यवहारव्याहृतिरस्ति, किन्तु ख्यातात्मन उपकारित्वमदृश्येनापि विहितं महात्मना, न च विवादः स्वयंख्यातरि लब्धख्यातौ ख्यातरि।

तथा चोपमितिभवप्रपञ्चीयः प्रथमः प्रस्तावः।

"ये च मम सदुपदेशदायिनो भगवन्तः सूरयस्ते विशिष्टज्ञाना एव, यतः कालव्यवहितैरनागतमेव तैर्ज्ञातः समस्तोऽपि मदीयवृत्तान्तः, स्वसंवेदनसंसिद्धमेतदस्माकमिति।"

"देशकालव्यवहितानामपि जन्तूनां छद्मस्थाऽवस्थायामपि वर्त्तमानाः।"

तथाच निर्विवादं विद्वद्वृन्दवेद्यं निर्णयमेनमातिष्ठामहे—

"यत् नैते पूज्यपादाः श्रीमतः सिद्धसेनगणेरर्वाचीनाः, सिद्धर्षेः समकालीनाश्च, किन्तु प्राचीनाः [१६]पूर्वोक्तग्रन्थसम्मतशरद्वृत्तवार्त्तशरीरवृत्तयः ।"

अत एव च [१७]"कतिपयप्रवचनाऽर्थतारतारकविशेषानुपदिदर्शयिषुः" इति श्रीमदभयदेवप्रभूक्तं पञ्चाशकीयं वाक्यं क्राम्यति मतिमतां मनसि, [१८]नेदीयस्त्वात्पूर्वविच्छेदस्य केषाञ्चित्तदर्थानां तैरवधारणाद्धेतोः ।

अपि चात एवोदीरितं "पटुतमबोधलोचनतया" इति ।

तथा च [१९]प्रभुप्रभविष्णुवदनमलयनिसृतानां प्रकरणसुगन्धीनां कुतः प्रादुर्भावो ? वरीवर्त्तमानवीतरागागमाम्बरे [२१]तथाविधवचनव्रजाऽनवलोकनादिति कल्पितं कूटकल्पनाकल्पनकोविदैः कुट्टितं निष्टङ्कनीयं ।

प्रयोजनं सामान्यतो विदितं [२३]लोकरूढितत्प्रभावलब्धप्रभवग्रन्थविशेष"सिद्धान्तसारा"ऽऽदिविलोकनतः प्रायश्चित्तस्य प्रतिपत्तिः [२४]पञ्चेन्द्रियप्रचयपरासुकरणकल्पनाकर्त्तननदीष्णुः, तथापि व्यक्तं "आत्मानुस्मरणाय च" (२०५) 'अतः परोपकारोऽपि' (२०६) इति समालोकनात् लोकक्कानामात्माऽन्योपकार इति प्रतिभापथमागमिष्यति ।

अभिधेयनिर्णये तु यद्यप्यन्यैः "योगश्चित्तवृत्तिनिरोधः" (पा० १-२) इति लक्षितं, तथापि शून्यतायां मूर्छिताद्यनेकावस्थायामपि तथाभावादन्यथापि च "तदा द्रष्टुः स्वरूपेऽवस्थानं" (पा० १३) इति फलानुकूल्याभावाल्लक्षणं लक्षितं लक्षणैकचक्षुष्कैः प्रभुभिर्भवसारं "मोक्षयोजनभावेन" (११) इति वाक्येन तादृग्मोक्षानुकूलचेष्टामात्रस्य योगलक्षणलक्ष्यत्वं, तथाच को भेदो भवतां गुप्तेर्योगस्येति निरस्ततरां ।

एषैव चेच्छा-[२५]शास्त्र-सामर्थ्यपर्यन्तानुधावनधौरेयी धारणाऽन्यथा सामर्थ्यस्य व्याघातादित्यलं प्रसक्तानुप्रसक्तेन ।

अत्राऽभिधेयस्य योगस्य बालबोधानुसारी विभागश्चिकीर्षित इति प्रथमं "मित्रा तारा बला दीप्रा स्थिरा प्रभा परा" इति नामत उद्दिश्य दृष्टयोऽष्टौ, तत्स्वरूपं, तत्रत्यो बोधः, खेदाऽऽदिदोषाऽपनोदोऽद्वेषाऽऽदिगुणप्राप्तिश्च यथायथं निष्टङ्किता ।

[२६]विपश्चिद्विज्ञानवेद्यं चाऽत्र सञ्चारितं चारित्रचङ्गिमाऽऽधारैः योगबीजानि, शिष्टानुसारिता, अवञ्चकयोगत्रयं, अवेद्यसंवेद्यपदं, भवाभिनन्दिलक्षणानि, कुतर्कनैरर्थक्यं, शास्त्रप्राधान्यं, सर्वज्ञमताऽभेदः, [२७]प्राणिवैचित्र्यनिबन्धनदेशनावैचित्र्यमित्याद्या चतुर्थी

दृष्टेः, आक्षेपकज्ञानं, भवव्याधिक्षयः, नित्यानित्यैकान्तनिरासः, गोत्र-कुल-प्रवृत्तचक्रयोगस्वरूपं, इच्छा-प्रवृत्ति-स्थिर-सिद्धियमस्वरूपं, इत्यादि चाऽऽसमाप्तेः।

संपादितं चैवं श्रीमद्भिर्मोक्षमभिलाषुकानां गुणस्थानवृन्दमिव विचारणीयतमं योगाऽङ्गाऽऽदिकामनावतां दृष्ट्यष्टकं क्रमभावि।

तथाचाऽस्य [२८]वितैवाऽऽवश्यकी मुद्रणेति आरब्धमेतन्मुद्रापयितुं [२६]इटाल्याह्वविषयनिवासिना विद्वद्वर्येण सुएलीत्याह्वानेन, चित्रतरं चैतदेव यदुत न यत्र तादृशो भाषाध्यापकाः, [१०]तद्भाषाप्रचुरपुस्तकप्राप्तिस्तत्परिचयश्च, धर्मश्चान्य एव बाह्यदृष्ट्या, तथापि प्रस्तुतप्रकरणे तेन परिश्रमः प्रारब्धः, समाप्तश्च निर्वेतनः। मुद्रणं तु [११]गौर्जरीयसुरतपत्तनाऽभिजनश्रेष्ठिदेवचन्द्रलालभ्रातृनियुक्त-पुस्तकोद्धारमात्रोपयोगिलक्षद्रम्मव्यवस्थापत्रनियमित-कुसीदव्ययव्यवस्थाकारकश्रेष्ठि-नगीनभ्रातृभिरनुष्ठितं।

प्रान्ते प्रार्थये विगतप्रार्थनाऽर्थान् सज्जनान् मान्यतमान् इदं यदुत ग्रन्थकर्ता शोधकस्य मुद्रापकस्य च चरितं चित्ते निचीय सफलीकार्या कृतिस्तेषां यथावदाद्यन्ताऽवलोकनेन तदुक्ताऽनुशीलनेन च यथाशक्तीति [१२]सज्जनमनोऽनुसारिसरलसरण्यनुगन्ताऽऽनन्दोदन्वान्।

स्तम्भपार्श्वप्रभोः पादै-र्भव्येच्छाकल्पशाखिभिः।
समृद्धे स्तम्भतीर्थेऽयमुपोद्घात उपस्कृतः ॥१॥
[८]वसु-[६]रस-नन्द[९]-निशेश[१]प्रमिते भाद्रेऽसितत्रयोदश्याम्।
आनन्देनानन्दे, यथार्थवार्त्तः समो श्लेषः ॥२॥

## मोहनीयकर्मप्रबलता

"××× मोहस्य तिमिरेणोपमा सा दर्शनमोहनीयस्य यथार्थ-तत्त्वबोध-श्रद्धानप्रतिपन्थकत्वमाश्रित्योक्तेति ज्ञेयं।

बुद्धो हि केवलिप्रज्ञप्तो धर्मोऽवश्यं मोहतिमिरं विनाशयति, अनन्तशोऽप्यात्तानि चारित्रानि मोक्षफलप्राप्तिं प्रत्यफलान्येव ज्ञातानि।

भगवतः केवलिनो धर्मस्य बोधरूपस्य लब्धिस्तु न जातु कस्यापि मोघीभवति, यतो यः कोऽप्यसुमान् लभते भगवतः केवलिनो धर्मस्य बोधिं, स नियमादन्तरपार्धपुद्गलावर्त्तादनावृत्तिपदं लभेतैव, ततो यथार्थमुक्तं भगवता केवलिना प्रज्ञप्तधर्ममधिकृत्य 'मोहतिमिरंसुमाली'त्ति।

—पू० आगमो० आचार्यप्रणीता श्री पंचसूत्र सं० टीका

श्रीपूज्यपादागमोद्धारकाऽऽचार्यश्रीलिखितप्रस्तावना-
विषमपदार्थसूचिका

# आनन्दलहरी-टिप्पणी

( श्रीयोगदृष्ट० उपोद्घातः )

१. अनवधृतः=स्थिरीभूतो यः धिषणायाः=बुद्धेरधिगमः=प्राप्तिः, तया अधरीकृता धिषणस्य=बृहस्पतेः धिषणा=बुद्धिः यैरिति व्युत्पत्तिरत्र शब्दानुप्रासमिश्रितार्थगभीरस्यैतस्य पदस्य ज्ञेया ।

२. अमानं=मानरहितं यत् मानं=ज्ञानं, तस्य उन्मानं=प्रमाणातीतं यत् वितरणं=दानं, तत्र चणं=निपुणमिति तात्पर्यगामी विग्रहोऽत्र बोध्यः ।

३. अक्षतं=अखंडं यथा स्यात्तथा, आदिश्चान्तश्चेति आदितः अंतं यावत् ईक्षणीयं=अवलोकनयोग्यमिति विग्रहः ।

४. स्याद्वादः=सापेक्षवादः तद्रूपो यो ज्योतिष्पतिः=सूर्यः, तस्य प्रभायाः प्रचयः=समूहः, तेनाऽवाप्तः अबाधं=बाधारहितं यथा स्यात्तथा बोध्यानां पदार्थानां प्रकरः यैरिति एकोंऽशः ।

प्रतिहताश्च ते अनादिकालीना या शुभेतरा=अशुभा चासौ वासना, तस्या अभिव्यञ्जकानि यानि पशूनां वधः, अगम्यानां गम इत्यादीनि च तानि अनार्याणि कार्याणि तेषां कारणे=कारापणे बद्धकक्षाः ये जैमिनीयाः=जैमिनीमतानुसारिणः, तथा अबाध्यानि=बाधितुमशक्यानि यानि प्रत्यक्षाऽऽदीनि प्रमाणानि तेषां प्रचयः=समूहः, तेन जायमाना या प्रमितिः ज्ञानं तेन प्रचेयाः (धातूनामनेकार्थत्वात् 'चि' धातोरत्र ज्ञानपरकत्वं विवक्ष्य) प्रकर्षेण ज्ञेयाः ये प्रमेयाः=सद्भूतपदार्थाः, तेषां समुदयस्यापन्हवे=अपलापे प्रचुरः प्रेक्षायाः प्रसरो येषां ते श्रीव्यासादयश्च, तेषां गणाः=समूहाः यैरिति तात्पर्यानुगामी अर्थानुसन्धानबललब्धजन्मा विग्रहोऽवबोध्यः ।

५. परमं च तत् पदं च, तस्य प्रदाने पटुः=क्षमः योऽबाधः=बाधारहितो यो बोधः, तस्य प्रेप्सवः=प्रकर्षेणाप्तुमिच्छवः तेषामिति ।

६. न विद्यते खिलः=विघ्नाऽवरोधः यत्रैतादृशश्चासौ योऽखिलः=समस्तः बोधः=ज्ञानं, तद्रूपा या धुरा तत्र धौरेयाः=धुरावहनसमर्थवृषभतुल्याः, तैः मान्येति विग्रहः ।

७. स्पष्टतमश्चासौ यथार्थश्च इतिहासग्रन्थानां=पूर्ववृत्तघटनासंकलनरूपग्रन्थानां अभ्यासो येषामिति व्युत्पत्तिरत्र ज्ञेया।

८. कृता=पदार्थनिर्णये समर्था या धीः, तस्या यो विषयः अवगाहक्षेत्रं, स विषयो यस्याः तामिति विग्रहः।

९. भव्यश्चासौ भव्यानां=तत्त्वज्ञानयोग्यानां योऽवबोधः, तत्र निबंधनरूपा या बन्धुरता=मनोहरता तस्या उद्बोधनेनेति।

१०. तत्त्वभूता=यथार्थज्ञानयोग्या ये अर्थाः=जीवादिपदार्थाः, तेषां साधकं विषयस्वरूपनिष्टङ्कनेन यत् तत्त्वार्थाख्यं सूत्रं प्रकरणं वा, तस्या वृत्तिमकुर्वन् ये ते सिद्धसेनाख्यगणयः तेषामिति व्युत्पत्तिरत्र ज्ञेया।

११. विचारे चणाः=निपुणाः तैः चर्वणीयं=ग्रहणयोग्यमिति भावानुसारी विग्रहः।

१२. कुविकल्पानां विश्वा=समस्ता या च्छाया तस्याः, छेदने छेकाः=निपुणाः समर्था वा ये शत-सहस्र-परिमिता ये ग्रन्थाः, तेषां या ग्रथना=रचना, तस्या अबोधरूपं यत् तमः, तस्याः ततिः= परम्परा, तयाऽवष्टब्धं=व्याप्तं यदन्तःकरणं, तस्याः विकासकरणे कोविदतमत्वाद् इति विग्रहः तात्पर्य-गामकशैल्या सङ्गमनीयः।

१३. श्रीमद्दिवाकराख्यं च गणिसंज्ञं च यत् पदं=गुणपूजास्थानं, ते उपाधी=प्रशस्यविशेषणरूपे येषां तेषामिति विग्रहः।

१४. ध्वस्तं ज्ञानरूपं धाम=तेजः यस्मात् इति।

१५. भवस्य=संसारस्य यः प्रपञ्चः, तस्य प्रपञ्चनं=विस्तारेण कथनं, तत्र पटुः=समर्था या उपमितिभव-प्रपञ्चा, तामिति।

१६. पूर्वोक्ता ये ग्रन्थाः तेषां संमता या शरद्=वर्षं तत्र वृत्तं=जातं वार्त्तशरीरं=वार्ताकथारूपं यत् शरीरं, तत्र वृत्तिः येषामिति विग्रहः।

१७. कतिपये च ते प्रवचनानामर्थरूपा ये ताराः=तेजस्विनो ये तारकविशेषाः तान् इति।

१८. समीपकालवर्त्तित्वादिति भावः।

१९. प्रभोः=पूज्यस्य प्रभविष्णु=विशिष्टशक्तेरुत्पत्तिस्थानभूतं यद् वदनं=मुखं तद्रूपान् मलयात्= सुगंधिचन्दनवृक्षमूलभूमिरूपपर्वतविशेषात् निःसृतानामिति।

२०. वरीवर्तमाना=अतिशयेन भव्यजीवानामुपकारकरणशीलत्वेन वर्तमाना ये वीतरागप्रभुप्रणीता ये आगमाः तद्रूपे अम्बरे=आकाशे इति।

२१. तथाविधानां=पूर्वधरकालसमीपवर्त्तित्वानुमापकानां वचनव्रजानामनवलोकनात् इति ।

२२. कूटा=असत्या या कल्पना, तस्याः यत् कल्पनं, तत्र कोविदैः इति ।

२३. लोकरूढेः=बहुजनप्रसिद्धकिंवदन्तीरूपायाः, तथा तेषां प्रभावेन लब्धः प्रभवः=उत्पत्तिः यस्यैतादृशग्रन्थविशेषरूपाणां सिद्धान्तसारादीनां विलोकनतः, इति हेतुद्वयमत्र प्रयोजनरूपेणोपन्यस्तं पूज्यागमोद्धारकाचार्यमतल्लज–ध्यानस्थस्वर्गतागमावतारसूरिपुरंदरैरत्र ।

२४. पञ्चेन्द्रियाणां=इन्द्रियपञ्चकधारिणां प्राणिनां यः प्रचयः=समूहः चतुश्चत्वारिंशदधिकचतुर्दशशतसङ्ख्यबौद्धविद्वद्गणरूपः, तस्य परासुकरणं=मारणं, तस्याः या कल्पना, तस्याः कर्त्तने=दूरीकरणे नदीष्णुः=समर्था इति व्युत्पत्तिः ।
एतद्धि पदं प्रायश्चित्तस्य प्रतिपत्तिः इत्यस्य विशेषणम् ।

२५. इच्छा–शास्त्र–सामर्थ्यानां यः पर्यन्तः तस्य अनुधावने धौरेय ( वृषभ ) तुल्या या इति विग्रहः । इच्छायोग–शास्त्रयोग–सामर्थ्ययोगेतियोगभेदत्रयसूचनमत्र विहितं सुसूक्ष्मागमतत्त्वपटिष्ठव्याख्याप्रवणैरागमोद्धारकबहुश्रुतैः ।

२६. विपश्चितां=तत्त्वबोधसमर्थानां यत् विज्ञानं=विशिष्टं=तत्त्वनिर्णयक्षमं ज्ञानं, तेन वेद्यम् इति ।

२७. प्राणिनां यत् वैचित्र्यं मोहावरणक्षयोपशमहेतुकं, तन्निबंधनं यत् देशनायाः वैचित्र्यमिति व्युत्पत्तिरर्थानुसारिणी ज्ञेयाऽत्र ।

२८. स्पष्टैवेति भावः ।

२९. इटालीसंज्ञदेशनिवासिना इति ।

३० तद्भाषाया=संस्कृतभाषायाः प्रचुराणि च तानि पुस्तकानि, तेषां प्राप्तिरिति विग्रहः ।

३१. गौर्जरीयं च=गूर्जरदेशसंनिविष्टं यत् सुरताख्यं पत्तनं, तत्रत्यश्चासौ अभिजनः=कुलीनः यः श्रेष्ठिवर्यदेवचन्द्रलालभ्राता, तेन नियुक्तं पुस्तकानामुद्धारमात्रे उपयोगि यत् लक्षद्रम्माणां व्यवस्थापत्रं, तत्र नियमितं=व्यवस्थापितं यत् कुसीदस्य=व्याजस्य व्ययः, तस्य व्यवस्थायाः कारकैः श्रेष्ठि नगीनभ्रातृभिरिति तात्पर्यसङ्क्रामिकया शैल्या अन्वय–विग्रहौ चावबोध्यौ ।

३२. सज्जनानां=तत्त्वरुचिमतां तत्त्वपथगामुकानां वा यत् मनः, तदनुसारिणी या सरलसरणिः=सरलपन्थाः जिनाज्ञानुसारं जीवनशक्तिव्यवस्थात्मकः, तस्या अनुगन्ता=अनुगमनशील इति व्युत्पत्तिः ।

श्री आगमोद्धारकाऽऽलेखित-प्रस्तावनासंग्रहरूपे

# ॥ कर्मग्रन्थोपोद्घातः ॥

## एकादशमं रत्नं

**विजयते विजिताऽऽन्तराऽरातिवर्गो महापुरुषवर्गः**

आकलनीयमिदकं [१]कलावत्कलापाऽऽकलनीया-ऽकल्प्याऽकलङ्किताऽविकलकलनकला-
परिकलिता-ऽऽकल्पाऽविकलितकीर्तिकन्दकमनाऽनेकान्तप्रकटनकोविदकल्पान्तकालाविशकलि-
ताऽऽकारकलिकृताऽनेकाऽकान्तैकान्तर्क्षकान्तिकर्तनविकर्तन-श्रीमदकलंककलाकल्पिताऽकलनी-
याऽर्थकदंबककल्पकल्पाऽऽकर्णनकान्ततमसंस्कारकलितैः कोविदकुलोत्तंसकैः, यदुत समेऽप्यास्ति-
का विहाय [२]विविधविधानधुरन्धराऽक्षुण्णप्रत्यक्षप्रभृतिप्रमाणप्रथाप्रतीताऽर्थसमूहाऽपोहाऽऽहा-
र्यौहान् वेदान्तिन [३]उत्तरमीमांसामांसलमीमांसावतारव्यापकचणान् [४]जगद्वैचित्र्याऽन्यथानुप-
पत्त्येकलक्षणाद्धेतोर्भवान्तरानुयायिन आत्मनः शुभाऽशुभसाधनक्षममदृष्टमनु[५]पचरितमुररी-
कृतवन्तः ।

न चाऽतिरिच्य [६]भूतिभूषितविग्रहपरिचर्यापरायणान् केनचिदपि यत्किञ्चिद्वेदिना
मताऽन्तराऽऽविष्टाऽन्तरात्मना [७]तस्य स्वयं फलप्रदानपाटवतायामङ्गीचेक्रीयते विवादः
सौगता-ऽनीश्वर सांख्य-जैमिनीय-वेदान्तिनामन्यतमेन ।

यवनास्तु [८]विवेकमतिवारिधरपवना नैवाऽत्राऽर्हन्ति विवादाऽऽस्थानतां । युक्तं च
तस्या (?) अल्लोपनिषद्विरचनमिवोन्मूल्य [९]यथार्थाऽर्थदर्शकपथप्रवणं पारमर्षं [१०]भूभृद्वि-
रचनाऽङ्गीकरणप्रवणता ( प्रवणानां ) वितण्डाऽऽदीनाम [११]पक्रणितसन्मार्गाणां तत्त्वतोद्गिरणे
विचक्षणानां [१२]तद्विषया स्वीकृतिः, [१३]कल्पितकायपरिकरितताऽन्याऽदृष्टपरिभोग इत्याद्याश्च
के नाऽऽरोपिता अनारोपणीयाः कस्यांचिदपि व्यक्त्यां [१३]दोषास्तन्मूलाः । अंगीचक्राणा
अपि [१४]भूत्यंबरं भू-भूधरोद्भूतिनिबन्धनतया स्वः-श्वभ्राऽऽदिभ्रमणप्रेरकतया च [१५]नाऽशेष-
शेषशास्त्रसंमतं [१६]निशिततरयुक्त्यसिविशसितोच्छिष्टशिष्टाऽशस्ययुक्तिप्रयुक्तिव्रततीव्रातत्त्वेना-

दृष्टमत-[१७]मतितांसिषुर्निर्मूलं । तन्न [१८]तत्र साधीयान् साधनीयः प्रयासः प्रज्ञावद्भिः । [१९]प्रकरणकरणनिपुणकरणनिकरैर्भगवद्भिरपि नाऽत एव तत्सिद्धौ विहितं विशेषेण किञ्चिदत्र, परं काव्यमेव तत्रभवत्प्रणीतं जगद्वैचित्र्यरव्यापकत्वेनाऽदृष्टवैचित्र्यविवेचकमेकं मननीयतममेतद्विलोकनीयं विलोककैः, यथा—

"क्ष्माभृद्-रङ्कयोर्मनीषि-जडयोः सद्रूपनीरूपयोः,
श्रीमद्-दुर्गतयोर्बलाऽबलवतोर्नीरोरोगार्त्तयोः ।
सौभाग्याऽसुभगत्वसंगमजुषोस्तुल्येऽपि नृत्वेऽन्तरं,
यत् तत् कर्मनिबन्धनं तदपि नो जीवं विना युक्तिमत् ॥१॥"

[२०]नचाऽश्चेदौचितीमेतादृगवलोक्य वैचित्र्यं नाऽनुमन्येत सुकृत-दुरितसद्भावं [२१]सद्भूतपदार्थप्रत्यायनपरायणो [२२]नेति । [२३]दुरन्ताऽनन्तयातनाकेतनोद्विग्न-संवेगवेगपरिवृढानामेतादृग्वैचित्र्योपनिबन्धकमदृष्टवैचित्र्यमेव [२४]निखिलाऽभीप्सिताऽनूनशर्मास्पदं प्रति महात्मनां-पराणयनहेतुः ।

मोक्षोऽपि च [२५]चोक्ष आचचक्षे [२६]अधिगतलोकाऽलोकाऽवलोकनलम्पटकेवलाऽऽलोकश्यालिंगनैस्त्रिकालविद्भि [२७]स्तस्याऽऽत्यन्तिकाद्वियोगात् । न च भवति संभावनाऽऽस्पदमेतत्, यदुत 'सत्यावारकेंऽशतोऽपि प्रकाश्यं प्रकाशते यथावत्प्रकाशकः' [२८]प्रतिरूपवस्त्वोत स्वस्वरूपं निरूपयेत्स्वस्वरूपं वस्तु । ततोऽनुग्रहोपघातनिबन्धनतया [२९]मूर्तवे-त नाऽन्तरा [३०]फलदानाऽपाटवतायां सत्यामपि कालाऽन्तरेणैव फलप्रदानसौष्ठवाऽवलोकनाद् बन्ध-[३१]मोक्षाऽऽदिव्यवहारविषयत्वेन [३२]द्रव्यरूपस्याऽऽत्मनो यावत्फलप्रदानमवस्थानेनाऽविष्वग्भावितया वा द्रव्यत्वेनाऽज्ञानात्मकत्वाऽऽदिनाऽचेतनत्वेनाऽनुमत[३३]मविरुद्धपदार्थप्रस्फुरणपटुप्रतिभावबद्धान्तःकरणैः [३४]सुकरणैः ।

अदृष्टदृष्टो जीवः कथं दृष्टाऽदृष्टफलाऽभिकांक्षी [३५]स्वस्वरूपाऽबोधिप्रवर्तितपुद्गलप्रचयमयपदार्थोपचयापचयजहर्षशोकोऽपि समवगम्याऽव्याबाधमात्मरूपमात्मानं सुखमवतिष्ठे[३६]द्याव[३७]न्नोदितसुकृत-दुरितनोदनाविलयप्रभवयथास्थितात्मस्वरूपाविर्भावः । न चर्ते[३८]प्रतिबन्धकस्वरूप-तदागमननिदान-तद्बन्धहेतु-तत्स्थान-तदुच्छेद-फल कारणाऽऽद्यवगमं सुकरा स्यात् [३९]नुन्नजगत्त्रितयाऽनुन्नरूपस्य विजिगमिषेति युक्त एवाऽऽरंभोऽस्यै [४०]तद्विधस्य तत्रभवतां देवेन्द्रसूरीणां ।

विशेषतश्चास्यैदंयुगीनस्य प्राणिगणस्य [४१]दुष्षमाररक्षःप्रतिक्षणविनाश्यमानमेघादिगुणनिकायस्य [४२]दुरवसेयान् पञ्चसंग्रह-कर्मप्रकृत्यादेरतिगहनतमाद् बालज्ञेयमिदं लघुतमं [४३]कुर्वतां

संग्रहं तेषा [४४]मुपकारसुकृतिनां। विभागश्चा[४५]स्या[४६]गमतीर्थकारैर्भगवद्भिर्विहितः समिति-(५)संख्यया। क्रमेण गाथाश्चात्र षष्टि ६०श्चतुस्त्रिंशत् ३४पञ्चविंशति २५षडशीतिः ८६शतं १००च [४७]मिता अनेक[४८] सहस्रगाथाभ्यासदुरवसेयतत्त्वावसायिन्यः। विभागश्च षष्ठः श्रीचन्द्रमहत्तरपादप्रणीतो दृष्टिवादनिस्यन्दभूतोऽ[४९]मन्दानन्दप्रदशब्दार्थमयः [५०]संग्रहणी-कल्प इति न तत्र प्रभुभिरातत आयासः, [५१]उष्णताप्रचयाविष्टाम्बुततिरिव यतो निर्मूलतामेवेयृयात्तत्[५२] तथा तन्यमानमिति।

प्रक्रान्ते प्रक्रमपञ्चके च दृब्धा आद्ये कर्मविपाकाऽऽख्ये कर्मणां मूलो-त्तराः प्रकृतयस्त-दुदयोद्भवमनुभवनीयं फलं च। न चैवं [५३]सैदंपर्यं [५४]कर्मप्रकृतिप्रकरण्याकरणमुपलब्धिमाश्रितं [५५]परत्र तीर्थे, कौतस्कुती च तद्बन्धादिवैचित्र्य-विवेचना? बन्धहेतवोऽपि च निबद्धा [५६]भव व्ययपरिजिहीर्षूणामिष्टसिद्धयै।

अत्र चावधेयमिदं—यदुताऽसाधारणगुणयुगलयुक्त आत्माऽनुभूयते एवाऽनुभवदक्षैः, तत्ता-रतम्याऽवलोकनं च न स्वाभाविकं संभवेदात्मत्वाऽविशेषात् भेदकमन्तरा, प्रतिप्राणि पौर्वापर्येणापि च तारतम्यप्रकृतिप्रेक्षणाद् भेदकस्वीकार आवश्यकः। न चाऽसौ चेतनो घटाकोटिमाटीकते निष्टङ्कितत्त्वाध्वनि। [५७]अदृश्यता चाण्वादिवन्न सूक्ष्मत्वादनौचित्यश्चिता।

तथा च [५८]तद्द्वयप्रतिबन्धकमत्राऽनुक्रमेण ज्ञान-दर्शनाऽऽवरणीयत्वेनाऽऽख्यातं। भेदाश्च तयोः सामान्य-विशेषव्याख्यानस्याऽर्थबोधकत्वदर्शनात्तथैवातताः। तत एव च बुद्धेरनियत्ता न व्याघातिनी।

सुख-दुःखसाधनसिद्धावपि तद्भावाऽभावौ प्राणिवैचित्र्येणाऽनुभूयेते इति वेदनीयस्य समेदयुग्मस्याऽऽख्यानं। [५९]यथार्थाऽर्थदर्शनदर्शनश्रद्धान-तदाचारप्रतिबन्धकाऽध्यक्षाऽनुभवादाख्येयं [६०]उद्देश्यैकत्वेन द्विभेदं मोहनीयं, कषायाश्च क्रोध-मान-माया लोभाऽऽख्यास्तथाविधा हास्यादयस्तु [६१]तत्कारणानि तत्तेऽपि व्याख्यायन्ते [६२]एतद्भेदतयैव।

आयु-र्नाम-गोत्राणि तु विचित्राण्यागच्छन्त्येवाऽनुभूत्याऽऽस्पदमिति न तद्भेदेषु विस्रम्भाऽभावः।

चरमेऽन्तराये च सामान्यविशेषरूपेण शक्तिपञ्चकं दान-लाभ-वीर्य-भोगोपभोगाऽऽख्यं वेविद्यत इति [६३]तदायातिप्रतिबन्धकमपि तावत्संख्यावदेव प्रतिज्ञातं [६४]संख्यावच्छेदवरकैः।

अनेन च ये केचन दुर्विदग्धतमा आनन्दगिरि—वाचस्पतिमिश्राऽऽद्या अनाकलय्याऽर्हतमविकलं मतं अनाघ्राय च तत्रस्थमर्थसार्थव्याख्यानं दीप्रदीपे झम्पापातमिव शलभा ब्रह्म-

सूत्रभाष्यव्याख्यायां कर्मव्याख्याने जैनसंमततया जैनजातासंमतं विषमयमसत्यतममुद्गारं निपात्यात्मानमधमाध्वनि न्युदगृणन् , ते तथैवोद्भाविता भाविताऽऽत्मनां पुरः ।

कृतं वाऽनेन, यत्तथास्वभावा एव ते, यन्न हि मक्षिकाणामन्यथा भवेत् । स्वभावो यत्-सत्यप्युत्तमे चन्दने सुरभिणि "समियति ता वर्चोगन्धाद्याघ्रातुं ।

एतद्विधमेव चाऽनाकर्णनीयतमं सकर्णानां गेहेशूरतरप्रलपितं "कामकलानिष्णातेप्सुजग-दशंकरशंकरचरितं "स्वप्नप्रभावोपलब्धमिव सबाधैः ।

कर्मसु चाष्टस्वत्र प्रथम-द्वितीयच-तुर्थाऽन्त्यानि घातिसंज्ञकानि, यतस्ते घ्नन्त्येवात्मनां ज्ञानादीन् गुणान् । अन्यत्तु चतुष्कं तेषां तत्तत्स्वभावाऽऽविर्भावे सहचारि, ततो न घातुकता तस्य ।

तथा चात्मनः स्वाभाविकसुखाऽन्वितत्वं वेदनीयस्य चाऽघातुकत्वं नाऽऽविर्भावयेद् विरुद्धतां ।

प्रान्ते चान्तरायकारणे यज्जिनाऽर्चाविरुद्धताया दर्शनं कारणतया, तन्निभालनीयं लुप्तवि-वेकलोचनैर्यथार्थतया ज्ञेयं च ज्ञातमध्यस्थमार्गतत्त्वैर्यदुत नोत्पत्तिकालाल्लुम्पकानामाख्यायते ख्यातयशस्काऽऽर्हतैः "जिनप्रतिनिधिप्रतिपत्तिपराकरणमशुभतरादृष्टदन्दशूकदष्टं, किंतु तस्य तथात्वेन प्रागपि ।

ततः द्वितीये कर्मस्तवे च सुभटसिंहस्य कृतसंग्रामगुणग्रामवर्णनमिव जिनपतेः प्रतिष्ठितं यशः समाख्यातुं कर्मघातकरणक्रियां निकटभव्यानुकरणीयामाचिख्यासवो भट्टारका भणितवन्तो गुणस्थानकानां मुक्तिसौधसोपानकानामभिधाः, अदृष्टानां क्रमशो बन्धो—दयो-दीरणा- सत्ताश्च । तेषु यथार्थतयाऽवलोकनेनाऽऽसां भविष्यति भावुकपुंगवानां स्वाऽऽत्मनोऽवस्थानं जिगमिषा-प्राप्तिश्च कदा कदा ? क्व क्वेति ? । साक्षाद्भविष्यति च भगवतामाप्तानां सिद्धिराप्तताया अनुकरणीयता च तदाचाराणां चेतसि सचेतनानां ।

तृतीयस्मिन् बन्धस्वामित्वाऽऽख्ये प्रकरणे च प्रादुश्चक्रुः पूज्यतमाः कर्मणां केषां केषां ? के के जीवा बन्धका ? इति ।

तत्र प्रथमं गतिरिन्द्रियाणि काया योगा वेदाः कषाया ज्ञानानि संयमा दर्शनानि लेश्या भव्यः सम्यकत्वं संज्ञिन आहारक इत्येतास्तता मार्गणाश्चतुर्दश ।

अत्र च "सर्वसंसार्यसुमच्चिन्तनावश्यकतया न व्याख्याप्रज्ञप्त्यादाविवाऽनिन्द्रियाऽ-

कायाऽयोगाऽवेदाऽकषायाऽऽदीनां गणना । गणना च ज्ञानाऽऽदिविरुद्धानां अज्ञानाऽ-विरति-मिथ्यात्व सास्वादनाऽऽदीनां देशविरतिमिश्रादीनां मिश्राणामपि च सर्वसंसाराऽन्तर्गतगति-मद्व्याप्तये ।

तथा च द्वाषष्टिरेव मार्गणाः सर्वाः । सर्वासु चैतासु चिन्तितो बन्धो मुख्यतया, क्वचित् प्रकृतीनामाविष्कृता संख्या । क्वचित्तु लाघवाऽर्थितया उदयाऽऽद्यपि चाऽनुषङ्गतोऽन्वादवायितुं (?) गुणस्थानद्वारा दर्शितो दृष्टबोधमार्गैर्भगवद्भिर्बन्धः । भविष्यति भविनां भावुकाभिलाषिणां भद्रंकरी चिन्ताऽतो यत्स्वयं क्व क्व मार्गणानां? केषां केषां बन्धक आसीत् प्राक्? विद्यते अनाराधने चात्मगुणानां भावी चेत्यात्मिका अनेकधा ।

चिन्तनं तु पूज्यैरन्योऽन्यव्यभिचाराद् गत्याऽऽदीनां बन्धस्य क्वचित्क्वचिद्विशेषादनेक-धा-बोधनस्य दृढतरसंस्कारविधानप्रत्यलत्वाच्च बन्धस्य गत्यादिभिर्भाणितं ।

तुर्ये तु तेनुस्ततयशसः षडशीतिकाऽऽख्ये विभागे ख्याततया दर्शयितुं भव्येभ्यो बन्धाऽऽदि, तद्‍हेतुगणं च जीवस्थानानि, मार्गणास्थानानि, गुणस्थानानि उपयोगा योगाः लेश्याबन्धोऽल्पबहुत्वं चेति द्वाराणि ।

तत्र चतुर्दश, चतुर्दश, द्वादश, पञ्चदश, षट्, चत्वारः, क्रमेण भेदा यावद्बन्धं विवृताश्च परस्परेषु मनोहरया पद्धत्या । भविष्यति च तदवलोकनादेव यथावदाभोगो भूरिप्रतिभानां ।

न च वर्णिका शक्या वर्णयितुं पारयति चरिकर्तुं तदास्वादं वा सा, प्रथमं प्रोच्य सामा-न्येन साधितवन्तो विस्तरेण द्विषष्ट्यायादिभेदैर्जीवानां गुणस्थानोपयोगाऽऽदीन् दर्शयामासीना(?) °°दृष्टाऽशेषदर्शनदर्शनपरमार्थाः ।

प्रथमे प्रतिपादितेऽपि प्रकरणे बन्धहेतुसंघाते किमिदमत्र पुनरिति न चतुरैश्चिन्तनीयं चेतसि । यतः प्रथमं तावत् सामान्येन प्रथमे हेतवोऽत्रैव च पुरा मूलप्रकृतीनां बन्धो न्यरूपि । पश्चात्तु ये मूलहेतवो बन्धस्य मिथ्यात्वाऽऽद्या यावन्तश्च गुणस्थानेषु येषु येषु याश्च प्रकृतयो यद्यन्मूलास्तत्तत्सर्वं समाचक्षत °[1]प्रसभमाहितहितबुद्धिनिधयः ।

पश्चात् प्रकटितवन्तः प्रकटतरप्रतिभां गत्यादीनां विचारमल्पबहुत्वाभ्यां मार्गणानां तद्वर्ति-जीवद्वारा उदयो-दीरणाऽऽदिस्थानानि च । भावाश्चौपशमिकाद्याः षट् तत्प्रभेदा गुणाद्याश्रि-तत्वं जीवऽजीवालिंगितादि च व्याख्यायिषत ख्यातख्यातिभिः ।

अत्राऽपि सामान्यतः शिष्टं धर्मादीनां द्रव्यत्वं चेदभविष्यदवगतमपगतकालुष्यहृदयेनाऽऽ-

नन्दगिर्याख्यैनैव वाचालतां प्राकटयिष्यत् [७२]जगज्जैत्ररागादिद्विषत्संमोहजेतृश्रीमज्जिनोक्त्यनुसारिमतमन्तव्यमिम्लासया (चिखंडयिषया), परं ! किं कुर्यान्नरो हीनभाग्यो ? यन्न स स्वयं सन्मार्गप्राप्तो, न च तदीप्सुः, पराम्निमिमज्जिषुश्चाऽविशेषेण च तथाभूतः शाक्तमतासक्तयोगोऽ [७३]नृतवादकलंकितजिह्वाकरालः ।

पश्चाज्जीवादीनामल्पबहुत्वाद्युपयोगि—संख्यातादिव्याचिख्यासया संख्यातक-परीत-युक्त-स्वपदयुक्ताऽसंख्यातकाऽनन्तकानां सप्तानां जघन्य मध्यमो-त्कृष्टभेदान् भाषितवन्तो [७४]भाषाचणा [७५]भासितलोकाऽलोकलीनाऽर्थजातज्ञानलब्धबोधिलाभाः ।

अत्र च प्रथमं प्रेक्ष्य [७६]प्रोक्तप्रकारप्रकरं प्रहीणदृष्टिरागाणां प्रादुरभविष्यच्छंकरस्य [७७]सभ्यस्तधर्मग्रामणेरलीकाऽर्थव्याकरणपटुता हृदये, यतो न तेनाऽधिगतं असंख्याऽनन्तयोरपि पार्थक्यं [७८]कर्मपृथक्करणप्राप्तयथार्थबोधिजैनमतानुमतं । कथमन्यथा [७९]न्यास्थदसौ जीवानामनन्तावयववत्त्वं आत्मप्रमाणविचारे आप्तोदितिविचारणीयो परं नाऽसंभवीदं तादृशे [८०]श्वपचपराकृते कामशूकरे पदार्थविचारशून्यहृदये भक्षितदृष्टिरागहृत्पूरे । यतः स स्वयमेवाऽऽत्मनः पारमार्थिकमबद्धत्वं व्यावहारिकं चाऽन्यथात्वमभ्युपगम्य कथञ्चिद्वादम[८२]पजानानो दृष्टः प्रागेव ।

अन्यच्च यैः कैश्चिच्चकासामासिरे वितथां वाणीवितर्तिं वितत्य यदुत “यद्यनन्तः कथं ज्ञेयोऽर्थो ? ज्ञेयश्चेत् कथमनन्तः, ? संपूर्णाऽवलोकनस्य संपूर्णताऽविनाभावित्वात्, संपूर्णता च साऽन्तस्य न त्वन्यस्ये”ति, ते उद्घाटिताः प्रकटितस्वाऽज्ञानप्रचयतया, यतो नाऽवबुद्धं बोधस्याऽपि तथैवाऽनन्तत्वं ।

तथा च तादृशाऽतादृशपरिच्छेदः कथमिवाऽनुचितिमंच्यात्, येनोदितिः शुभाऽऽयतिस्तेषां।

अत एव चाऽनेहसाऽनन्तेनाऽनन्ताना[८३]मितिः सिद्धौ सिद्धा सेत्स्यति च। न चाऽनन्तात्परा संख्या । [८४]तस्य नवमस्य मतेन केषाञ्चित्सर्वथैवाऽभावात् । येषामपि चाऽस्ति सा नवमी साऽप्यसंभाक्न्येव, यतस्तत्र[८५]क्षिप्तास्त्रिर्वर्गयित्वाऽलोकाकाशे क्षिप्ते केवलद्विकपर्यायाः। तथा च नाऽन्तस्तथाविधं प्रतिस्पर्धिनमन्तरा ।

विचाराश्चाऽतितमां सूक्ष्माः ख्यापिता अत्र केचित् कर्मस्वरूपविवेचने नाक्ताः[८६] केचित्पारंपर्येण केचिन्मुख्यतयाऽपरे [८७]इतरथा । अत एव चोपसंहार[८८]मुपरचयन् ? उपनिबबन्धुर्बन्धुरतरं “इय सुहुमत्थवियारो” इति ।

संज्ञा चैषा प्राक्तनी यथा (यतः) पूर्वाभियुक्तैः रचितपूर्वमस्त्येव तदभिधेयं प्रकरणं ।

एवमेव कर्मविपाकस्तवादीनि नामधेयान्यपि प्राचीनान्येव । यतो वेविद्यन्त एव प्राचीनतमानि प्राकृतान्य [८९]प्राकृतजनाकर्णनीयानि । वरीवृतति च तानि तत्र तत्र तत्रभवद्-नगाराऽगारिसत्कभांडागारे । मोमुद्रितानि चात्र संस्कृतानि त्वेतदनुसारीण्येव, न त्वेतन्मूलानीति नैवाऽत्र संमोहो निर्मोहानुसारिणां । षडशीतिकेत्यभिधा तु षडशीतिगाथामानत्वादेषमेव च शतक इति च । सप्ततिरिति तु "संख्याडतेश्चाशत्तिष्टेः कः" सूत्रेण कप्रत्ययाऽभावात्, प्राचीनाऽपि चैषैव संज्ञेति ।

चतुष्कं प्रकरणानामेतत्तज्जिज्ञासूनामत्याग्रहवद्विज्ञप्तेः प्रागेव प्रादुरकृत संसदियं, मंक्षु तत्प्रादुर्भावनकारणेनैव च न तत्र प्रस्तावनाऽऽदिकं किमपि प्रास्तावि, समयस्याऽतिह्रस्वत्वात्, समस्तानां समग्रैव च तथाविधोपकारिणीति समालोचनया चाऽपि । तत एव च षष्ठोऽभियुक्ततमैः परैरभिहब्धोऽपि सहैव नीतः प्राकाश्यतां प्रास्तावितश्चेति चेतनीयं [९०]चेतनावच्चतुरचक्रेणाऽ[९१]वक्रे चेतसि ।

पञ्चमे तु शतकाऽऽरव्ये कर्मप्रकरणे प्रतिज्ञातमेतत् प्रतिपाद्यतया प्रभुभिर्यदुत ध्रुवं या आयान्ति बन्धं, उदये वर्वृतति, सत्तायां गुणस्थाने सूचिताऽन्विता याश्चाऽऽत्मगुणघातप्रत्यलत्वेन घातिन्यस्तत्रापि या देशघातिन्यः सर्वघातिन्यश्च, याः पुण्यप्रकृतयो, याश्च परावर्तमानाः सर्वास्ताः सप्रतिपक्षाः प्रतिपादनीयाः, क्षेत्र-जीव-भव-पुद्गलविपाकदर्शिन्यो, मूलोत्तरप्रकृतिगता भूयस्काऽल्पतराऽवस्थिताऽवक्तव्यभेदाः, प्रकृति-स्थिति-रस-प्रदेशाऽऽद्याः, उत्कृष्ट-जघन्येतराभ्यां बन्धप्रभेदास्तत्स्वामिनः, सोत्तराणां मूलप्रकृतीनां अबाधाकालः, क्षुल्लकभवस्वरूपं, योगिकाऽल्पबहुत्वमबन्धकालः, शुभाऽशुभद्विस्थानकाऽऽदिरसनिरूपणा, औदारिकाद्या वर्गणा, अष्टौ अग्रहणान्तरिता, उभयतः कर्मदलिकस्वरूपं, तद्बन्धे विभागः, कर्मणां क्षपणोपयोगिनी गुणश्रेणिरचना, गुणस्थानकानामन्तरं, पल्योपम-सागरोपम पुद्गलाऽऽवर्ताः सूक्ष्मेतरभेदाः, अल्पबहुत्वं, योगस्थान-प्रकृति-प्रदेशबन्ध-स्थितिबन्धाऽध्यवसायस्थान-स्थितिविशेषाऽनुभागबन्धाऽध्यवसायस्थानाऽनुभागस्थाननां, श्रेणिस्वरूपं, उपशम-क्षपकश्रेणिस्वरूपं इत्येवं श्रद्धाभरभाजनज्ञेयस्वरूपमतितमां [९२]गहनं [९३]ऽव्यवगाह्य कर्मप्रकृति-पञ्चसंग्रहाऽद्यनल्पतरगूढं ग्रन्थकदंबकं [९५]सूक्ष्मग्रन्थं ग्रथितवन्तोऽनेक [९६]दुर्गमविचाराऽऽरूढं प्रकरणं । भवति च समाप्ताऽत्र श्रीमद्देवेन्द्रसूरिकृतिः ।

कदा कतमं भूमंडलं मंडयामासु[९७]र्मं डितशासनाम्बराः ? किमर्थं चायास एष ? केषां च पूज्यतमानां[९८] परिचर्यांया (परिचर्यया) अवाप्तसच्चारित्राः ? के वा भगवन्तः [९९]समस्ताऽनस्तमितसुखसन्दोहसाधनस्याद्वादसाधितसाधीयः शुचिताश्चिताऽऽगमाऽभ्यासकल्पव्रतती-

कन्दकल्पाः[१००] तत्रभवदुद्देश-प्रव्राजनाद्याचार्याः? के वा[१०१] भगवच्चरणचञ्चरीकमकरन्दमत्तमनोमधुपा? [१०२] इत्यादि ज्ञेयमत्र विद्वद्वृन्दारकाणां [१०३] बंहीयः,परं [१०४] तज्ज्ञेयं यथायथंश्रेष्ठिदेवचन्द्रलालभाइजैनपुस्तकोद्धारकोशद्वारा मुद्रिताया वन्दादरुवृत्तेः प्रस्तावनातः।

किञ्चिच्चात्रैव प्रकरणे प्रणीता या [१०५] श्रीमद्धृदयपद्मप्रभवप्रस्तावनापीयूषाऽशनतरङ्गिणी, तदवलोकनतोऽपि स्फुटं सिद्धिमेष्यति। विस्तराऽर्थिना तु विलोकनीया गुर्वावली पट्टावली च [१०६] तत्प्रबन्धबन्धुरा।

षष्ठं तु कर्मस्वरूपनिरूपणप्रवणं वाङ्मयं सप्तत्याऽऽख्यं, संभाव्यते [१०७] दृष्टिवादवदनाऽतिक्रान्तवेदवादकब्रह्मसहस्राऽनन्ताऽर्थज्ञापनदृढदृष्टिवादपानपीयूषपीनप्रवचनप्रधानतरः पुरुषविशेषोऽस्य संदृब्धा, यतो दृश्यतेऽस्याऽऽदिगाथायां "णीसंदं दिट्ठिवायस्स" इत्यमृतायमानं वाक्यं। प्रान्तेऽपि "रुइरबहुभंगदिट्ठिवायाओ" इति च। दृष्टिवादश्च [१०८] श्रीमदकलंकाऽऽस्यपद्मह्रदनिर्गत "उप्पन्ने इ वा विगमे इ वा धुवे इ वा" इतित्रिपथगायमानाऽशेषविश्वव्याप्तवस्तुविसराऽनुसारिपदत्रयीपानोद्भूत-भूतोद्भवद्भाविभावाऽवभासनप्रभुभारतीभरगणभृत्प्रणीतद्वादशाऽङ्गीगणिपिटकाऽन्त्यभागः [१०९] षण्णवतशताऽष्टसहस्रमानाविचलमान-महाविदेहमातङ्गमानमित-मषीमालालेख्यवाच्यो, व्युच्छिन्नश्चायं [११०] श्रीमदपश्चिमपारगतपरमगत्यधिगतिसमतिक्रान्तशतकद्वय इति।

नूनं निर्मातारोऽस्य निर्ग्रन्थाऽग्रेसराः प्राचीनतमाः श्रीमन्तश्चन्द्रमहत्तराः। यद्यपि न भिन्ना बहुश आसीरञ्छाखास्तदा, तथाऽपि सामान्यतोऽभूवंस्ताः श्रीमति कल्पे [१११] समस्तसमग्रवेदीशानवृत्तशासनापरगुरुपरम्परापद्मावबोधपद्मबान्धवाखिलखिलस्खलनावाप्यासाधारणानूनशर्माश्रयनिःश्रेयससाधनसमर्थसामाचारीविचारविस्तृतविभवानल्पप्रतिष्ठाकल्पे श्रीमद्भ्यो यशोभद्रेभ्य एव व्याख्याता वृत्तविस्ताराः शाखाः। प्राचीनाश्च तत एते [११२] सुराऽसुरविसरपरिसर्याविसरसंसृष्टशिरःशेखरखरतरमयूखमालासङ्गाः तत्रभवन्तः।

एतावताऽवश्यं वावसिष्यति मानसे मनस्विनामेतत् यदुत प्रकरणमेतत्प्राचीनतमं श्रद्धेयतमं चेति।

षष्ठत्वं तु श्रीमद्देवेन्द्रपादोपज्ञपूर्वप्रस्तावितप्रकरणपञ्चकप्रसिद्धिसिद्धं, अत एव च नाऽस्य चूर्णिकाराः पुरातना अपि प्रपञ्चितवन्तः षष्ठतां। सिद्धिश्चाऽस्मादपि प्रकरणस्यैतस्य चिरंतनतायाश्चूर्णिकारपूज्याऽभिधानाऽनुपलंभात्, विवरितारस्तु प्रस्तुतस्य [११३] प्रवचनवृत्तिविधानाऽवाप्तावतारकीर्तिनटीनाटितनाकनाथाः श्रीमन्तो मलयगिरिपादाः।

तत्रभवतां तेषामपि भगवतां नैवाऽवगम्यते इतिहा [११४]इतिहाससाधनशून्याऽनेहःसाधित-साधनैरधुनातनैः ।

प्रणीताश्च भगवद्भिस्तावद्राजप्रश्नीयाऽऽदीनामुपाङ्गानां व्यवहारस्य धर्मसंग्रहिण्या नन्द्याः पञ्चसंग्रह-कर्मप्रकृत्योः पीठिकाया बृहत्कल्पस्याऽऽवश्यकस्य यावत्कुन्थुजिनं विवृत्तयोऽनेका उपलभ्यन्ते अधुनाऽपि [११५]धूतैनोभरैर्भाग्यभराद् धर्मसाराऽऽदीनां तु ता नाऽऽगच्छन्ति गोचरं । शब्दाऽनुशासनं तु साधितं प्रतिष्ठितं श्रीमद्भिर्वेविद्यत एव । भविष्यति चाऽस्य प्रादुर्भावः [११६]प्रादुर्भावकगोष्ठीसंसत्संमत्यां भविष्यन्त्यां ।

प्रस्तुतं प्रकरणं यत्सप्ततिरित्याख्यया ख्यातं तत्र गाथापरिमाणमेव कारणं । यच्चाऽनेकत्रोपलभ्यन्तेऽधिका एतास्ता भाष्यसत्काः सुगमतायै संगमिता अवगन्तव्याः कैश्चिद्विपश्चिद्भिः । अत्र तु पार्थक्येनाऽवबोधाय पृथगेव न्यस्ता अङ्कतः ।

अत्र च कर्मप्रकृतयो विचार्यन्ते बन्धो-दयो-दीरणा-सत्तारूपैः संवेधमनुसंधाय परःसहस्राः परंलक्षाश्च (?) विकल्पा जाजायन्ते । निरूपणमेतदेव दर्शयते विलोककानां प्रस्तुतप्रकरणस्य सर्वविन्मूलतां दृष्टिवादोद्भूतत्वं च।

ते च जीवस्थान-गुणस्थानाऽऽदिभिरपि चिन्तिता एव गत्यादिभिर्मार्गणाभिरपि तथैव मूलोत्तरप्रकृतीराश्रित्योदयाऽऽदीनां चिन्तयित्वा चैवं गुणस्थानकान्याश्रित्य बन्धमुपशान्तिं क्षयं चाऽऽविश्चकार। प्रादुर्भावितश्च प्रान्ते [११७]ऊनार्थपूरणपूर्वकपरिकथनप्रार्थनापरो वचोविसरो व्याख्यायाऽशेषकर्मक्षयोपपद्यमानाऽव्याबाधपदस्थिति [११८]मखिलभव्यजननिःशेषप्रयोजनोपनिषद्भूतां प्रान्त्यमङ्गलरूपामित्याख्याति [११९]लोकख्यातख्यातिश्रीमदकलंककलनावगत—त्रिजगतीगतचराचरपदार्थप्रकरश्रीमज्जिनवरेन्द्रोदित्युदितानूनरत्नत्रयासमप्रभावभावितान्तरा—त्मो[१२०] दन्वदन्ताभिधोऽ [१२१]शुद्धध्यागोजातैनोऽपनयनप्रभुमभूत्तमोपदिष्टमर्पयित्वा मिथ्यादुष्कृतमिति शं सर्वेभ्योलेखकपाठकेभ्योः ।।

[१२२]सुरपालिशिरोरत्नद्योतिक्रमयुगाय ते ।
शान्ते ? [१२३]शान्तिनिशान्तोऽयमार्पि [१२४]याम्यर्हणायतिः ।।१।।

त्वया निर्णाशिताऽशेषाऽशिवेनाऽ [१२५]न्तितशात्रवे ।
[१२६]मृगग्रामेऽयमग्रन्थि [१२७]ग्रन्थोद्घातो [१२८]मुदब्धिना ।।२।।

श्री पूज्यपादागमोद्धारकाऽऽचार्यश्रीलिखितप्रस्तावना

विषमपदार्थसूचिका

# आनन्दलहरी-टिप्पणी

## ( श्री कर्मग्रंथोपोद्‌घातः )

१. अत्र हि **कलावत्**....इत्यत आरम्य **कलितै** इति पर्यन्तं पङ्क्तित्रयमितो हि समासोऽस्ति, तस्य चाऽर्थानुसारिणः सप्त अंशा अवबुध्यन्ते, तथाहि:—

(अ) कलावतां कलापेनाऽऽकलनीयाः बुद्धिगम्या इत्येकोंऽशः ।

(आ) अकल्प्यं च तत् अकलङ्कितं च यत् अविकलं=संपूर्णं कलनं=ज्ञानं, तस्य कलया=नैपुण्येन परिकलिताः=सहिताः इति द्वितीयोंऽशः ।

(इ) आकल्पा=समर्था चासौ अविकलिता=न्यूनतारहिता या कीर्तिः तस्याः कंदः=मूलं, तद्रूपो यः कमनः=सुन्दरः अनेकांतः=स्याद्वादः तस्य प्रकटने कोविदाः=कुशलाः इति तृतीयोंऽशः ।

(ई) कल्पान्तकाले=प्रलयकालेऽपि अविशसितः=अखण्डीभूतः आकारः=स्वरूपं (यैर्निर्दिष्ट-वस्तु जातस्येति शेषः) येषामिति चतुर्थोंऽशः ।

(उ) कलिः=विषमकालः, तेन कृताः अनेके अकान्ताः=असुन्दराः एकान्ताः=एकान्तवादेन प्रतिपाद्यमान स्वच्छंदतामूलकपदार्थनिरूपणानि तद्रूपा ये ऋक्षाः=तारकाणि, तेषां या कान्तिः=तेजः, तस्याः कर्तने=अपाकरणे विकर्तनः=सूर्यः तत्सदृशा ये इति पंचमोंऽशः ।

(ऊ) श्रीमंतो ये अकलंकाः=रागादिकलंकरहिताः तीर्थंकरा इत्यर्थः, पूर्वोक्तांश पंचकं हि अत्र संयोज्यम् ।

तीर्थंकरा हि कीदृशा ? इति प्रश्ननिर्वचने पूर्वोक्तविशेषणपञ्चकं संयोज्यम् ।

(ऋ) श्रीमदकलङ्कानां=श्रीमत्तीर्थकृतां या कला=ज्ञानं (केवलरुपं), तया कल्पिताः=ज्ञाताः ये अकलनीयानां=सामान्यज्ञानिनाऽनवगम्यानां अर्थानां=पदार्थानां कदंबकः=समूहः यस्मिन् एतादृशो यः कल्पः=समर्थः (जीवनशुद्धाविति शेषः) यः कल्पः=आचारशास्त्रम्, तस्याऽऽकर्णनेन=विधिपूर्वकश्रवणेन कान्ततमाः=अतिसुन्दराः ये संस्काराः=श्रवणफलरुपाः यथाशक्यसन्मार्गप्रवृत्तिरुपाः तैः, कलिताः=सहिताः, तैरिति तात्पर्यानुसारी अर्थोऽवबोध्यः।

२. विविधं=आध्यात्मिकादिभेदभिन्नं यत् विधानं=क्रियानुष्ठानं तस्मिन् धुरन्धराणि=धुरावहनसमर्थ वर्यबलीवर्दतुल्यानि (मुख्यानीति यावत्) यानि अक्षुण्णानि=केनाऽप्यप्रतिहतानि च तानि प्रत्यक्षप्रभृतीनि प्रमाणानि=पदार्थस्वरुपज्ञापकानि साधनानि, तेषां प्रथया=सफलकार्यवत्तया, प्रतीताः=बुद्धिगम्याः (स्पष्टा इति यावत्) ये अर्थाः=घट-पटादिवस्तूनि तेषां समूहस्य अपोहे ="**ब्रह्म सत्यं जगन्मिथ्ये**"-त्यादिविविधप्रतिपादनेन जगन्मिथ्यात्वसिद्धिरुपे मायाजालस्वरुपसादृश्येन निराकरणे आहार्याः अध्यारोपादिमूलकाः ऊहाः=विविधतर्काः येषामिति व्युत्पत्तिरर्थानुसारिणी अत्र ज्ञेया।

३. उत्तरमीमांसायाः=मीमांसाशास्त्रस्य उत्तरभागरुपस्य वेदान्ताऽपरपर्यायस्य मांसला=परिपुष्टा या मीमांसा=विविधविचारणा तद्वतां अतिशयेन ख्यापयन्ति=असत्त्वेऽपि शब्दवैकदुष्यतर्कप्रमाणबद्धत्वादिफटाटोपेन प्रदर्शयन्ति ये ते, तेषु निपुणतरा वा तान् इति व्युत्पत्तिः।

४. जगतः=संसारस्य वैचित्र्यं=नानाविधविरोधाक्रान्तत्वं, तस्य अन्यथाऽनुपपत्तिरेवैकं लक्षणं=स्वरुपं यस्य, तस्मात् इति।

५. 'अनुपचरित' पदेन पूज्यागममर्मज्ञा सूरिवर्या एवं दध्वनुरत्र यत्-"असदेव माया बन्धनं भ्रान्तिरूपं वेदान्त्यभिमतं न सम्यग् इति।"

६. भूतिः=भस्म, तेन भूषितः यो विग्रहः=शरीरं, तस्य परिचर्या=भूयोभूयः स्नान-शौचाऽऽदिरुपा तत्र परायणाः=तत्पराः तानिति विग्रहः।

अथवा-भूतिना=भस्मना भूषितः विग्रहः=शरीरं यस्य स महादेवः शम्भुः, तस्य परिचर्यायां=सेवायां परायणास्तानित्यप्यर्थोऽत्र सङ्गच्छते।

यथायोगं सङ्गतिरुहनीया समुपासितगुरुकुलैर्मतिमद्भिः।

७. 'तत्'पदेन प्राङ्निर्दिष्टस्य "अदृष्टस्य" कर्माऽपरापर्यायस्य ग्रहणमवबोध्यम्।

८. विवेकः=हेयोपादेयनिर्णयः तदनुकूला या मतिः तद्रूपवारिधराणां=मेघानां पवनरुपाः ये ते इति।

पवनेन हि मेघा विशीर्यन्ते, पवनानां विवेकबुद्धेरभावत्वं स्वाऽज्ञानमूलकप्रवृत्तिव्रातेन विवेकबुद्धेर्हि निर्नाशस्य करणेन सूच्यते ।

९. यथार्थाश्च ते अर्थाश्च तेषां यः पन्थाः, तत्र प्रवणं तत्परमिति विग्रहः ।

१०. भूः=पृथ्वी, भूभृत्=पर्वतः (उपलक्षणत्वात् समस्तपदार्थानां) तयोः विरचनं=निर्माणं, तस्याङ्गीकरणे =स्वीकारे प्रवणाःतत्पराः तेषामिति व्युत्पत्तिः ।

अत्र **'प्रवणता'** मूलपाठस्य सङ्गतेरनुपलम्भात् कोष्टकमध्ये **प्रवणानां** पाठं विन्यस्य तदनुसारिणी अर्थयोजना कृताऽस्ति, साराऽसारत्वमूहनीयं धीधनैः ।

११. अपकर्णितः=कर्णाभ्यां अवधीरितः सन्मार्गः=तत्त्वनिर्णयपद्धतिः यैरिति व्युत्पत्तिरत्र ज्ञेया ।

एतत्पदेन वितंडाऽऽदीनां वस्तूनामितरैः दार्शनिकैः मोक्षप्राप्तिहेतुभूततत्त्वज्ञानाङ्गभूतत्व मान्यताया असारत्वमभिध्वन्यते ।

१२. अत्र 'तत्' पदेन यवनानां तन्मान्यतायाः वा परामर्शः सम्भाव्यते ।

१३. कल्पितः=प्रमाणबलेन प्रतीतिपथमवतीर्यमाणः चासौ कायः=शरीरम् (यवनादिभिरशरीरखुदा-पदवाच्येश्वरादृष्टवाणीगमकम्) तेन परिकलितेति विग्रहः ।

१३. अत्र 'तत् पदेन यवनानां तन्मान्यतायाः वा स्वीकृतेः परामर्शोऽवबुध्यते ।

१४. भूतिः=भस्म, एव अंबरं=वस्त्रं यस्य ( निर्वस्त्रत्वेन दिगंबरत्वेन वा भूतेरम्बरत्वकल्पनाऽत्रौचिती-मञ्चति ) एतादृशश्च शम्भुः शङ्करपदवाच्यो हि देवता, तमिति ।

१५. अशेषाश्च ते शेषाः=जगत्कर्तृत्ववादीतरवादिनः शास्तारः=शास्त्रतत्त्वोपदेष्टारः,तेषां सम्मतं=प्रमाणी-भूतमितिविग्रहः ।

१६. अतिशयेन निशितः युक्तिरुपोऽसिः=खड्गं, तेन विशकलितः=विद्धनितश्चासौ उद्दालितः=विक-र्तितो वा उच्छिष्टा=तैः तैः दूषणव्रातैः चुम्बिताः शिष्टैः=मध्यस्थविचारकज्ञानिभिः अशस्याः अमान्याः अप्रमाणीकृताः याः युक्तयः प्रयुक्तयश्च तद्रुपाणां व्रततीनां = लतानां व्रातश्चेति तत्त्वं तेनेति ।

१७. 'तनू' धातोः सन्नन्ताद्यतनीरूपमिदम् । तनो वा (४–१–१०५सि.पृ.) इति सूत्रेण सन्नन्त-तन् धातोर्विकल्पेन दीर्घत्वं भवतीति सम्यक् ।

१८. तत्र=ईश्वरवादनिराकरणविषये ।

१९. प्रकरणानां अल्पाक्षराणां महार्थानां तात्त्विकग्रन्थानां करणं-विरचनं, तत्र निपुणानि=कार्यदक्षानि करणानि मतिप्रागभार=सरलशैलि-गम्भीरार्थसमावेशकशब्दरचनाऽऽदीनि तेषां निकरः=समूहः येषु तैरिति व्युत्पत्तिः ।

२०. अत्र हि तात्पर्यानुगामी अन्वय एवमबोध्यः तथा हिः—

**"एतादृक् वैचित्र्यमवलोक्य सद्भूतपदार्थमत्यायनपरायणो ना सुकृत-दुरितसद्भावं न अनुमन्येत इति औचितीं न च अञ्चेत्" इति**

२१. सद्भूतानां=वस्तुगत्याऽस्तित्वशालिनां पदार्थानां प्रत्यायने प्रमाणसिद्धिज्ञाने परायणः=तत्परः इति विग्रहः ।

२२. नृ शब्दस्य प्रथमैकवचनमत्र विज्ञेयम् अतः अग्रेतन 'इति' पदस्येकारेण सह सन्ध्या '**नेति**' स्वरुपस्य 'न इति' एवं सन्धिविच्छेदो न कार्यः ।

२३. दुरन्ताः अनन्ताश्च ताः यातनाः=पीडाः तासां केतनं=गृहं संसाररुपं, तत उद्विग्नाः तथा च संवेगः=तीव्रमोक्षाभिलाषः, तस्य वेगः प्रवर्धमानगतिः, तेन परिवृढाःपूज्याः, ततश्च दुरन्ता.... द्विग्नाश्च संवेगवेगपरिवृढाश्चेति द्वन्द्वसमासः, तेषामिति व्युत्पत्तिरत्र ज्ञेया ।

२४. निखिलैः=समस्तप्राणिभिः अभीप्सितं च तत् अनूनं=सम्पूर्णं च तत् शर्म=सुखं तस्यास्पदं= स्थानम् इति ।

अथवा निखिलानामभीप्सितानाम् अनूनशर्मणः आस्पदमिति ।

अथवा निखिलैरभीप्सितस्य अनूनशर्मण आस्पदमिति ।

एतद्धि पदं निराबाध—शाश्वत—मोक्षाऽऽख्यपदसूचकं विज्ञेयम् ।

२५. चोक्षः=निर्मलः कलङ्करहितः एतत्पदेनान्यतीर्थ्यैः मुक्तस्वरुपेऽपि भगवति तीर्थनिकारादिना हेतुना पुनरवतरणलीलाप्रदर्शनाऽऽदिकलङ्काङ्कितत्वमभिमन्यते तस्यासारत्वं व्यज्यते ।

२६. अधिगतम्=लोकाऽलोकयोरवलोकने लम्पटस्य केवलाऽऽलोकस्य श्रियाः आलिंगनं यैस्तैरिति व्युत्पत्तिरत्र विज्ञेया ।

२७. तस्य=कर्मणः इति

२८. 'उत' 'इति' स्वस्वरुपं=स्वस्मिन् स्वरुपे स्थिरं वस्तु प्रतिरुपवस्त्वा=सादृश्यवता वस्तुना स्वरुपरुपं निरुपयेत्' इति शब्दसंयोजना विज्ञेया, परं तात्पर्यसङ्गतिःसम्यक् नाऽवबुध्यते इत्यत उह्यं धीधनैरत्र सम्यङ् गुरुनिश्रया ।

२९. मूर्त्तत्वेन हेतुनेति शेषः, मूर्त्तत्वादेव कर्मणः अनुग्रहो-पघातकारकत्वं सङ्गच्छेत ।

३०. उदयकालादूर्ध्वमित्यर्थः ।

३१. बंध-मोक्षादिव्यवहारश्च द्रव्यविषयक एव संभवति न गुणसम्बन्धीति ज्ञेयमेतेन पदेन ।

३२. अत्राऽऽत्मनः=द्रव्यरूपत्वमुपदर्श्य द्रव्येणाऽऽत्मना सहाऽविष्वग्भावित्वं कर्मणः प्रदर्श्य कर्मणोऽपि द्रव्यरुपता पौद्‌गलिकताऽत्र प्रतिपाद्यते ।

३३. अविरुद्धाश्च ये पदार्थाः तेषां यत् प्रस्फुरणं तस्यै पट्व्या प्रतिभा तया अवबद्धं=व्याप्तं अन्तः-करणं येषां तैरिति विग्रहः ।

३४. सु=सुन्दराणि करणानि इंद्रियादीनि येषां तैरिति ।

३५. स्वस्य यत् स्वरुपं तस्याऽबोधिः=अज्ञानं, तया प्रवर्त्तितः निष्पादितः यः पुद्‌गलानां कार्मण-वर्गणागतानां प्रचयः समूहः तन्मयाः तेन पुद्‌गलसमूहेन निर्वर्त्तितौ यौ पदार्थानां=संसारिवस्तूनां चयाऽपचयौ=लाभ–हानी, ताभ्यां जातौ हर्ष–शोकौ यस्येति तात्पर्यानुसारी व्युत्पत्तिरत्र बोध्या ।

३६. यावत् उदित........स्वरुपाविर्भावः न ( भवेदिति शेषः ) तावदित्यध्याहार्यम्, कथं सुखमव-तिष्ठेत ? इति सम्बन्धः ।

३७. उदितौ=उदयाऽवस्थामापन्नौ सुकृतदुरितौ=शुभाशुभकर्मणी तयोः नोदना=शुभाशुभप्रेरणा तस्याः विलयेन प्रभवः उत्पत्तिः यस्यैतादृशश्चासौ यथास्थितस्य आत्मस्वरुपस्य आविर्भाव इति विग्रहः ।

३८. प्रतिबन्धकस्य=आत्मस्वरुपाच्छादकस्य स्वरुपं, तस्यः कर्मण आगमनस्य=आश्रवस्य निदानानि =हेतवः, तस्यः, कर्मणः बन्धस्य हेतवः, तेषां,=बंधहेतूनां स्थानानि तस्यः कर्मणः उच्छेदः समूलनाशः तस्य फलं कारणानि च इत्यादीनामवगमः=ज्ञानं तमितिविग्रहः ।

३९. नुन्नं=प्रेरितं (अव्यवस्थितीकृतमिति वा ) जगतां=ऊर्ध्वाधोतिर्यग्रूपाणां त्रितयस्य अनुन्नं= अप्रेर्य यथावस्थितं रुपं=स्वरुपं येन तस्य इदं हि ' **कर्मणः** ' इत्यस्य विशेषणम् ।

४०. एतद्विधस्य=कार्मणः स्वरुपादिव्यापकस्येति भावः ।

४१. दुष्षमा=अवसर्पिण्याः पञ्चमकालः, स चासौ अरः=कालचक्रविभागरुपः स, चासौ राक्षसः, तेन प्रतिक्षणं विनाश्यमानः=अपसर्पणेन स्वरुप हान्या वा अस्तव्यस्तीक्रियमाणः मेधादीनां= बुद्धिप्रभृतीनां गुणानां निकायः=समूहः यस्येति व्युत्पत्तिरत्रार्थानुसारिणी ज्ञेया ।

इदं च विशेषणं "प्राणिगणस्य" इत्यस्य विज्ञेयम् ।

४२. दुरवसेयात् दुर्बोधात् इत्यर्थः ।

४३. 'कुर्वता'मित्यस्य प्राक्तनवाक्यगतेन "युक्त एव आरंभः" इत्यन्तेन सहान्वयो विज्ञेयः ।

४४. अपकारे सुष्ठु कृतिनः=कुशलाः निपुणा वा ये ते तेषामिति ।

४५. अस्य=कर्मग्रंथस्य ।

४६. आगमे=बालमतिभिः दुरवगाह्ये शास्त्रसमुद्रे तीर्थैः जलावतरणपद्धतिं=कर्मग्रन्थविरचनारुपां कुर्वन्ति तैरिति व्युत्पत्तिः तात्पर्याऽनुसारिणी ज्ञेयाऽत्र ।

४७. मिताः=प्रमाणयुक्ताः इत्यर्थः ।

४८. अनेकासां सहस्राणां गाथानामभ्यासेन (अपि) दुरवसेयं=दुःखेन अवबोध्यं यत् तत्वं, तस्य अवसायिभ्यः=ज्ञापिका इति भावः ।

अमन्दश्चासौ आनन्दश्च तस्य प्रदौ च तौ शब्दार्थौ तन्मय इति व्युत्पत्तिः ।

५०. एष च शब्दः प्राचीनतराप्ताभिजनप्रयुक्तपरिभाषया रुढः नानाविधार्थसमूहसङ्क्षेपार्थे, ततश्च लघुनि शब्दकलेवरे महतोऽभिमहाविशालस्यार्थस्य सङ्ग्राहके षष्ठे हि कर्मग्रन्थेऽल्पधीदुर्बोध्याना मनेकेषां पदार्थानां सूचनं हि सङ्ग्रहणी-पदेनाऽत्र विहितं प्रतीयते ।

५१. उष्णता=तेजःसन्निधानेनोद्भूतावस्थाविशेषः, तस्य प्रचयेन=समूहेन आविष्टा=व्याप्ता या अम्बुनः=जलस्य ततिः या बाष्परूपावस्था इति व्युत्पत्तिरत्रार्थानुसारमूह्या ।

५२. तथा=व्याख्यारुपेण विशदीकरणप्रकारेण तन्यमानं=विधीयमानं तत्=सङ्ग्रहणीकल्पत्वमिति तात्पर्यसङ्ग्राहिकान्वयशैली अवबोध्याऽत्र ।

एवं चास्य वाक्यस्यैवं भावः प्रतीयते यत्-" यदि च कर्मग्रन्थपञ्चकरचनावत् यदि दृष्टिवाद-निस्यन्दभूतस्याऽर्थगभीरस्य षष्ठकर्मग्रन्थस्याऽपि विवेचनाप्राधान्येन प्रणयनं क्रियेत, तर्हि परोपकारिसत्तमैः पूर्वाचार्यैः यत् संक्षिप्तशैल्या नानापदार्थानां विशिष्टपद्धत्या सङ्कलनेन सूक्ष्मासूक्ष्मधीमतां यद्धि हितं सम्पाद्यते तद्धि विशीर्येत ।

५३. ऐदंपर्येण=मार्मिकरहस्येन सहितमिति यावत् ।

५४. कर्मणां या प्रकृतयः तासां यः प्रकरः=समूहः तस्य व्याकरणं=विवेचनमिति यावत् ।

५५. परत्र=जिनशासनादन्येषु दर्शनेषु ।

५६. भवभृतः=संसारिजीवाः, तेषां यत् भयं=भवभ्रमणादिभवं, तस्य परिहारेच्छावतां भव्यजीवानामित्यर्थः ।

५७. अत्र चैवमन्वयः बोध्यः यत् " **अण्वादिवत् सूक्ष्मत्वात् अदृश्यता न अनौचित्यश्रिता** " इति ।

५८. 'तत्' पदेनाऽत्र चेतनाशक्तेः प्राधान्येन ज्ञान-दर्शनरूपत्वं विवक्षणीयम् ।

५९. यथार्थाश्च ते अर्थाश्च, तेषां यत् दर्शनं=अवलोकनं तत्स्वरूपं यत् दर्शनं सम्यक्त्वं, तेन जायमानं यत् श्रद्धानं तद्बलेन जायमानश्च य आचारः, तयोर्यौ प्रतिबन्धकौ, तयोः अध्यक्षं=प्रत्यक्षं य अनुभवः तस्मात् ।

६०. उद्देश्यं=द्वयोरपि व्यामोहजनकत्वरूपलक्ष्यं, तस्य एकत्वेनेति भावः ।

६१. 'तत्' पदेनाऽत्र कषायाणां परामर्शः ।

६२. 'एतत्' पदेनाऽत्र '**मोहनीय**'स्य अवबोध कार्यः ।

६३. अत्र '**आयाति**' पदेन विपाकरूपोऽर्थो विवक्षितः प्रतीयते ।

६४. सम्=सम्यक् प्रकारेण ख्यानं=प्रकथनं येषां, तेषां पदार्थानां अवच्छेदः=सम्पूर्णज्ञानं, तेन तत्र वावरकैः=श्रेष्ठैरिति व्युत्पत्तिरत्रार्थानुसारिणी विज्ञेया ।

६५. सम्=सम्यक् प्रकारेण इयति=गच्छन्ति, सङ्गच्छन्तीति यावत् ।

६६. कामसम्बन्धिनी या कथा तत्र निष्णता=कुशलत्वं, तस्या इप्सुः=अभिलाषुकः, तथा जगताम् शं=सुखं यो न करोति एतादृशः यः **शंकर** पदेन **शङ्कराचार्य**परामर्शोऽत्र तस्य चरितमिति यावत् ।

६७. संबाधैः स्वप्नप्रभावोपलब्धमिवेति सम्बन्धसंयोजना गम्या ।

तेन चायमर्थः—यत् वातादिबाधान्वितानां यथा स्वप्नप्राप्तिर्भवति, तत्प्रभावेनोपलभ्यते हि यथा स्वप्ने आलजालरूपं तदिवेति तात्पर्यानुसारी अर्थसङ्गतिरत्र ज्ञेया ।

६८. जिनानां=तीर्थकृतां प्रतिनिधिरूपाः याः प्रतिमाः, तासां प्रतिपत्तेः=दर्शनपूजाद्यायाः पराकरणम्=निरसनम्—खण्डनमिति यावत् ।

६९. सर्वेषां संसारिणाम् असुमतां=प्राणिनां चिन्तनस्यावश्यकतया इति व्युत्पत्तिः ।

७०. दृष्टः अशेषानां=समस्तानां दर्शनानां दर्शनस्य=वस्तुनिर्णयस्य परमार्थः यैरिति ।

७१. आहिता=विहिता या हितबुद्धिस्तस्या निधय इति ।

७२. जगतां जैत्राः=जयनशीला ये रागादयो द्विषन्तः, शत्रवः, तेषां यः स्वाभिमानरूपसम्मोहः अथवा तैरुत्पाद्यमानः यः सम्मोहः तस्य जेतारः श्रीमज्जिनाः, तेषामुक्तयः=वचनानि, तदनुसारि यत् मतम्,=जिनशासनम् तस्य म्लानिकरणेच्छया इति व्युत्पत्तिरत्रार्थानुसारिणी विज्ञेया ।

७३. अनृतवादेन=असत्यभाषणेन कलङ्किता या जिह्वा तया कराल इति ।

७४. भाषानिपुणा इत्यर्थः ।

७५. भासितः लोके अलोके च लीनो योऽर्थजातः, यस्यैतादृशज्ञानिनः तीर्थकृतः ज्ञानेन लब्धः बोधः जिनशासनस्य लाभः यैरिति व्युत्पत्तिः ।

७६. प्रोक्तश्चासौ प्रकाराणां अवान्तरभेदतः प्रकारः योऽसौ तम्, एतद्धि संख्याताऽसंख्यातादि-राशेः सम्बन्धि पदं ज्ञेयम् ।

७७. इदं हि पदं वक्रोक्तिमूलकं श्लेषपरकं विज्ञेयम् । तेन चापातत अर्थ एवं ज्ञायते यत् सन्न्यस्तः= संन्यासी-दण्डी, तस्य ये धर्माः आचाराः तत्राग्रणीः तस्येति । एतया व्युत्पत्त्या शङ्कराचार्यस्य संन्यासीनामग्रण्यत्वं प्रदर्शितम् ।

किंतु श्लेषपरयया व्युत्पत्त्या तु कटाक्षपूर्णोऽर्थ एवमपि ज्ञायते यत्—

सम्=समन्ततः न्यस्ताः=दूरीकरणरूपेण स्थापिताः धर्माः=सदाचारविशेषाः यैस्तैः एतादृशा ये दुर्विदग्धतमा दुर्भाग्यशेखराः तेषामग्रणीः तस्येति ।

दृष्टिरागपटलावृतविवेकेन तेन सम्यगनवबोधमूलकं हि जैनाभिमतानां कतिपयपदार्थानां खण्डनस्य दुस्साहसं कृतमस्ति ।

अत एतादृशकठोरोक्तिप्रयोगोऽत्र 'वक्रे हि काष्ठे वक्रं कर्त्तनमिति' सूक्तिमूलो हि ज्ञेयः ।

७८. कर्मणां पृथक् करणेन पृथक्करणाय वा प्राप्ता यथार्था बोधिः यैरेतादृशजैनानां यत् मतं तस्याऽनुमतमिति तात्पर्यानुसारिणी व्युत्पत्तिरत्राऽवबोध्या ?

७९. निर्-आङ्पूर्वकस्थाधातोरद्यतनीरूपं विज्ञेयम् ।

८०. श्वपचेन=चण्डालेन पराकृते अभिभूते ।

दन्तकथाऽऽधारेण शङ्कराचार्यस्य गङ्गास्नानात् प्रत्यावृत्तस्य चण्डालेन प्रतिभावता वाचोयुक्त्या कृतस्य पराभवस्याऽत्र सूचनमस्ति ।

८१. भक्षितः दृष्टिरागरुपी हृत्पूरः=मदेन हृदयं पूरयति योऽसौ धत्तूरः इत्यर्थः, येनेति विग्रहः ।

८२. निह्नवस्थानान्तर्गतप्रतिज्ञाऽपलापरुपस्य दोषस्याऽत्र सूचनमेतत्पदेन विहितं दृश्यते ।

८३. इतिः=गमनम् ।

८४. अत्र ह्यन्वय एवमवबोध्यः "केषाञ्चित् मतेन नवमस्य तस्य (अनंतस्य) सर्वथैवाऽभावात्" इति ।

८५. **क्षिप्ताः** इत्यस्य अग्रेतनेन **केवलद्विकपर्यायाः** इत्यन्तेन पदेनसहाऽन्वयोऽवबोध्यः ।

८६. विवेचनेन अक्ताः इति पदच्छेदः, अक्ताः इति अञ्ज् धातोः रुपं विज्ञेयम्, तस्य य व्याप्ताः इतिरुपोऽर्थो ज्ञेयः ।

८७. इतरथा=गौणत्वेनेत्यर्थः ।

८८. अत्र चैकवचनप्रयोगः अग्रेतनेन '**उपनिबबन्धु**'रित्येतेन सहासङ्गतः प्रतीयते । सामर्थ्य-गमनञ्च सद्गुरूपनिश्रयोहनीयं धीधनैः ।

८९. अप्राकृताः=संस्कारसम्पन्ना ये जनाः तैराकर्णनीयानि ।

९०. चेतना=विशिष्टज्ञानशक्तिः, तद्वन्तः ये चतुराः तेषां चक्रं तेनेति ।

९१. अवक्रे=सरले इत्यर्थः ।

९२. अत्र ह्येवमन्वयोऽवबोध्यः यत् "गहनं अनल्पतरगूढं कर्मप्रकृति-पञ्चसङ्ग्रहादिग्रन्थकदम्बकं अवगाह्यम्" इति ।

९३. वि=विशेषेण अवगाह्य=मर्मस्पर्शिधिया आलोड्य इति ।

९४. अनल्पतरः=अतिशयेन भूयान् गूढः अर्थः यस्येति ।

९५. सूक्ष्मः=निपुणधीगम्यः ग्रन्थः=रचना यथा स्यात् तथा इति क्रियाविशेषणं हीदं ज्ञेयम् ।

९६. अनेके दुर्गताः=स्थूलधिया दुरवसेयाः ये विचाराः=तत्वनिर्णयाः ते आरुढाः यत्र इति ।

९७. मंडितं=विभूषितं शासनरुपं अम्बरं=आकाशं यैरिति ।

९८. अत्र षष्ठ्यन्तं हि पदं सङ्गतं न भवति, अर्थानुसन्धानेन तृतीयान्तं '**परिचर्यया**' इति सङ्गच्छते ।

९९. समस्तं=सम्पूर्णं यत् अनस्तमितं=सदोदीयमानं यत् सुखं, तस्य यः सन्दोहः, तस्य साधनरुपः यः स्याद्वादः, तेन साधिता साधीयसी=श्रेष्ठा या शूचिता=पवित्रता, तया अञ्चितः य

आगमानामभ्यासः, तद्रूपः यः कल्पः=कल्पवृक्षः, तस्य या व्रतती=लता, तस्याः कन्दः=मूलं तत्कल्पा इति तात्पर्यानुसारी अर्थो विज्ञेयः ।

१००. तत्रभवतां पूज्यानां उद्देशः=आगमानामध्यापनं प्रव्रजनं=संयमावाप्तिः इत्यादिसम्बन्धिनो ये आचार्याः=गुरव इति ।

१०१. भगवतां=गुरुपादानां चरणरुपौ यौ चञ्चरीकौ कमले, तस्य यः मकरन्दः तेनः मत्तः मनः-रुपः मधुपःभ्रमरोः येषामिति विग्रहः ।

१०२. अत्र ह्येवमन्वयोऽवबोध्यः यत्—'इत्यादि **विद्वद्वृन्दारकाणां बंहीय अत्र ज्ञेयम्** इति '।

१०३. अतिशयेन विपुलम् ।

१०४. अत्र ह्येवमन्वयसङ्गतिः यत्–"**वरं तत् यथायथं श्रेष्ठि........द्वारा मुद्रिताया वन्दारुवृत्तेः प्रस्तावनातः ज्ञेयम् ।**"

१०५. श्रीमतां=पूज्यवर्याणां हृदयरुपं यत् पद्मं तस्मात् प्रभवः=उत्पत्तिः, यस्यैतादृशी या प्रस्तावना, तद्रुपिणी पीयूषाशनानां=देवानां तेषां तरङ्गिणी=नदी स्वर्गंगेति यावत् ।

१०६. 'तत्'पदेन पूज्याचार्यश्रीदेवेन्द्रसूरीश्वरपरामर्शः करणीयः ।

१०७. दृष्टिवादस्य=द्वादशाङ्गस्य यत् वदनं=स्वरूपनिरुपणं, तेन अतिक्रान्तं वेदानां=यजुर्वेदादीनां वादकस्य=उच्चारकस्य ब्रह्मणः सहस्रं येन, तथा अनन्तानामर्थानां ज्ञापने दृढं दृष्टिवादस्य= पानम्=अर्थश्रवणम्, तदेव पीयूषं, तेन पीनं यत् प्रवचनं=श्रुतज्ञानं, तेन प्रधानतरः, स चासौ इति चात्र तात्पर्यगामिकयोहया शब्दार्थसङ्गतिःकार्या।

१०८. श्रीमन्तो ये अकलङ्काः=कलङ्कशून्याः तीर्थकृतः, तेषामास्यरुपं यत् पद्महृदः, तस्मात् निर्गता या " उप्पण्णेइ वा विगमेइ वा धुवेइ=वा " इति रुपा या त्रिपथगा=गङ्गा तद्वदाचरमाणा, अशेषे विश्वे व्याप्तः यः वस्तूनां विस्तरः, तदनुसारिणी या पदत्रयी तस्याः पानं, तेनोद्भूतं यत् उद्भवतां=वर्तमानकालीनानां भाविनां भावानामवभासनं, तस्मै प्रभुः=समर्था या भारती= वाणी, तस्याः भरः समूहः, यैरवाप्तः एतादृशो ये गणभृतः=गणधराः, तैः प्रणीता या द्वाद-शाङ्गी, तद्रूपं यत् गणिनः=आचार्यस्य यत् पिटकं, तस्य अन्त्यभाग इति तात्पर्यानुसारी अन्वयोऽत्र समूहनीयः ।

१०९ षडधिकानि नवतिः शतानि यत्रैतादृशानि अष्ट सहस्राणि (८०९६) तद्रूपं मानं येषां, तथा अविचलं यत् मानं पञ्चशतधनुःप्रमाणं, एतादृशा ये महाविदेहक्षेत्रीया ये मातङ्गाः=

१५

हस्तयः=तेषां मानेन शरीरभारप्रमाणेन मिता या मषी=लेखनोपयोगी श्यामदर्णिका, तस्या या माला,तेन लेख्यः=लिखितुं शक्यः वाच्योऽर्थः यस्येति तात्पर्यानुसारिप्रज्ञयोहनीयम् ।

एतेन हि पदेन परमपवित्रात्मविशुद्धिकरणप्रत्यल–जीवमात्रवैरविरोधक्षमापनाऽनन्याऽसाधारणपर्वाधिराजरुपश्रीं**पर्युषणाकल्पाऽपरपर्याय–श्रुतोत्तंसश्रीकल्पसूत्रसुबोधिका**वृत्तौ प्रथम व्याख्याने श्रीपर्युषणाकल्पाऽद्वितीयमहिमव्यावर्णनप्रसङ्गे **श्रीमद्भिः विनयविजयोपाध्यायपादैः चतुर्दशपूर्वाणां यथोत्तरं एकस्य** द्विगुणवृद्धया सर्वाग्रेण षण्णवत्यधिशताधिकाष्टसहस्र**महाविदेह**क्षेत्रीयपञ्चशतधनुरुच्चमितहस्तिप्रमितमषीपुञ्जविलेख्यत्वं यत् प्रतिपादितमस्ति, तस्य स्मारणं विहितमस्ति **पूज्याऽऽगमोद्धारकाचार्यपादैः** ।

११०. श्रीमान् अपश्चिमः=चरमः यः पारगतः=तीर्थकृत् **श्रीमहावीरवर्धमानस्वामी**, तेषां परमा **चोत्कृष्टा च** या सिद्धिरुपा, तस्या अधिगतिः=प्राप्तिः, ततः समतिक्रान्तं यत् शतकद्वयं **वर्ष**-शतद्वयरुपमिति ।

१११. समस्ताश्च ते समग्रवेदिनः=सम्पूर्णज्ञानिनः, तेषां ये ईशानाः=स्वामिनः, तीर्थकरा इत्यर्थः तेषां वृत्तानि=चरित्राणि, तेषामित्येकोंऽशः ।

शासनस्य अपरा=न यस्मात् परा=उत्कृष्टा वर्त्तते एतादृशी या गुरूणां=गणधरादि गुरुवर्याणां परम्परा सैव, पद्मं=कमलं, तस्याऽवबोधे पद्मबान्धवः=सूर्यः, तत्समो यो विचार इत्यग्रे सम्बन्धः, इति द्वितीयोंऽशः ।

अखिलानि यानि खिलानि=दोषाऽऽसेवनरूपाणि, ताभ्यः जायमाना याः स्खलनाः तासां "**विशोधित**" इति पदमध्याहार्यमत्रार्थानुसन्धानबलतोऽनुल्लिखितमपि ।

विशोधितः अवाप्यं यत् असाधारणं=विशिष्टं अनूनं=सम्पूर्णं यत् शर्म=सुखं, तस्या-श्रयभूतो यो निःश्रेयसः=मोक्षः, तस्य साधनाय समर्था या सामाचारी तस्याः, इति तृतीयोंऽशः ।

एवं च—

समस्तसमग्रवेदीशानवृत्तस्य—

शासनाऽपरगुरूपरम्परापद्मावबोधपद्मबान्धवस्य—

अखिलखिलस्खलना(विशोधि)ऽवाप्याऽसाधारणाऽनूनशर्माऽऽश्रय

निःश्रेयससाधनसमर्थसामाचार्याश्च—

यो विचारः,

तस्मै विस्तृतविभवा=माहात्म्यवती या अनल्पप्रतिष्ठा, तस्यै कल्पः=समर्थः=तस्मिन् ।

एतद्धि प्राक्तने **'श्रीमति कल्पे'** इति पदसूच्य**श्रीकल्पसूत्रस्य** विशेषणं विज्ञेयम् ।

११२. सुराणां असुराणां यः विसरः=समूहः, तत्कृता या परिचर्या=पूजाख्यातिः, तदवसरे संसृष्टः=सम्यक्प्रकारेण व्याप्तः शिरसां शेखराणां=मुकुटानां खरतरा=विशिष्टदीप्तिमन्तो ये मयूखाः=किरणानि, तेषां या माला=श्रेणिः, तस्या सङ्गः=दीपनरूपः=येषुदी इति तात्पर्यानुसारिणी व्युत्पत्तिरत्रावबोध्या ।

११३. प्रवचनस्य=आवश्यकादेरागमस्य या वृत्तिः=टीका, तस्याः विधानं=विरचनं, तेनाऽवाप्तः अवतारः यस्याः, एतादृशी या कीर्तिरूपा नटी, तया नाटितः=शिरोधूननाऽऽदिना नाकनाथः=इंद्रः यैरिति ।

११४. इतिहासस्य=पुरातनवृत्तस्य साधनैः=साक्षीरूपतत्कालीनोल्लेखादिभिः शून्यो योऽनेहाः=कालः अतिप्राचीनः इत्यर्थः, तदर्थं साधितानि=सज्जीकृतानि विविधग्रन्थाऽऽलोडनोत्प्रेक्षणादिभिः साधनानि=तत्कालीनघटनाप्रमाणीकारे समर्थानि यैरिति व्युत्पत्तिः ।

११५. धूतः=दूरीकृतः एनसां=पापानां भरो यैरिति ।

११६. प्रादुर्भाविका=एतत्ग्रन्थप्रकाशिका या गोष्ठी संसत्=श्री **जैनधर्मप्रसारकाऽऽख्या**, तस्याः सम्मत्येति ।

११७. ऊनो योऽर्थः, तस्य पूरणं पूर्वस्मिन् यत्रैतादृशं यत् परिकथनं, तस्य प्रार्थनायां पर इति ।

११८. अखिला ये भव्यजनाः, तेषां निःशेषानां=समस्तानां प्रयोजनानाम् उपनिषद्भूता=मूलाधार-स्वरूपा तामिति ।

११९. लोके ख्याता ख्यातिः यस्याः, एतादृशी चासौ श्रीमती अकलंका=विशुद्धा या कलना केवल-ज्ञानाऽवभासरूपा, तयाऽवगतः त्रिजगतीगतः चराऽचरपदार्थानां प्रकरः=समूहः यैरेतादृशाः ये श्रीमन्तः जिनवरेन्द्राः, तेषां या उदितयः=वचनानि, तैः उदितः=प्रकटीभूतः अनूनस्य=सम्पूर्णस्य रत्नत्रयस्य सम्यग्दर्शनादेः असमः=असाधारणः यः प्रभावः=कर्मध्वंसिसामर्थ्यरूपः, तेन भावितः अन्तरात्मा यस्येति व्युत्पत्तिः ।

१२०. उदन्वत्=सागरः स अन्ते यस्या एतादृशी अभिधा=नाम विद्यते यस्येति ।

अत्र "भीमो भीमसेन" इतिन्यायात् 'आनन्दः' इति अध्याहारगम्यमनन्यसाधारण-निरभिमानितागुणव्यसनित्वं पूज्याऽऽगमोद्धारकश्रीणा सूचितं दृश्यते ।

१२१. अशुद्धिरूपं यद् आगः=अपराधरूपं तेन जातं यद् एनः=पापं, तस्यापनयने=दूरीकरणे प्रभु=समर्थम्, तथा प्रभूणां=पूजार्हाणां उत्तमः=श्रेष्ठः तीर्थकृदिति यावत् तैरुपदिष्टम् चेति ।

१२२. सुराणां पालयः=श्रेणयः, तासां ये शिरोरत्नानि=शिरःस्थमुकुटरत्नानि, तैः द्योति क्रमयुगं=चरणद्वन्द्वं यस्य तस्मै ।

१२३. शान्तेः=स्वास्थ्यरूपायाः निशान्तः=गृहं तद्रूपः अयं ग्रन्थ इति ।

१२४. याम्या=संयमयोग्या अर्हणा=पूजा आयतौ=भाविनि काले येनेति तात्पर्यानुगामी विग्रहो-ऽत्रावबोध्यः ।

१२५. निः=निःशेषेन नाशितम्=ध्वस्तम् अशेषं च तत् अशिवं येनेति ।

१२६. शत्रूणां समूहः शात्रवः, अन्तितः=विनाशितः शात्रवः येन तस्मिन्निति ।

१२७. मृगग्रामे=मीयागाम इति प्रसिद्धे ।

१२८. ग्रन्थस्य='देवो देवदत्त' इति न्यायेन प्रस्तुतकर्मग्रन्थस्य, उद्घातः=उपोद्घातः प्रस्तावनारूप इति ।

१२९. मुद्=आनन्दः स चासौ अब्धिः=**आनंदसागरः** तेनेति ।

श्री आगमोद्धारकाऽऽलेखित-प्रस्तावनासंग्रहरूपे

# श्रीआनन्द रत्नाकरे

## एकादशमं रत्नं

### श्रीपंचाशकग्रन्थ-

### प्रस्तावना

वन्दनव्रजो विस्तरतुतरां श्रीवीतरागेभ्योऽनवरतरम् ।

विदाङ्कुर्वन्तु [१]विदिताऽनवद्यविद्यावर्या! एतद् यदुत श्रीमद्भि[२]रिन्द्रादिश्रेणिमौलिनम्र-क्रमकमलैर्जिनेन्द्रै[३]र्जगज्जन्तुजातजीवातुदेशनावितरणवित्तैर्विस्तारितेऽनाबाधेऽमर्त्य नरनायकनिकरनिषेवणीये आगमाकरे यावद्देवर्द्धिगणिक्षमाश्रमणान् [४]क्षमाभूषितधर्मकायचणान[५]-पूर्वाऽपूर्ववस्तुव्रातविकसनविभाकरप्रभाणि पूर्वाण्यवेविद्यन्त वेद्यमानानि ।

न च [६]ततस्तादृश उपयोगस्तदानींतनानां प्रकरणादिभ्यः; परम् उपलभ्य तद्विनाशम[७] विनश्वरपथकाङ्क्षिभिरनेकैः कृतानि [८]तथाविधपटुतमबोधलोचनै[९]रपूर्वाऽर्थधारणक्षममनीषाशीलितैःप्रकरणानि ।

तत्र च भगवन्तः [१०]शुभवन्तः श्रीमद्हरिभद्रसूरिपादाः [११]कुशाग्रमतिमत्तामादधाना विशेषतस्तानि सव्याख्याकानि सूत्राणां व्याख्यानानि च [१२]दुर्गमदुर्गपद्यावत्सुखारोहाणि निरुपयामासुः [१३]श्रीमदविरुद्धहितकृदुपदेशदेशनदक्षजिनागमे ।

पूज्याश्च प्राक् तावद्[१४]व्यासाऽऽदिप्रणीतप्रणालिकाऽऽपूरितहृदयाः प्रतिज्ञातपूर्विणो यदुत–"नाऽवधातुं शक्नोमि यदुक्तं पद्यादिकमर्थं, तस्य भवाम्यन्ते[१५]वासिता-परिकरित" इति ।

तदेवं गते च कियत्यप्यनेहसि [१६]पवित्राचाराचरणप्राप्तार्यात्वार्यामुखकजान्निःसरत् "[१७]दो चक्की चक्की केसव" इत्याद्यावश्यकनिर्युक्तिगतं वाक्यमवाततार श्रुतिपथं ।

न चाऽवबुबुधे तैस्तदर्थो लेशेनापि, अवाप्तस्थैर्या न्यारिथषत च तेन पूज्या [१८]आर्याऽऽलयाऽङ्गणे, द्विस्त्रि[१९]रवधारितेऽपि नाऽवधारितमेव तद्वाच्यमिति विहाय [२०]विवेकविलोचनलोपनबद्धलक्ष्यं मानं [२१]आपेतुः पार्श्वे तस्या आर्यायाः, [२२]तत्त्वान्वेषित्वाऽनुकूलभावतया [२३]व्यनंसिषत ताः, अपृच्छिषत च-"का भवतीषु भणति [२४]भट्टपुङ्गवाऽबोधनीयं बोध्यमेतत्, किं च तदिति"।

तदा च [२४]यथार्थाऽऽख्यानख्यातख्यातय आर्याः [२५]स्वमहत्तरां निरदिक्षन् याकिन्याख्यां। सा च [२६]तामार्यां पठितपूर्विणी, (अतःसाऽऽर्या [२७]भट्टपुङ्गवनोदनयाऽपाठितयाऽपि) तथापि नाऽबोधि [२८]प्रकरणाऽऽदिबोधबोध्या सा, तथैव द्विस्त्रिरप्युद्घोषितायां नाऽवजग्मुर्गन्धमपि तस्या आर्योदिताया आर्याया वाच्यस्य।

तथा च "सत्यप्रतिज्ञा व्यवहारा" इति सत्यापयन्तो वादे त्रिरुच्चरिते न बुध्यते चेदापनीपद्यते निग्रहस्थानेन न्यक्कृतिमिति यथार्थतया वेविद्यमानाः स्वीयां प्रादुश्चक्रुः प्रतिज्ञां, व्यजिज्ञपँश्च तदर्थशुश्रूषामन्तःकरणकृतनिवासां, न्यबोधिषत तदर्थमप्यार्यया [२९]परार्थकरणधृतकायया, निभाल्य तादृगाचारविचारं [३०]स्वान्तरागरक्ता ययाचिरे व्रतं [३१]व्रतधनपतिप्रवर्तितं। पठितश्च परमविनीततया तयाऽ[३२]धिकारोऽत्राऽकलङ्कश्रीमज्जिनभट्ट (ट) सूरिसंज्ञकाऽऽचार्यप्रवराणां। [३३]जाताऽभिलाषाऽतिरेका याता[३४]स्तदीयाऽऽवासाऽलङ्कृत[३५]मावसथं। जाते च विशेषनिर्णये जगृहुः [३६]परस्परविरोधाऽनवरूद्धं [३७]पश्वादिप्राणिगणरक्षणचणं [३८]यथार्थपदार्थसार्थसाधकं [३९]अत्राऽमुत्राऽनेकाऽर्थितप्रेप्सापदानपटुताप्राप्तसुपर्वपृथ्वीरुहप्रसिद्धिकं सदाचारमयं [४०]यथावादकरणलब्धकीर्तिकन्यावरणवरस्वयंवरस्रजं [४१]गुरुक्रमसेवनासकलितमूर्तिं [४२]गर्हणाकणविसकलितं [४३]देवादितत्त्वत्रितययाथार्थ्यावधारणामूलं [४४]सावद्ययोगजातोज्झनसंकल्पं [४५]महाव्रतधर्माग्र्यम्।

अवाप्तबोधाश्च ग्रन्थकरणे सस्मरुः के प्रभुपादास्तामेव बोधदात्रीं [४६]मिथ्यात्वोच्चाटनशाकिनीं श्रीयाकिनीं सर्वत्र "धर्मतो याकिनीमहत्तरासूनुः" इति [४७]स्वान्तध्वान्तविध्वंसविभाकरस्मृतिकरणपटुना पठनेन।

विहिताश्च विश्वपूज्यपादैः श्रीमद्भिरनेकाः (के) [४८]सूक्ष्मा [४९]विततश्च ग्रन्थाः, मुद्रितपूर्वा अप्यनेकाः, परं प्रस्तुतं प्रकरणं विशेषत उपयुक्ततरमपि [५०]अनगारेतरव्यवहारवेदकतया न केनचिदपि मुद्रितमित्यारब्धमस्य मुद्रणं श्रेष्ठिसौभाग्यचन्द्रस्य कर्पूरचन्द्रात्मजस्य प्रेरणया तदीयमातुर्वीरुबाईनाम्न्या वित्तेन पोरबंदरस्थपरमानन्दस्य करसनात्मजस्यवित्तेन [५१]चानन्दगणपतिप्रदापितया[५२]।

मूलतो वृत्ततो वाऽप्य[५३]नुन्मुद्रितस्य मुद्रणे [५४]साधीयसीं [५५]साधनतां साधयामासुः [५६]संसदध्यापका ज्येष्ठारामाऽभिधानाः [५७]शास्त्रविद्वर्या [५८]आदर्शकरण-मुद्रणान्वीक्षणशोधनादिभिर्बहुतरैः प्रकारैः।

अनेकाः साधवस्तु [५९]दत्तपूर्विण एव साहाय्यमस्या एवंविधेषु विविधं प्रवितरन्ति, विश्राणितं च प्रकृतेऽपि [६०]प्रकरणमुद्रितकरणकार्ये साहाय्यमसाधारणं तैः, किन्तु [६१]प्रभाकरप्रभावितानसाधनवर्णनमिव प्रसिद्धत्वान्नाऽतिशयावहमिदमेषामिति न तत्राऽऽयासोऽणीयानपि, न च ते तदनाप्तितो[६२]ऽनाप्तभावनानेदीयस्तां [६३]दवेयुः कणशोऽपि कल्पितां।

प्रकरणे च प्रारब्धे प्रेक्ष्यमाणैकोनविंशतिमकरणव्रातमपूर्णमिति कश्चित्, तन्न तत्र तस्य विहाय [६४]कल्पनाकोविदतां विचक्षणाना[६५]मीक्षणीयमाविर्भवति किञ्चित्, यतो [६६]वृद्धव्याख्यानुसार्यनुयोगेऽन्यत्र च न किमपि तादृश[६७]माततं वाक्यादि प्रमाणभूत[६८]मन्वीक्ष्यत [६९]आख्यायते वा। पञ्चाशकाऽऽख्याख्यातिस्तु प्रतिप्रकरणं प्रक्लृप्तानां पञ्चाशतो गाथाना[७०]मविगानेन विज्ञाना[७१]दविगीतैव, अन्यथाऽष्टकानामष्टानामेव वर्णनीयत्वापत्तिः न तु द्वात्रिंशतो दृश्यमानाया यथार्थता, कृतमतिप्रसक्तेन।

विवृतं चेदं विख्यातकीर्तिभिः श्रीमदभयदेव[७२]भावाचार्यपादैः। प्रभूणां सत्ता तु वैक्रमीय एकादशे शतक इति ख्याततरं। न च तेषां गन्धोऽपि खरतरत्वेऽत्राऽन्येष्वपि (च) तद्ग्रन्थेषु वा, न चाऽत्र [७३]तत्प्रस्ताव इत्युपरमामीतः[७४]।

प्रकरणेषु चाऽत्र प्रथमे श्रावकधर्माऽधिकाराऽऽख्ये श्रावकप्रज्ञप्त्यादावुमास्वातिपादैः प्रणीतोऽपि [७४]गम्भीरैदम्पर्ययुतः [७५]सलक्षणश्च लक्षितो धर्मोऽगारिणः।

यद्यपि वृत्तिकृत्पादप्रदर्शितं "सम्यग्दर्शनसंपन्नः षड्विधावश्यकनिरतश्च श्रावकः भवतीति" श्रीउमास्वातीयं वचनवरं नाऽऽयात्युपलब्धिपथं तत्वार्थाऽऽदिषु श्रावकधर्माधिकारेऽन्य[७६]त्राऽपि च, परमनुमीयत एतद्–यदुताऽऽसीत्खलु [७७]संस्कृतव्याहृत्योदाहृता तैः पूज्यैरन्यापि [७८]दृश्यमानप्राकृतभिन्ना श्रावकप्रज्ञप्तिरिति।

द्वितीये जिनदीक्षाऽभिधे सम्यग्धर्मे चित्तस्थापनैव दीक्षा विवृता, धर्माभिलाषुकैः पुनः पुनः प्रेक्षणीयमाचरणीयं चैतदुक्तं, एतदभाव एव धर्मावनत्यादिहेतुरैदंयुगीनानामित्यस्मन्मतिः।

अत्र च यद्यपि न विद्यते गाथाषट्कं पूरकं पञ्चाशतो गाथानां, चतुश्चत्वारिंशत एवोपलम्भात्, परं [७६]व्यवहारेण किञ्चिदूनस्यापि सम्पूर्णताख्यायिना यद्वाऽन्येषां तथात्वा[८१]न्मध्यगस्यातथाभूतस्यापि [८२]तथात्वमिति न पञ्चाशकताक्षतिः ।

**प्रत्याख्यानं** च द्रव्य-भाववन्दना-पूजानन्तरमाख्यायमानैराकाराऽखण्डत्वमनुमोदयद्भिर्दर्शितं बहुमान्यं [८३]पाठाखण्डत्वं ।

**विधाने** च **जिनभवनस्य** व्याख्याते सप्तमे यदुक्तं "**पेच्छिस्सं इत्थमहं, वंदणगणिमित्तमागए साहू**" इति दर्शयद्भिश्चैत्यवासिताऽनगाराणां समूलकाषं कषिता[८४]ऽन्यत्रापि प्रतिपादितं चैवमेव पूज्यैः " [८५]**देयं तु न यतिभ्यः**" इत्यनघवाक्येन ।

यत्तु "**तिष्ठन्ति ते यथा तथा कार्यं**" इति प्रोचिरे भगवन्तस्तत्तु जिनाऽऽगमव्याख्यानायाऽवस्थानाऽऽज्ञामूलकं, अत एव "**चेइहरागम-सवणं**" इति । श्रावकाऽहोरात्रविधौ विहितं विधिरसिकं ।

**यात्रापञ्चाशके** स्पष्टमाख्यातं श्रीमहावीप्रभोः कल्याणकपञ्चकं, अवधार्य चैतत्सूत्रकृच्छ्रीमद्धरिभद्रसूरीणां वृत्तिकृतां च श्रीमदभयदेवसूरीणां भीरुता चेदाशातनायास्त्याज्यः षट्कल्याणककदाग्रह[८६]स्तद्रसिकैः, तीर्थकराऽऽशातनाप्युत्सूत्रप्ररूपणोत्थै[८७]षमेवापयास्यतीति ध्येयम् ।

कल्पस्वरूपाऽऽख्याने स्पष्टमाख्यातमागमैदम्पर्यविद्भिः पूज्यैः "**तित्थगरऽसंतचेला**" । व्याख्यातं च व्याख्याचणैः-"**तीर्थकरा जिनाः । असच्चेलाः सन्तोऽचेला भवन्ति, शक्रोपनीतदेवदूष्याऽपगमानन्तरमिति**" ।

अवलोक्य चैत[८८]च्छ्रीमत्तीर्थकरवाक्योत्तीर्णवादभीरवो [८९]नैतादृग्वाक्यानुसारिकिरणावलीवाक्यविलोपका भविष्यन्तीति ।

आख्यातं च ख्यातकीर्तिभिरुपस्थापनाविधिं [९०]येऽनुपस्थापनारसिका ये [९१]चाऽपरीक्ष्योपस्थापकाः सर्वे ते सम्यग् निभालयित्वा[९२]ऽऽज्ञास्वरूपं सम्यक् प्रवर्तन्तां, यथा स्याद्यथेप्सितपदलाभः ।

विधिवेदिनो विद्वांसो विलोक्य वाक्यं वीतरागीयं "**अइयारो होउ वा मा वे**" त्याद्यात्मकं[९३] विकल्पकोविदत्वमात्मनोऽपाकृत्य "**स्याच्चेदतिचारः प्रतिक्रमणं, किंम-**

न्यथा तत्करणेनेति ध्यानं वा तावत्कालं विधेयमिति वा " प्रतिक्रमणीयामरुचिं विहास्यन्ति।

अधिकेऽपि गाथाद्वये [९४]सप्तदशे पूर्ववत्पञ्चाशकत्वम् ।

प्रशस्तौ च प्रस्तावितवन्तः पूज्यपादाः परम्परां स्वीयामनर्घां " चन्द्रकुलाऽम्बरस्य " इतिवाक्येन [९५]वित्ततमचन्द्रकुलीनत्वमात्मनां ।

" चतुरधिकविंशतियुते वर्षसहस्रे शते च सिद्धेयं " इति विरचनवर्षसङ्ख्या-ऽऽख्याय्याख्यातृभिः ।

न च तत्र खरतरविरुद्गन्धोऽप्यायाति [९६]समयमितमतीनामिति हेय आग्रहः " खरतरास्त " इतिरूपो [९७]निरूपणाचणेन ।

विलोकनीयं तावत्प्रान्ते एतद् यदुत [९८]तादृग्भिरपि संस्कारितेयं श्रीमद्द्रोणाचार्यपादैः युक्तमेवेदं तादृशां भवभ्रान्तिभीरूणां भगवतां ।

प्रमाणं च वृत्तेरस्याः सार्धसप्ताऽधिकाष्टौ सहस्राणि, मूलं त्वेकोनविंशतिः पञ्चाशता-मित्याद्युपदर्श्या[१००]ऽवलोकनीयाऽर्थलेशानर्थयेऽन्ते प्रस्तुतोपोद्घातस्य यत्[१०१]परिशिष्टं [१०२]श्रीमत्पूज्यपादोद्भवकालादि योगदृष्टिसमुच्चयाछ्रेष्ठि–देवचन्द्रलालभाइज्ञानो-द्धार[१०३]व्यवस्थातो [१०४]निर्मिताज्ज्ञेयं। ज्ञापनीयं चाऽशुद्ध्यादि,यदुपकारपुरस्सरमुपादाय द्वितीयावृत्तौ संस्करिष्य इति [१०५]रत्नगणरोहणश्रीश्रमणसङ्घचरणकजमकरन्दमधुप [१०६]आन-न्दः सकलसत्त्वनिःश्रेयसाकाङ्क्षी ॥

[१०८]कुष्ठामयविध्वंसि–प्रभावविख्यातस्तम्भनः पार्श्वः ।
यत्पावितवांस्तत्रस्थितेन विहितोऽयमारम्भः ॥
वीरात् २४३८ वर्षे वीरनिर्वाणदिवसे लिखितम् ॥

श्रीपूज्यपादागमोद्धारकाऽऽचार्यश्रीलिखितप्रस्तावना-
विषमपदार्थसूचिका

# आनन्दलहरी-टिप्पणी

(श्रीपञ्चाशकग्रन्थप्रस्तावना)

१. विदिता :-प्रख्यातास्च ते अनवद्याभिः-निर्मलाभिः विद्याभिः वर्याः=श्रेष्ठाः, अथवा विदिताः-सुज्ञाताः अनवद्याश्च ताःविद्याःयैस्तेषुवर्या इति तात्पर्यानुसारिणी व्युत्पत्तिरत्र विज्ञेया।

२. इन्द्रादीनां या श्रेणिः, तस्याः या मौल्यः-मुकुटीः, ते च नम्राः-नमनशीला यत्र-एतादृशाः क्रमकमलानिः-चरणकमलानि येषां तैरिति।

३. जगतां ये जन्तवः तेषां जातः-समूहः, तस्मै जीवातुः-जीवनौषधम्, एतादृशी या देशना तस्याः वितरणं-दानं तत्रवित्ताः प्रख्याताः तैरिति।

४. क्षमया भूषितश्चासौ धर्मकायः, तत्र निपुणाः-सदुपयोगादिद्वारा तानिति।

५. अपूर्वाणि च तानि अपूर्वाणि यानि वस्तूनि, तेषां व्रातः, तस्य विकसनं=स्वरूपप्रकाशः, तदर्थं विभाकरः-सूर्यः, स इव प्रभा येषां तानि इति।

६. एतद्वाक्यस्यचान्यवसङ्गतिरत्रैवं विज्ञेया-

"तदानींतनानां प्रकरणादिभ्य तादृश उपयोगः न, ततः"

अर्थात्-तदानींतनानां-पूर्वगतश्रुतसद्भावकाले वर्तमानानां विविधप्रकरणादिग्रन्थानां पठनादितः तादृशः-इदानीन्तनजनानां यथा सुखावबोधादिकं भवति तथा उपयोगः न ततः-न जातः इत्यर्थः।

७. अविनश्वरः-शाश्वतो यः पंथाः-मुक्तिमार्गः तस्य कांक्षिभिः इति-मुमुक्षुभिरिति यावत्।

८. तथाविधः-कालापहानिव्यपेक्षया पटुतमो-अन्यापेक्षया अतिशयेन पटुः-कार्यसमर्थश्चासौ बोधः-ज्ञानं, तदेव लोचनं येषां तैरिति।

९. अपूर्वश्चासौ अर्थश्च, तस्य धारणं-चेतस्यवधारणम्, तत्र क्षमा-समर्था या मनीषा-बुद्धिविशेषः, तस्याः शीलितं येषां तैरिति।

१०. शुभं–परार्थकरणरूपं विद्यते येषां ते इति।

११. कुशस्याग्रतुल्या मतिःयेषां तद्भावमिति।

१२. दुर्गमश्चासौ दुर्गः–वप्रः (किल्लो) तस्य पद्या–सुगमपदपद्धतिस्तद्वदिति।

१३. श्रीमान् अविरुद्धश्चासौ हितकृत् य उपदेशस्तस्य देशने–दाने दक्षः, एतादृशो यो जिनाम-स्तस्मिन् इति।

१४. व्यासादयः ये अन्यतीर्थ्यधर्माचार्याः, तैः प्रणीता या प्रणालिका शास्त्रपद्धतिरुपा, तया आपूरितं हृदयं येषां तैरिति।

१५. अन्तेवासिता–शिष्यत्वं, तया परिकरित इति।

१६. पवित्राश्च ते आचाराश्च, तेषामाचरणेन–आसेवनया प्राप्तम् आर्यात्वम्=श्रेष्ठत्वम् यया, तादृश्या आर्यायाः=साध्व्याः मुखकजात्–वदनकमलादिति।

१७. इयं हि गाथा सम्पूर्णैवं विज्ञेया :-

**"चक्किदुगं, हरिपणगं, चक्कीण केसवो चक्की।**
**केसव चक्की केसव, दुचक्की केसव चक्की य॥"**

१८. आर्यानां–साध्वीनां आलयः–उपाश्रयः, तस्याङ्गणं तस्मिन् इति।

१९. सोपयोगमवबोधार्थं प्रयतितेऽपीति।

२०. विवेकरूपं यत् विलोचनं–विशिष्टनेत्रं, तस्य लोचने बद्धं लक्ष्यं येनेति।

२१. आङ्पूर्वक'यत्' धातोः परोक्षारूपमिदम्।

एतेन च प्रयोगेणैवमत्र ध्वन्यते यत् यथा हि पतनं न स्वेच्छापूर्वकम्, तथाऽत्रहार्दिक्या अपि प्रतिज्ञाया महत्त्वमुररीकुर्वाणा पूज्यपादाः आन्तरिकभावुकत्वविवशीभूताः मानहानिमपि अविगणय्यैव प्रेर्यमाणा इव कयाऽप्यान्तरशक्त्या साध्वीनिकटं जग्मुरिति सूच्यते।

२२. 'वि'पूर्वम् 'नम्' धातोरद्यतन्यामात्मनेपदरुपमिदम्। आत्मनेपदप्रयोगेणैतस्य नमस्कारस्य स्वारसिकत्वं सूच्यते।

२३. भद्राः—विद्वांसः, तेषु पुंगवाः—श्रेष्ठाःभवादृशाः तैःन बुध्येतैतादृशमिति विग्रहः। अत्र 'भद्पुङ्गव' पदप्रयोगः मार्मिककाकुगर्भो विज्ञेयः ।

२४. यथार्थस्य–यथाऽवस्थितस्य आख्यानं–निरुपणं, तेन ख्याता–विदिता ख्यातिः—आर्यात्व-रूपा यासां ता इति ।

२५. स्वस्य संयमवालिकां नाविनां गुरुपदस्थितां प्रवत्तिनी मित्यर्थः ।

२६. आर्याछन्दसि निबद्धां तां गाथामित्यर्थः ।

२७. भद्दपुङ्गवस्य–विद्वद्श्रेष्ठस्य तस्य हरिभद्रपुरोहितस्य नोदनया–प्रेरणयेति ।

२८. प्रकरणाऽऽदीनां- तद्गाथाख्यावर्णितवस्तुनिरूपकलघुग्रन्थविशेषानां बोधेन–परिज्ञानेन बोध्या इति ।

२९. परेषां अर्थः—उपकृतिरुपः, तस्य करणं, तस्मै धृतःकायःययेति ।

३०. स्वस्यान्तः—चिह्नं, तत्रस्थरागेन–हार्दिकप्रेम्णा रक्ता इति, याथार्थ्येनान्तरपरावृत्तितः मौलिकप्रीतिवन्त इति ।

३१. व्रतानि–महाव्रतानि अणुव्रतानि च, तान्येव धनं, तस्य पतिः तीर्थकृत्, तेन प्रवर्त्तितमिति ।

३२. दीक्षाप्रदानादिस्वरुप इति परिशेषः ।

३३. जातः अभिलाषायाः—संयमग्रहणस्वरुपाया अतिरेकःयेषामिति ।

३४. तेषां–श्रीजिनभटसूरीणां सम्बन्धी च आवासः-वसनं, तेनालङ्कृतम्—शोभितमिति ।

३५. उपाश्रयमिति ।

३६. परस्परं विरोधेन–वदतोव्याघातादिरूपेण अनवरुद्धं—अव्याप्तमिति ।

३७. पशुपदमत्रोपलक्षणेन प्राणिमात्रगमकं विज्ञेयम् । ततश्च समस्तप्राणिगणस्य रक्षणे निपुणमिति ।

३८. यथार्थाः ये पदार्थाः, तेषां यः सार्थः, तस्य साधकमिति ।

३९. अत्र=इहलोके अमुत्र=परलोके अनेकेषां अर्थितानां=इच्छाविषयीभूतानां प्रेप्सा=प्रकर्षेण लब्धुमिच्छा, तस्य प्रदाने पटुतया=कुशलतया प्राप्ता सुपर्वणां=देवानां पृथ्वीरुहस्य=कल्पवृक्षस्य प्रसिद्धिर्येनेति ।

४०. यथा वादः=कथनं तथा करणं=सक्रियत्वं, एतेन लब्धा या कीर्तिरूपाया कन्याया वरणे वरा स्वयंवरस्रक् येनेति ।

४१. गुरूणां=दीक्षादातॄणां क्रमयोः=चरणयोः सेवनया आसकलिता मूर्तिः यस्य तमिति ।

४२. गर्हणा=निंदा अर्थात् निन्दास्पदत्वम् तस्याः कणेनाऽपि विसकलितं=विरहितमिति ।

४३. देवादीनि यानि तत्त्वानि, तेषां त्रितयस्य याथार्थ्यस्य=सत्यस्वरूपस्य अवधारणा=निश्चयस्तदेव मूलं यस्येति ।

४४. सावधानां=आज्ञाविरुद्धानां योगानां=प्रवृत्तीनां जातः उज्झनस्य=त्यागस्य संकल्पः यत्र तमिति ।

४५. महान्ति च=सर्वविरतिरूपाणि तानि व्रतानि=हिंसाविरमणादीनि, तान्येव धर्मेषु=ज्ञानिनिर्दिष्टेषु विविधप्रकारेषु अग्र्यम्=श्रेष्ठमिति ।

४६. मिथ्यात्वस्य=मोहोदयावेशतः विपरीतासद्ग्राहस्य उच्चाटने शाकिनीरूपामिति ।

४७. स्वान्तस्य=चेतसः यः ध्वान्तः=अज्ञानरूपान्धकारः, तस्य विध्वंसः=विलयः, तदर्थं विभाकरः= सूर्यः, तस्य स्मृतिकरणे पटु=समर्थं तेनेति ।

४८. सूक्ष्माः=संक्षिप्ताः विवक्षावशादेतादृशपदप्रयोगोऽत्र ।

४९. वितताः=विस्तृताः ।

५०. अनगाराः=साधवः, इतरे च=गृहस्थाः, तेषां व्यवहारस्य वेदकः=ज्ञापकः, तद्भावस्तत्ता तयेति ।

५१. "आनन्दगणपति" पदेन पूज्यागमोद्धारकाचार्यप्रवरेण निजनामसूचनं विहितमस्त्यत्र ।

५२. 'प्रदापितये' त्यस्य प्राक्तनेन 'प्रेरणये'—त्यनेन सह सम्बन्धो विज्ञेयः ।

५३. न उत्=उत्कर्षेण मुद्रितः=प्रकाशं नीत इति, तस्य ।

५४. श्रेष्ठामित्यर्थः ।

५५. सहायतादानरूपामित्यर्थः ।

५६. 'संसत्' पदेनाऽत्र भावनगरीयश्रीजैनधर्मप्रसारकसभा सूचिताऽत्र ।

५७. शास्त्राणि ये विदन्ति, तेषु वर्याः=श्रेष्ठा इति ।

५८. आदर्शस्य=मुद्रणयोग्यस्य लेखस्य करणम्=विधानं, मुद्रणं=मुद्रायन्त्रे दानं, अन्वीक्षणं=सम्यक् ध्यानपूर्वं शुद्धि–स्वच्छतादिनिभालनं, शोधनं=मुद्रणपत्रादीनामित्येवमादिभिरिति ।

५९. पूर्वं दत्तवन्त इति यावत् ।

६०. प्रकरणस्य=प्रस्तुतग्रन्थस्य मुद्रितकरणं=प्रकाशकरणं तद्रूपे कार्ये ।

६१. प्रभाकरः=सूर्यः, तस्य प्रभा=कान्तिसमूहः, तस्य साधनस्य=सम्पादनस्य वर्णनम् इति ।

६२. न आप्तं=अनाप्तं, एतादृशी या भावना, तस्याः नेदीयस्ता=समीपता तामिति ।

६३. "द्रु" गतौ इति भौवादिकधातोः सप्तमी (विध्यर्थ) रूपमिदम् ।

६४. कल्पनायां कोविदता=निपुणता, तामिति ।

६५. ईक्षणीयम्=विचारणीयमिति ।

६६. वृद्धानां=पुरातनानामाचार्यविशेषाणां व्याख्याया अनुसारिणि अनुयोगे इति ।

६७. उपन्यस्तमिति ।

६८. दृश्यते इत्यर्थः ।

६९. प्रस्ताव्यते इत्यर्थः ।

७०. त्रुटिरहितमित्यर्थः ।

७१. प्रशस्तेत्यर्थः ।

७२. **भावाचार्य** पदेनाऽत्र **पूज्याभयदेवसूरीणां** प्रकृष्टसाधनानुसारित्वं ध्वन्यते ।

७३. अत्र '**तत्**' पदेन खरतरचर्यापरामर्शः ।

७४. गम्भीरं=स्थूलधियाऽनवगम्यं च तत् ऐदम्पर्यं=रहस्यं तेन युतः इति ।

७५. लक्षणं=स्वरूपाख्यानं, तेन सहित इति ।

७६. श्रावकधर्मनिरुपकेषु अन्येषु ग्रन्थेष्वित्यर्थः ।

७७. संस्कृतभाषानिबद्धोद्धरणेनेत्यर्थः ।

७८. इदानीमुपलभ्यमानप्राकृतभाषानिबद्ध "श्रावकप्रज्ञप्ति" ग्रंथतः भिन्नेत्यर्थः ।

७९. शिष्टजनसम्मतेन लोकप्रचलितेनेति शेषः ।

८०. द्वितीयपञ्चाशकभिन्नानामित्यर्थः ।

८१. द्वितीयस्येत्यर्थः

८२. पञ्चाशकपदवाच्यत्वमिति ।

८३. सूत्रपाठे कुत्रचित् कतिपयानां पदानां प्रसंगविशेषेऽनुपयोगित्वेन प्रतीयमानानामिति सतां पाठस्याऽखण्डत्व व्यवस्था गीतार्थमान्येति भावः ।

८४. षोडशकादिषु ग्रन्थेषु ।

८५. "देयं तु न यतिभ्यः" इति हि पदं श्रीषोडशकप्रकरणीय—षष्ठषोडशकस्य

पंचदशम गाथायाः समस्ति—

८६. 'तत्' पदेन षट्कल्याणकवादपरामर्शः ।

८७. षट्कल्याणकाग्रहपरित्यजनेनैवेति ।

८८. श्रीमन्तो ये तीर्थकराः तेषां वाक्येभ्यः उत्तीर्णः=उत्सूत्ररूपः तस्य वादे भीरव इति । उत्सूत्रभाषणभयशीला इत्यर्थः ।

८९. 'एतादृक्' पदेनाऽत्र पञ्चाशकव्यावर्णितऽचेलकत्वनिर्देशः, एतादृक् वाक्यं अनुसरति यत् एतादृशं यत् किरणावली=पूज्योपाध्यायधर्मसागरगणिपुङ्गवग्रथिता श्रीकल्पसूत्रटीका तस्याः वाक्यं=कल्पदशकव्यावर्णनप्रसङ्गे **आचेलक्य** रूप प्रथमकल्पविवृत्यवसरे प्रदर्शितं तीर्थंकराणां चेलासत्त्वरूपं, तस्य विलोपकाः=खण्डयितारः ।

अर्थात् श्रीमद्भिर्विनयविजयोपाध्यायैः सुबोधिकावृत्तौ चिखण्डितं पूज्योपाध्यायधर्मावतारगणिवरग्रथितकिरणावलीवाक्यमाचेलक्यसम्बन्धि उल्लिख्य छाद्मस्थ्यप्रयुक्तानाभोग मतिधारणान्तरं प्रदर्शितमस्ति ।

एतद्धि न चारू, बोधवैचित्र्यादिकमत्रहेतुरिति प्रदर्श्यते अत्रागमोद्धारकबहुश्रुतगीतार्थोत्तंसैरिति ।

९०. उपस्थापना=वृद्धदीक्षा-महाव्रतारोपणं वा, तत्र ये न रसिकाः=स्वारस्यमूलकप्रवृत्तिमन्त इति ।

९१. शास्त्रामर्यादया यथोचितषड्जीवनिकाययतना-ज्ञानपरिणतिसमीक्षादिस्वरूपपरीक्षामकृत्वेत्यर्थः ।

९२. आज्ञा=गीतार्थनिश्रया ज्ञानपरिणतिसमीक्षास्वरूपा, तस्याः स्वरूपमिति ।

९३. एतत्पदस्य प्राक्तनेन '**विलोक्य**'-त्यनेन सह सम्बन्धः ।

९४. सप्तदशतमे हि पञ्चाशके इत्यर्थः ।

९५. प्रसिद्धतमेत्यर्थः ।

९६. समयः=जिनागमः तेन मिता=प्रमाणोपेता व्यवस्थितेति यावत्-मतिः येषामित्यर्थः ।

९७. निरूपणायां=प्रतिपादनायां चणः=निपुणः तेनेति ।

९८. प्रवरप्रावचनिकधुरंधरैः समर्थैरागमपारगामिभिरिति यावत् ।

९९. स्वकृतविवरणग्रन्थमन्यसुविहितसूरिपार्श्वे संशोधनार्थं दानरूपमित्यर्थः ।

१००. अवलोकनीयाश्च=आन्तरेण विवेकचक्षुषा ते अर्थलेशाः=पदार्थविशेषाः, तानिति ।

१०१. अवशिष्टमित्यर्थः ।

१०२. श्रीमतां पूज्यपादानाम् उद्भवः=जन्म तस्य कालादि ।

१०३. एतद्धि पदं इदानीन्तनभाषायां '**फंड**' पदवाच्यगमकमिति ।

१०४. 'निर्मित'पदं ह्यत्र प्रकाशिकाऽर्थपदकं विज्ञेयम् ।

१०५. रत्नानां गणः=समूहः तदर्थं यो रोहणगिरिः=रत्नखानिमान् पर्वतः, तद्रूपो यः श्री श्रमणप्रधानः सङ्घस्तस्य चरणरूपौ यौ कजौ तयोः मकरन्दस्य मधुपः=भ्रमर इति ।

१०६. एतेन संक्षिप्तेन पदेन सम्पादकेन स्वनाम सूचितमस्त्यत्र ।
तद्धि श्रीआनन्दसागरगणिरूपमत्र विज्ञेयम् ।

१०७. कुष्ठरूपो य आमयः, श्रीअभयदेवसूरीशतनुसम्बन्धी, तस्य विध्वंसी=विनाशकारी यः प्रभावः=अतिशयविशेषः, तेन विख्यातः=प्रसिद्धिमाप्तः, एतादृशः यः श्रीस्तम्भनाख्यः इति ।

१०८. '**यत्**' पदेन **श्रीस्तम्भनतीर्थ**संज्ञया प्रख्यातं **खंभात**नामकं पुरमत्र विवक्षितमस्ति ।

श्री आगमोद्धारकाऽऽलेखित–प्रस्तावना–संग्रहरूपे

# श्रीआनन्दरत्नाकरे

## द्वादशमं रत्नं

### श्रीकर्मप्रकृत्युपोद्घातः

॥ प्रपोस्फुरीतु प्रणतिप्रवाहः पारमैश्वर्यमयपरमेश्वरपादयोः ॥

[१]जगति [२]तावद् विज्ञानविषये [३]वर्गो विदुषां [४]वर्तनावर्तनीमवतीर्णो [५]विश्वोऽपि [६]प्राणभृद्वारोऽहमहमिकापुरस्सरं प्रवृत्तिमाद्रियमाणो विद्यत इति विदाङ्करोति ।

न चाऽस्ति [७]साध्यता प्रतिप्राणि [८]प्रसिद्धपूर्वेषु प्राणिषु [९]स्व–स्वविषयकसुखिदुःखित्वाऽनेकविषयविषयकै–ककर्तृत्वभू–तविलक्षणविज्ञानवत्त्व – दृश्यमानभूतसंहतिकारित्वादिभिः [१०]कणशोऽपि [११]जीवाऽस्तित्वाऽभ्युपगमाऽवाप्तसार्थाऽऽस्तिकसंज्ञान् [१२] ससंज्ञानानभि, यद्यप्यपजानीत [१३]एव कश्चित्पारमार्थिकीं जीवसत्तां केवलमुररीकृत्य ब्रह्माऽद्वितीयतां दरीदृश्यमानविचित्रभूतवृत्तिसनाथां [१५] कश्चिदास्तिकाभिधानावहः, [१६]तिरस्करोति [१७] च लोकायितैरप्यतिरस्कृतमाबालगोपालाङ्गनाजनसिद्धं [१९] [२०]व्यवहारैकमूलमध्यक्षं, तथाऽपि वेविद्यत एव [२१]व्यावहारिकी [२२]वर्ण्यमानाऽभिप्रेयमाणा च जीवास्तिता [२४]तर्कैरिति [२५]नाऽर्थोऽमीभिर्विदुषां विवादेनास्तित्वेऽसुमतां, तद्वदेव प्रतिप्राणि सुख–दुःखादिवैचित्र्यस्य तात्त्विकस्योपलम्भान्न [२७]बोभूयते [२८]कश्चिदिष्टेष्टाऽविरुद्धपरमार्थाभिधायिन्याप्तागमे " पुढो सत्ता पुढो कम्मा " इति [२९]वर्णनचणे विप्रतिपन्नः, [३०]भवेदितरथा प्रतिप्राणि प्रसिद्धस्य सुख–दुःखव्यवहारस्य, प्रचुराऽनर्थनिबन्धनाऽज्ञानस्य, समस्ताऽर्थसाधनसमर्थज्ञानस्य, विविधोपदेश्योपदेशकभावस्य, विविधगतिभ्रमणभोग्य–सुकृत–दुरितावलेः सर्वथा समुच्छेदसंपत्तिः । अस्ति च [३१]तुल्यसाधनानां फले विशेषात् सुख–दुःखवैचित्र्योपलब्धेः, [३२]अविषमकारणस्य कार्यवैचित्र्यस्याऽकारणत्वप्रसङ्गात् [३३]गर्भावताराद्यसमयवैचित्र्यनिबन्धनस्य [३४]तत्करणकाल(फलप्राप्ति) तदुभयाऽभिसंधायकवस्तुविशेष(स्य) [३५]सद्भावसिद्धेः स्वीकार्यमवश्यं [३६]शुभाऽ-

शुभोभयभेदमदृष्टं । एतावति च [४०]साधने विद्यमानेऽपि येऽपलपन्त्यात्मनामदृष्टस्य च सत्तां ते कीदृश इत्यालोचनीयं स्वयं विविक्तसदसन्मार्गैः सद्भिः । अदृष्टं चानेकधाऽनेकविध-तत्कार्योपलब्धेः । यद्यप्यन्यैरस्य कल्पिते भिदे शुभाऽशुभे इत्याकलय्य शुभाऽशुभतां [४१]व्यवहार-पथाश्रितां, [४२]भेदा अपि च [४३]व्यवहारानुसारिण एव श्रिता [४४]भूघनगुणघातावगुणवर्ग-विधानसावधानाः, न [४५]त्वात्मतद्गुणघातादिप्रवणा अभ्युपगता निरन्तर [४६]मनुगम्या-त्मीयाभियुक्ततर्ति, तथापि [४७]लोकाऽलोकाऽवलोकनलम्पटकेवलवेदोऽवलोकितसूक्ष्मदूरा-मूर्त-व्यवहितेतरार्थसार्थाः [४८]सर्वविदोऽवगम्य यथायथमात्मनां [४९]वारमा [५०]वृतं [५१]वृन्दं [५२]त-द्गुणानामावारकं [५३]चाऽतत्त्वश्रद्धा–पापाविरमण–क्रोधाद्यन्तराऽरातिवर्ग–स्वान्ताऽऽदि-[५४]व्यापारोर्जितमुर्जस्वलं [५५]अनुकूलेतरसामग्रीसंयोजनसमुद्भाविताकाशाद्यतीतमूर्तिक पदार्थ-निवहातिक्रान्तरूपं कर्मणामष्टकं [५६]रूपपरीतस्वरूपं [५७]यत्नसंपाद्यक्षयं [५८]निर्दिदिक्षुर्दीक्षितेत-रजनेभ्योऽ[६०]शेषकर्मकायकषणकल्पनाकोविदेभ्यः [६१]तस्य बन्धादिस्वरूपं निबबन्धुश्च मालाकरा इव पूज्यपादा [६२]गणधारिण उदीर्णप्राग्भवभव्यभावभूतश्रेयोभावनोद्भावितगणभृत्कर्मोदया-प्तशक्राद्यखिलनाकिनरनिकायासाधारणगणेशितृत्वाः [६४]सुमनस इव [६५]सुमनसः [६६]सुमन-स्त्वापवर्गित्वसाधनसमर्थार्थार्थ्यर्थनीया वाचो [६७]जगदीश्वरास्यनिसृता [६८]भव्यवारहितैक-निहितान्तःकरणाः सूत्रेणेव [६९]निर्युक्तनिरवशेषार्थसमूहसूचनसमर्थेनातिलघीयसोपेतेन [७०]गुणैर्द्वात्रिंशता निपुणतमेन सूत्रेण द्वादशाङ्गीमयेन, गभीरतराश्चातताः पदार्थाः [७१]परमकृपानु-गतहृदयंगमैर्द्वादशेऽङ्गे, सिद्धान्तितं च [७२]सिद्धान्ततत्त्वामृतपानपीवरैः [७३]पीवरभागधेयैर्भग-वद्भिरभियुक्तोत्तमैरङ्गानामेकादशकं [७४] बाल–स्त्री–मन्द–मूर्खाणामतुलोपकारकृतये श्रीमद्भि-[७५]र्गुणगणधुराधरणधौरेयैरुद्धृतं [७६]द्वादशादङ्गादिति ।

हेतुश्चैष एव तथाविधानां गहनतमानां कर्मग्रन्थ–कर्मप्रकृति–पञ्चसङ्ग्रह–सप्ततिका [७७]प्रभृतीनामनन्यस्थानानां [७८]तत एवोद्धारे । न हि [७९]नद्यते व्यवस्थितिरनर्घाणां रत्नानामन्तरा रत्नाकरं । प्रमाणं [८०]चाप्येतदेव, [८१]तस्य सत्तासमीक्षायां [८२]प्रेक्षाचक्षुष्का-[८३]णामनन्यप्रणेयपदार्थप्रपञ्चप्रपञ्चनपटुप्रकरणप्रचयप्रवरसाधनतासिद्धिर्या, [८४]स्पष्टं [८५]चैत-त्पूर्वाणां चतुर्दशानां [८६]चतुर्णां (द्वयोः) [८७]सदावस्थितदिष्टनियतपरिमाणवद्विदेहजसाम-जानां मषीपुञ्जैर्लेख्याद्द्वितीयात्पूर्वात् [८८]पञ्चमाद्विंशतिप्राभृतमानाद्वस्तुनश्चतुर्थात्कर्मप्रकृत्या-ख्यात्प्राभृतात् [८९]आपोद्धारनदीरयो(य)वाहमित्यागमीयगमावगमानां, [९०]निबन्धनं चेदमेव [९१]दृष्टिवादनदीष्णानां [९२]प्रस्तुतप्रकरणोनतापूर्णतननबिज्ञप्तेः [९३]गाथायां षट्पञ्चाशत्तमायां अष्टकरणप्रकरणप्रभृतेः पूर्णतायां, [९४]तदेवमवसितमभिधेयं कर्मणां बन्धादीति ।

न च वाच्यं निष्प्रयोजनमिदमात्मश्रेयोऽर्थिनां, ज्ञान–दर्शन–चारित्राणां [९५]निःश्रेयस-

निदानानामन्यतमस्याऽसिद्धेः, [९७]सज्ज्ञान-चारित्रमूलस्य [९८]सद्दर्शनस्य [९९]तत्त्वार्थश्रद्धानाऽऽत्मकस्यात्म[१००]तद्गुण–तदावरण–तद्धेतु–बन्धनिरोध–नाश–समूलक्षयादीनामनवगमेऽवस्थानासम्भवात् । अत एवोदितमुदितदयानिर्झरैः " दविए दंसणसोही " त्ति ।

[१०२]किं च यावन्नाऽवगतं कर्मणां प्रकृत्यादि उच्छेदश्च मूलतो न तावदवगच्छत्यात्मनो विशुध्धेरपकर्षोत्कर्षौ वृद्ध्यादि च गुणानां । न च विजानाति निरोधोपायं गुणस्थाने [१०४] मोक्षसौधसोपानसन्निभे विधेयं समारोहेण । न चाऽधिगच्छति तात्त्विकं गतिभ्यश्चतसृभ्यो निर्वेदं [१०५]कर्मकण्ठीरवकदर्थनाकलितव्यथाविचिन्तनततं । तदावश्यकमेवाऽध्ययनं [१०६] द्रव्याऽनुयोगाऽनिमेषनदीप्रवाहप्रवर्तनपार्वतीपितृपर्वतप्रभस्यैतादृशस्य प्रकरणस्य । सत्येव च सद्दर्शने स्यादुद्भूतिर्ज्ञान–चरणयुगस्येति ।

" आद्यत्रयमज्ञानमपि, भवति मिथ्यात्वसंयुक्तम् "

" सयऽसयविसेसणाओ, भवहेउजदिच्छिओवलंभाओ ।
णाणफलाभावाओ, मिच्छादिट्ठिस्स अण्णाणं ॥१॥"

" णाऽदंसणिस्स णाणं, णाणेण विणा ण हुंति चरणगुणा " [१०७]इत्याद्यागमाञ्जनव्यक्तविवेकविलोचनतेजसां न कथञ्चनाऽपि विद्यते साध्यतास्पदं । निमित्तं चैतदेवात्र [१०८]प्रथन–विवरण–बोधन–मुद्रणाऽऽदावधेयं धीमद्भिरनन्यत् ।

प्रणेतारश्चैतस्याः प्रकृतायाः कर्मप्रकृत्याः श्रीमन्तः शिवशर्माऽऽचार्यपादाः पूर्वधराः प्रबलतमत्वा [११०]देवैषां प्रामाण्यस्य यत्र [१११]कुहचनापि समारोहति विरोधगन्धोऽपि सूत्रेण प्रचलितेन तदातनेन, तत्र नैवाऽप्रामाणिकतामापादयितुं पार्यते केनचनाऽपीत्यारूढं कार्मग्रन्थिक–सैद्धान्तिकमिति मतद्वयं ।

अद एव च जैनानां [११३]कल्पनाकोविदपदार्थपटीयस्ता नाऽऽगमवाक्यं विरहय्येति प्रामाणिकतानिबन्धनं पूज्यपादानां पूर्वधरत्वस्याऽऽख्यापकं च, [११४]अन्यथा-विधस्य [११५]तथास्पर्धाकोट्यामागमेनारोहाभावादिति ।

परं कदा कतमं च भूषयामासुर्भूमण्डलं भगवत्पादाः ? के च [११६]तादृङ्माहात्म्यभानुविभावनभास्वन्तो गुरव ? इति न निश्चीयतेतरां, [११७]भगवन्महिम्नां दृष्टिवादमूलत्वस्य

च संसिद्धिः मदीयकथनमपेक्ष्य प्रस्तुतात् प्रकरणाज्ज्ञानविषयीकृताद् भाविनी विशेषेणेति [११८]तदेवोपदीक्रियते कृतिभ्यः ।

प्रकरणे चाऽत्र क्रमशो द्व्यधिकशतै (१-२)कादशाधिकशत (११) दशै(१०)[११९]कान्न-नव(८९)त्येकसप्तति(७१) त्रि(३) भिर्गाथानां [१]बन्धन [२]सङ्क्रमो-[३]द्वर्तना-पवर्तनो-[५]दीरणो-पशमना[६]-[८]निधत्ति-[८]निकाचनाख्यैः करणैः उदयः सत्ता च द्वात्रिंशता(३१) सप्त-पञ्चाशता(५७) च सर्वसङ्ख्या च पंचसप्तत्यधिकचतुःशत्या (४७५) गाथाभिः निरूपितव [१२०]सद्भूतवस्तुस्वरूपनिरूपणैकचक्षुष्कैर्भगवद्भिः । उद्वर्त्तना-पवर्तने निधत्ति-निकाचने चाऽत्र संमीलितान्येव सङ्ख्यायामिति [१२१]सङ्ख्येयं [१२२]सङ्ख्यावद्भिः स्वयं, विशेषतोऽ-भिधेयमभिहितमनुक्रमणिकायामस्या इति न तत्राऽऽयासाऽऽरम्भः ।

विवृता चेयं उभयैः पूज्यैर्गीर्वाणवाण्या श्रीमद्भिर्मलयगिरिपादैः [१२३]काशीविबुध-विजयाऽऽवाप्तन्याय-विशारद-प्रचुरग्रन्थग्रथनवितीर्णन्यायाचार्य-पदोभयी--भूषितभूधनैर्महो-पाध्यायैर्यशोविजयगणिभिः, मूलभूता चोभयोर्विवृत्योश्चूर्णिरेव प्राक्तनपूज्यैर्निर्धारित-विशेषनामभिः श्रीमद्धिरिहाचार्यसत्ताकालादपि प्राचीनैर्निर्मिताऽत एव गुणोत्कीर्तनद्वाराऽभ्य-ष्टौषुरत्रारम्भे "अयं गुणश्चूर्णिकृतः समग्रो यदस्मदादिर्वदतीह किंञ्चित्" इत्यादिना ।

सत्स्वप्येवं विवरणत्रिकेषु सुगमत्वात् संस्कृतवाणीविलासप्रियत्वात्सुलभपुस्तकत्वाच्च प्राक्रन्तैषा मुद्रितुं श्रीजैनधर्मप्रसारकसंसत्प्रयासेन श्रेष्ठिश्रीदेवचन्द्र-लालभाई जैनपुस्तकोद्धार-द्रव्यव्ययेन, सम्पूर्णतामगमच्च मुद्रणमस्याः ।

मन्ये [१२४]उपयोगिकार्यव्ययः संसदो द्रम्माणां, आशासे च [१२५]भविष्यति भविष्यति [१२६]विवृतेरन्यस्या अपि विस्तृतेरुन्मुद्रणं । [१२७]परिकलय्यैनां यथावत् कर्मविपाकभीताः [१२८]समाचरन्तु सज्जना ज्ञानपीयूषपूर्णा [१२८]आत्मस्वच्छसाधनसावधाना [१२९]अनाश्रवव्य-वदानासाधारणसाधनाः क्रिया [१३०]यथावदाप्तोदिता इत्यर्थयमान आनन्द उदन्वदन्ताभि-धानः समापयत्येना-मुपक्रान्ति [१३१]गुणगणरत्नरोहणमोक्षमार्गारोहणश्रमणसङ्घचरण-कमलचञ्चरीको वितीर्य [१३२]प्रमादादिदोषोद्भवविरुद्धोच्चारणोद्भूतदुरितरजोदूरणसमीरणं मिथ्यादुष्कृतं [१३३]श्रीसार्वादिसाक्षिकम् ।

९ ९ ९ १
प्रतिपद्यसिते पक्षे फाल्गुनिकेऽङ्करसाङ्कविधु (१९६९) मिते वर्षे ॥

श्रीकर्यामान्दीदिमामानन्दः कर्मकक्षाग्निम् (कर्मततिबोधम्)॥१॥

विज्ञप्तिरेषाऽध्येत्रध्यापकेभ्यो यदुत गाथानां मा भूत् त्रुटिरिति नाऽत्र प्रत्यधिकारं पादादिधृतिः ॥

पूज्यपादागमोद्धारकाऽऽचार्यलिखित–प्रस्तावना–

विषम–पदार्थ–सूचिका

# आनन्द-लहरी-टिप्पणी

( श्री कर्मप्रकृत्युपोद्घातः )

१. अत्र सुसूक्ष्मबुद्धिगम्य अन्वय एवमवबोध्यः " विदुषां वर्गः विदाङ्करोति (यत्) विज्ञानविषये तावद् जगति वर्तनावर्तनमवतीर्णो विश्वोऽपि प्राणभृद्वारः अहमहमिकापुरस्सरं प्रवृत्तिं आद्रियमाणः विद्यते " इति ।

२. वि=विशिष्टं ज्ञानं विज्ञानं तस्य विषये=विषयभूते इति ।

३. विदुषां=सूक्ष्मधीमतां वर्ग=समूह इति ।

४. वर्तना=आचरणा, तस्याः वर्तनी=पद्धतिः, ताम् इति ।

५. समस्तोऽपीत्यर्थः ।

६. प्राणभृतांः=जीवानां वारः=समूहः इति ।

७. " साध्यता प्रतिप्राणि " इत्यस्यात्राऽयमर्थो यत् सर्वेषु प्राणिषु साध्यत्वं=अनुमानादिभिः जीवास्तित्वप्रतिपादनरुपम् ।

८. प्रसिद्धाः प्रमाणादिभिः अग्रे वक्ष्यमाणैककर्तृत्वादिहेतुभिश्च पूर्वं ये ते, तेषु ।

९. स्वस्वविषयका ये सुखि–दुःखित्वरुपा अनेके च ते विषयाः, तद्विषयकं यत् एकस्य कर्तृत्वम्, भूतेभ्यो विलक्षणं यत् विज्ञानं, तद्वत्त्वम्, दृश्यमानानि यानि भूतानि, तेषां संहतिः=एकत्रीभवनं तत्कारित्वं तदादिभिः ।

१०. एतत्पदस्य प्राक्तनेन " साध्यता " पदेन सहाऽन्वयो विज्ञेयः ।

११. जीवस्य अस्तित्वस्य अभ्युपगमेन अवाप्ता सार्था=अर्थानुगुणा आस्तिक्यसंज्ञा यैः तान् ।

१२. संज्ञया=विशिष्टावबोधशक्त्या सहिता, ये ते, तान् ।

१३. एतद्धि पदं अग्रेतनेन "**जीवसत्तामि**"त्यनेन सह सङ्गमनीयम् ।

अपोपसर्गसहित '**ज्ञा**' धातोः "**निन्हवे ज्ञः**" ( ३-३-६८ ) इतिश्रीसिद्धहेमीय-सूत्रेण निह्नवाऽपलापार्थे आत्मनेपदमत्र विहितं ततश्च **अपलपते** इत्यर्थोऽत्रावबोध्यः ।

१४. एतद्धि पदं क्रियाविशेषणं विज्ञेयम्, ततश्च ब्रह्माद्वैतवादोररीकारणमेवं केवलं पुरस्कृत्य **जीवस्यैव** परमार्थतो सत्तेति भावः ।

१५. अत्यन्तं भूयोभूयः वा दृश्यमानानि यानि विचित्राणि=नानाधर्मवन्ति भूतानि, तेषां वृत्तिः=वर्तनं=सद्भावः, तेन सनाथाम् ।

एतद्धि पदं प्राक्तन "**जीवसत्ता**" पदस्य विशेषणमभ्युपगन्तव्यम् ।

"**जीवसत्तां**" इति पदमत्र पुनः संयोज्यं ।

१६. आस्तिक इति यदभिधानं=नाम, तम् आवहति=धारयति योऽसौ ।

नामत एव आस्तिक इत्यर्थः वस्तुतस्तु ब्रह्माद्वैतवादोपगमनेन सर्वप्रत्यक्षभूतपञ्चकाऽपलापकरणेन अस्तित्ववादानभ्युपगमनेन आस्तिकपदस्यान्वर्थसङ्गतेरभावान्नाममात्रम् एवैतेषामास्तिकत्वमिति ।

१७. एतत्पदस्याऽग्रेतनेन "**अध्यक्षं**" पदेन सहाऽन्वयो विधेयः ।

१८. लोकैः=अतीव स्थूलबुद्धिभिः दृष्टमात्रमेवाऽभिमन्यद्भिः जनैःसहःअयनं=गतिः येषां तैरिति व्युत्पत्त्या चार्वाकसंज्ञैः नास्तिकैः इति अर्थोऽवबोध्यः ।

१९. बालात् आरभ्य गोपानां=अतीव स्थूलबुद्धिमतां यो अङ्गनाजनः=स्त्रीगणः, तेन सिद्धं=प्रतीतिविषयीभूतमिति ।

२०. व्यवहारस्य सकलजनप्रचलितस्य कार्यपद्धतेः एकं च तत् मूलमिति ।

२१. एतत्पदस्याग्रेतनेन " जीवास्तिता " इति पदेन सह सम्बन्धो विज्ञेयः। एतेन च वेदान्तिनामभिमताया व्यावहारिकसत्तायाः जीवसम्बन्धिन्याः निर्देशोऽत्र ।

२२. स्वरूपतोऽसतो वस्तुनः प्रतिपादनमात्ररूपव्यवहारिकसत्ता हि खलु व्यावर्णनमात्रमेवेति ध्वन्यतेऽत्र " वर्ण्यमाने "-तिपदेन ।

२३. एतत्पदेनाऽपि स्वमन्तव्यदृढीकरणार्थमभिप्रेयते न हि याथार्थ्येन सङ्गच्छते इति ध्वन्यते ।

२४. तत्कैः=तत्सम्बन्धिभिरित्यर्थः, वेदान्तिभिरिति भावः ।

२५. न प्रयोजनमित्यर्थः ।

२६. वेदान्तिभिः इत्यर्थः ।

२७. एतत्पदस्य अग्रेतनेन " **विप्रतिपन्नः** " इति पदेन सह सम्बन्धः ।

२८. इष्टं=मोक्षसाधकत्वेन, इष्टस्य चाविरुद्धो यः परमार्थः, तस्य अभिधायिनि इत्यन्वयसङ्गतिः कार्या। आपाततस्तु अत्र " दृष्टेष्टाविरुद्ध-परमार्थाभिधायिनि " इति पाठः सुसङ्गतः प्रतीयते, परमत्र मुद्रितप्रतौ " **कश्चिदिष्टेष्टाऽविरुद्धे** " ति पाठः दृश्यते, मुद्रणदोषजन्यो ह्ययंपाठोऽनुमीयते तत्त्वं तु सुज्ञैः सुधीभिः मध्यस्थवृत्त्या परिज्ञेयम् ।

२९. वर्णने चणः = निपुणः तस्मिन् ।

३०. कर्मणोऽसत्त्वे इत्यर्थः ।

३१. तुल्यानि=स्थूलदृष्ट्या एकरूपाणि=समानानीति यावत् येषां तेषामिति ।

३२. अविषमानि=समानानि कारणानि यस्य, तस्य ।

३३. गर्भे अवतारः, तस्य आद्यो यः समयः, तत्र यत् वैचित्र्यं, तस्य यत् निबन्धनं, तस्य ।

३४. तस्य=कर्मणः करणस्य यः कालः, फलस्य च सुखदुःखादिरुपस्य या प्राप्तिः, तदुभयस्य अभिसंधायकस्य वस्तुविशेषस्येति अर्थानुसारी अन्वयोऽत्र ज्ञेयः ।

अत्र सन्दर्भसङ्गतिवशात् बलादर्थाक्षिप्तं 'फलप्राप्ति" पदमत्रार्थोहसङ्गतिवशाद् सहृ-प्रेक्षोज्जीवितं न्यस्तमस्ति ।

तस्य सारासारत्वं धीधनैः प्रेक्षावद्भिः सद्गुरुत्तंसचरणोपनिश्रया परिकर्मितबलेन सङ्गमनीयम् ।

३५. पञ्चम्यन्तमिदं पदमर्थानुसन्धानबलतो ज्ञेयम् ।

३६. शुभश्च अशुभश्चेति शुभाशुभे, तद्रूपौ उभयौ भेदौ यस्य तत् इति विग्रहः ।

३७. वस्तुपरिच्छेदनसमर्थहेतुव्रजस्योपक्षेपोऽत्र ज्ञेयः ।

३८. क्विबन्त कीदृश् शब्दस्य प्रथमाबहुवचनान्तमिदं रूपम् ।

३९. विविक्तः=प्रज्ञया पृथक्कृतः सन् चासन् मार्गश्च यैरिति ।

४०. 'भिदा' इति शब्दस्याकारान्तस्त्रीलिङ्गस्य प्रथमाद्विवचनान्तमिदंरूपम् ।

४१. अत्र चान्वय एवं ज्ञेयः " यद्यपि अन्यैः व्यवहारपथाश्रितां शुभाशुभतां आकलय्य अस्य शुभाऽशुभे भिदे कल्पिते " इति ?

४२. अत्रापि अन्वय एवं ज्ञेयः—" भूघनगुण............सावधानाः भेदा अपि व्यवहारानुसारिण एवं श्रिताः " ।

अत्र तैरिति सन्दर्भसङ्गत्या अध्याहार्यम् ।

४३. व्यवहारं=जनसाधारणा स्थूलधीविषयां आचरणपद्धतिम् अनुसरंति ये ते इति विग्रहः ।

४४. भूधनं=शरीरम्, उपलक्षणत्वात् पुद्गलाः, तस्य ये गुणा, तेषां घातरूपो योऽवगुणः, तस्य यो वर्गः, तस्य विधाने सावधाना इति तात्पर्यानुसारी विग्रहः ।

४५, आत्मा च तस्य च गुणाश्च, तेषां घातादौ प्रवणा इति ।

४६, आत्मीयाः ये अभियुक्ताः=मान्यतयाः सज्जनाः तेषां या ततिः, ताम् इति ।

४७. लोकश्च अलोकश्च इति लोकाऽलोकौ, तयोः अवलोकनं=अवबोधः तत्र लम्पटं यत् केवलवेदः=केवलज्ञानं, तेन अवलोकिताः सूक्ष्माः दुराः=दूरस्थाः अमूर्ताः=वर्णादिरहिता अरूपिणः इत्यर्थः, व्यवहिता=कटकुड्यादिभिरावृताः एतादृशाश्च इतरे ये पदार्थाः, तेषां सार्थः यैरिति ।

४८. सर्वं विदन्ति ये ते इति, सर्वज्ञा इत्यर्थः ।

४९. वारं=समूहमिति ।

५०. कर्मपरमाणुभिरिति सङ्गमनीयमत्र ।

५१. तद्गुणानां वृन्दमित्यन्वयः ।

५२. आवरणकारकमित्यर्थः ।

अत्र च समुच्चयश्च 'आत्मनां वारं, तद्गुणानां आवृतं वृन्दं आवारकं च' इति पदत्रयस्य कार्यः, तं चावगम्येति ।

५३. अतत्त्वभूता अतत्त्वविषयिणी वा या श्रद्धा, पापानां च विरमणस्य=त्यागस्याऽभावः, क्रोधादीनाम् अन्तराराातीनां वर्गः, स्वान्तं=मनः तदादियोगानां व्यापाराः ।
एतेषां च समुच्चयद्वन्द्वः ।

ततश्च अतत्त्वश्रद्धा....स्वान्तादिव्यापाराणाम् ऊर्जितम्=सामर्थ्यं इति तात्पर्यानुसारी विग्रहोऽत्रावबोध्यः ।

५४. ऊर्जः=विशिष्टा शक्तिः, तेन सहितमित्यर्थः ।

५५. अनुकूला चासौ इतरा च=प्रतिकूला या सामग्री, तस्याः संयोजनेन समुद्भावितं, तथा आकाशादीनां अतीतमूर्त्तिकानां=अमूर्त्ताणां, अरूपिणामितियावत्, पदार्थानां यः निवहः=समूहः, स चासौ अतिक्रान्तः येनेति ततश्च "अनुकूले........समुद्भावितं आकाशाद्यतीत....निवहातिक्रान्तं" रूपं यस्य तमिति ।

५६. रूपं परि=परितः समन्तात् ईतं=गतं यस्मात् ।

तच्चेदं स्वरूपं यस्य तमिति

५७, यत्नेन सम्=मूलतोऽपि पाद्यः=कर्तुंशक्य क्षमः यस्य तमिति ।

५८. एतत्पदस्य प्राक्तनेन "कर्मणामष्टकं" इति पदेन सहाऽन्वयो विज्ञेयः ।

५९. दीक्षिताः=साधवः इतरे—गृहस्थाः, ते च ते जनाः तेभ्यः ।

६०. अशेषाणि च तानि कर्माणि, तेषां कायः=सङ्घातः तस्य कषणं विनाशनं, तस्य कल्पना=सम्पादनं, तत्र कोविदाः=निपुणतमा तेभ्यः ।

६१. कर्मण इत्यर्थः ।

६२. गणं=वाचनासम्बन्धसम्पृक्तं साधुसमुदायं धारयन्ति=रत्नत्रयाराधनादिप्रकारेण सुरक्षादिस्यवरुपेण इति गणधारिणः=गणधरा इत्यर्थः ।

६३. उदीर्णा चासौ प्राग्भवे भव्यभावभूता=श्रेष्ठाध्यवसायरूपा या श्रेयोभावना=निजसम्पर्कसमागमिनां सर्वथा कल्याणकरणरूपा, तया उद्भावितं यत् गणभृत्कर्म, तस्योदयेनाप्तंयत् शक्रादयो ये अखिलाः नाकिनः=देवाः, नराश्च=मनुष्याः, तेषां निकायः=समूहः, तस्मिन् यत् न साधारणं (येन केनचित् प्राप्यमिति यावत्) गणस्य ईशिता=श्रुतानुसारेण सारादिकर्त्ता=गणधरः, तस्य भावः=तत्त्वं येनेति विग्रहः ।

६४. पुष्पाणि इत्यर्थः ।

६५. सुष्ठु मानससंयुक्ता इत्यर्थः ।

६६. सुमनस्त्वं=देवत्वं, अपवर्गः=मोक्षस्तद्द्वयत्वं, तस्य साधनं=सम्पादनं, तत्र समर्थो योऽर्थः=धर्मरूपः, तस्य ये अर्थिनः=जिज्ञासवः, तैः अर्थनीयाः=काङ्क्षाविषयभूता इति ।

६७. जगतां ईश्वरः=तीर्थकृत्, तस्य आस्यात्=वदनात् निःसृताः उपदेशसमये इति ।

६८. भव्यानां=मोक्षेच्छूनां वारः=समूहः, तस्य हिते=श्रेयःसम्पादने एकं निहितं अन्तःकरणं यैरिति ।

६९. निर्युक्ताः=शब्दभञ्जनरूपनिर्युक्तिव्याख्याताः, निरवशेषाः=समस्तनयगर्भिताः ये अर्थाः, तेषां समूहस्य सूचने समर्थः तेनेति ।

७०. अनुयोगद्वारसूत्रप्रसिद्धगुणद्वात्रिंशत्या सूचनमत्र ।

७१. परमा=निष्कारणत्वप्रत्युपकाराऽवाञ्छादिगुणविशिष्टा चासौ कृपा, तया अनुगताः=सहिताः, तथा हृदयं=सुजनानां चेतः गच्छन्ति ये ते, परमकृपानुगताश्च हृदयङ्गमाश्च इति द्वन्द्वः, तैः ।

७२. सिद्धान्तानां यत् तत्त्वरूपं अमृतं, तस्य पानेन पीवराः=पुष्टाः, तैरिति ।

७३. पीवरं=प्रकृष्टपुण्योदयपुष्टं भागधेयं शुभकर्मसङ्घातरूपं येषां तैरिति ।

७४. अभियुक्ताः=श्रेष्ठविचारनिर्णयबुद्धिसम्पन्नाः, तेषु उत्तमाः, तैः ।

७५. गुणानां यो गणः, तस्य धुयाथाः धरणे धौरेयाः, तैः ।

७६. द्वादशमात् दृष्टिवादाख्यात् अङ्गात् आचाराङ्गैकादशकस्य समुद्धाररूपेयं वार्त्ताऽतीव सूक्ष्म-बुद्धिसद्गुरुसमुपासना–सुविनीततरादिगुणसम्पदाबलपरिकर्मितप्रतिभयोहनीया ।

७७. न अन्यं स्थानं मूलरुपेण येषां, तेषामिति ।

७८. दृष्टिवादत इत्यर्थः ।

७९. 'नह्' धातोः बन्धनार्थत्वेऽपि धातूनामनेकार्थत्वादत्र जायते इत्यर्थोऽवबोध्यः ।

८०. अत्र एतत्पदेन पूर्वगतोद्धरणं विज्ञेयं ।

८१. कर्मप्रकृत्यादेरित्यर्थः ।

८२. प्रेक्षा=विचारबुद्धिः, सैव चक्षुः येषां तेषाम् ।

८३. न अन्यैः प्रणेतुं शक्याः, एतादृशा ये पदार्थाः, तेषां चः प्रपञ्चः=विस्तारः, तस्य प्रपञ्चनं=करणं, तस्मै पटूनि=समर्थानि, यानि प्रकरणानि तेषां यः प्रचयः, तस्य या प्रवरसाधनता=समर्थहेतुता (कर्मस्वरुपसूक्ष्मज्ञानाधिगमस्येत्यध्याहार्यमत्र) तस्याः सिद्धिरिति विग्रहोऽत्र तात्पर्यानुसारी अपगन्तव्यः ।

८४. "स्पष्टं चैतत्" इति पदद्वयस्याऽमेतनेन "इति आगमीयगमाऽऽगमानां " इत्यनेन सह सम्बन्धो विज्ञेय ।

८५. निर्धारणे इयं षष्ठी ।

८६. अत्र हि पूज्यागममर्मज्ञ–टङ्कशालिश्रुतस्वामिभिरागमोद्धारकैः केनाऽपि प्रज्ञाविशेषवद्दूहेन "चतुर्णां" पद प्रयोगः कृतः, किंतु शास्त्रनिर्दिष्ट–पूर्वगतश्रुतलिखनोपयोगिमषीपुञ्ज–प्रमाण-प्रमितहस्तिव्यावर्णन प्रसङ्गे पूर्वाणां यथोत्तरं द्विगुणता व्यावर्णिता, ततश्च द्वितीयस्मात् पूर्वात्

कर्मप्रकृत्यादेरुद्धृतत्वात् द्वितीयपूर्वस्य हस्तिद्वयप्रमितममषीलेख्यता सङ्गच्छते, कथञ्चात्र "चतुर्णां" पद प्रयोगः ? इति स्थूलबुध्याऽतीव विचारणीयं भवति । तृतीयपूर्वस्य च हस्तिचतुष्कमितमषी-लेख्यत्वं जाघटीति ? तथाऽप्यत्र कृत 'चतुर्णां' पदप्रयोगस्यार्हत्वं सद्गुरुसमुपासनयाऽधिगत-निर्मलधीषणाधवलेन सङ्गमनीयम् ।

८७. सदा=कालादिनिमित्ताऽनपेक्षं अवस्थिताः पञ्चधनुश्शतमानप्रमिताः दिष्टाः—सर्ववेदिर्भिनिर्दिष्टाः ये नियतपरिमाणवन्तः ये विदेहेमहाविदेह क्षेत्रे जाता ये सामनाः=हस्तिनः तेषामिति ।

८८. अत्र चान्वय एवमवबोध्यः यत् " विंशतिप्राभृतमानात् पञ्चमात् वस्तुनः कर्मप्रकृत्याख्यात् चतु-र्थात् प्रभृतात् " इति ।

८९. " उद्धारनदीरयो(य)वाइम् आप " इति पदच्छेदोऽन्वयश्च बोध्यः, अर्थात् कर्मप्रकृत्यादि-कमिदं शास्त्रं द्वितीयपूर्वगतपञ्चमवस्तुनः चतुर्थात् प्राभृतात् उद्धृतम् ।

९०. एतत्पदस्याग्रेतनेन " प्रस्तुत....विज्ञप्तेः " इत्यनेन सहाऽन्वयो विज्ञेयः ।

९१. दृष्टिवादे द्वादशाङ्गरूपे नदीष्णाः, निपुणाः तेषाम् ।

९२. प्रस्तुतप्रकरणस्य ऊनतायाः पूरणं=पूर्तिः, तस्याः तननस्य या विज्ञप्तिः, तस्याः ।

९३. एतत्रतनं हि टिप्पणं शुद्धिपत्रकतो विज्ञेयम् ।

९४. समाप्तमित्यर्थः ।

९५. कर्मप्रकृत्यादिज्ञानमित्यर्थः ।

९६. निःश्रेयसस्य=मोक्षस्य निदानानां=हेतूनामिति ।

९७. सज्ज्ञानं च चारित्रं चेति द्वन्द्वः, तयोः मूलं तस्येति विग्रहः ।

९८. एतत्पदस्याग्रेततेन " अवस्थानासंभवात् " इत्यनेन सहान्वयः ।

९९. तत्त्वानामर्थानां यत् श्रद्धानं, तदात्मकस्य सम्यग्दर्शनस्य स्वरुपविशेषणमेतत् ।

१००. आत्मा च, तस्यात्मनो ये गुणाः, तेषां=गुणानां यानि आवरणानि, तस्याऽऽवरणस्य हेतवः, बन्धस्य निरोधः, नाशः समूलश्चासौ क्षयश्च एतेषामष्टानां पदानां द्वन्द्वः, तदादयः तेषाम् ।

१०१. उदितः दयायाः निर्झरो येषां तैः ।

१०२. किं च यावत् कर्मणां प्रकृत्यादि मूलतः उच्छेदश्च यावन्नावगतम्, तावत् आत्मनः विशुद्धेः उत्कर्षाऽपकर्षौ गुणानां वृद्ध्यादि च नाऽवगच्छति । इत्यन्वयसङ्गतिश्च कार्या धीधनैः ।

१०३. अत्र चैवमन्वयसङ्गतिः कार्या यत्–" मोक्षसौधसोपानसन्निभे गुणस्थाने समारोहेण विधेयं निरोधोपायं न च विजानाति " इति ।

१०४. मोक्षरूपो यः सौधः, तस्य यत् सोपानं, तत्सन्निभे इति ।

१०५. कर्मरूपो यः कण्ठीरवः, तस्य या कदर्थना, तया कल्पिता या व्यथा, तस्याः विचिन्तनं, तेन ततं=विहितम् ।

१०६. द्रव्यानुयोगरूपा या अनिमेषानाम्=देवानाम्, नदीः=स्वर्गंगा, तस्याः यः प्रवाहः, तस्य प्रवर्तने पार्वत्याः पिता=हिमालयः, स चासौ पर्वतः, तस्य प्रभा इव प्रभा यस्य तस्य ।

१०७. इत्यादयो ये आगमाः, तेषामञ्जनेन व्यक्तं विवेकरुपं यत् विलोचनस्य तेजः येषां तेषामिति ।

१०८. प्रथनं=प्रकाशनं, विवरणं=व्याख्या, बोधनं= ज्ञापनं, मुद्रणं चेति द्वन्द्वः तदादौ ।

१०९. अद्वितीयमित्यर्थः ।

११०. एषां ग्रंथकर्तृणां पूर्वधरत्वादेव ।

१११. कुत्राऽपि इत्यर्थः ।

११२. इदमेवेत्यर्थः, एतत्पदस्यान्वयोऽग्रेतनेन "प्रामाणिकतानिबन्धनं" इत्यनेन सह विज्ञेयः ।

११३. कल्पनया कोविदा ये पदार्थाः, तेषां पटीयस्ता इति विग्रहः ।

११४. पूर्वधरत्वनिमित्तकप्रामाणिकत्वरहितस्येत्यर्थः ।

११५. आगमेन सह तथा स्पर्धाकोट्यामारोहा, भावादित्यन्वयः ।

११६. तादृग् यत् माहात्म्यं, तद्रूपो यो भानुः, तस्य विभावनेन भास्वन्तः दीप्तिमन्तः इति ।

११७. भगवतः=ग्रंथकर्तुः महिम्नां=प्रभावाणामिति ।

११८. भगवन्महिम्नां दृष्टिवादमूलत्वमेवेत्यर्थः ।

११९. एकोननवतिपदस्येदंरूपम् ।

१२०. सद्भूतं यद् वस्तूनां स्वरूपं, तस्य निरुपणे एकं=श्रेष्ठं चक्षुः येषां, तैः ।

१२१. धातूनामनेकार्थत्वात् ज्ञेयमित्यर्थः ।

१२२. गणनापात्रैः श्रेष्ठैरित्यर्थः ।

१२३. काश्यां विबुधानां=विदुषां विनयेन अवाप्तं न्यायविशारदेति, प्रचुराणां ग्रन्थानां प्रथनेन वितीर्णं न्यायाचार्येति, पदयोरुभयी, तया भूषितं भूषनं=वपुः येषां तैः ।

१२४. उपयोगिनि कार्ये व्ययः इति ।

१२५. भविष्यकाले इत्यर्थः ।

१२६. अन्यस्याः विस्तृतेः विवृतेः उन्मुद्रणम् इत्यन्वयोऽत्रावबोध्यः ।

१२७. योग्यविवेचनमस्या परिज्ञायेत्यर्थः ।

१२८. एतत्पदस्य अग्रे क्रिया इति पदेन सहाऽन्वयो ज्ञेयः ।

१२९. आत्मनः स्वच्छा चाऽसौ या साधना, तत्र सावधाना इति विग्रहः ।

१३०. यथावत्=सविधि इत्यर्थः ।
एतत् पदस्य प्राक्तनेन 'समाचरन्तु' इत्यनेन सहाऽन्वयो विज्ञेयः ।

१३१. गुणगणरूपाणि यानि रत्नानि, तेषां रोहणः=रोहणगिरिः यः, स चासौ मोक्षमार्गस्तस्य आरोहणे, निपुणः एतादृशो यः श्रमणसंघः, तस्य चरणकमले चञ्चरीकः=भ्रमर इत्यर्थः ।

१३२. प्रमादादिदोषैरुद्भवः यस्य, तथा विरुद्धोच्चारणेन उद्भूतं यत् दुरितं, तदेव रजः, तस्य दूरणे=दूरीकरणे समीरणः=पवनः, तमिति ।

१३३. सर्वं जानाति योऽसौ सार्वः=सर्वज्ञः, श्री सार्व आदि येषां साक्षिणः यत्रेति ।

# 卐 मार्मिकाणि सदाचारसूत्राणि 卐

[ श्री उपमितिभवप्रपञ्चाकथा-ग्रन्थतः ]

* सेवनीया दयालुता !

* न विधेयः परपरिभवः !

* मोक्तव्या कोपनता ?

* वर्जनीयो दुर्जनसंसर्गः !

* विरहितव्याऽलीकवादिता !

* अभ्यसनीयो गुणानुरागः !

* न कार्या चौर्यबुद्धिः !

* त्यजनीयो मिथ्याभिमानः !

* वारणीयः परदाराभिलाषः !

* परिहर्त्तव्यो धनादिवर्गः

* निधेया दुःखितदुःखत्राणेच्छा !

* पूजनीया गुरवः !

* वन्दनीया देवसङ्घाः !

* सम्माननीयः परिजनः !

* पूरणीयः प्रणयिलोकः !

* अनुवर्त्तनीयो मित्रवर्गः !

* न भाषणीयः परावर्णवादः !

* ग्रहीतव्याः परगुणाः !

* लज्जनीयं निजगुणविकत्थनेन !

* स्मर्त्तव्यमणीयोऽपि सुकृतम् !

* यतितव्यं परार्थे !

* सम्भाषणीयः प्रथमं विशिष्टलोकः !

* अनुमोदनीयो धार्मिकजनः !

* न विधेयं मर्मोद्घट्टनम् !

* भवितव्यं सुवेषाचारैः !!

पूज्यपादागमोद्धारकाचार्यश्रीप्रणीतः

# श्रु....त....ज्ञा....न....म....हि....मा....

[आर्या......वृत्तम्]

पृथ्व्याद्या व्यवहार्याः, सदा निगोदास्तथा ह्यव्यवहार्याः ।
यद् दधति तमस्तिमिरं, भिनत्ति पटलं तयोर्हि श्रुतम् ॥
सुरगणनराः सदा यत्, श्रयन्त आत्मावलम्बनं मत्त्वा ।
अविगानेन नमन्ति च, पुनः पुनः श्रुतमहोऽर्हन्ति ॥

[अनुष्टुप्...वृत्तम्]

जिनास्तीर्थं नृपा नीतिं, प्रजाः पालिं नवां नवाम् ।
सुवते तां परं धत्ते, श्रुतमेव चिरं ननु ॥

[भुजङ्गप्रयात...वृत्तम्]

जिनेशाः सुरेशाः नरेशाः सदैव, तिमिस्रावलिं स्फेटयन्तीद्धरूपाम् ।
हृदाप्तां जनानां यदाऽप्यावलम्बं, श्रुतं सत्ततो नम्यमेवाप्तवर्गैः ॥
जगज्जन्ममृत्यामयार्त्तिव्यथार्ना, व्रजैर्व्याधितं सारहीनं शरण्यम् ।
ससारं सदार्थं यदन्यन्न चैति, सदा तच्छ्रुतं संश्रयन्ते सुबोधाः ॥
सदा सौख्यखानेः समीहा जनानां, यका स्याद् गतान्ता गताबाधवार्ता ।
यथेष्टा न चोना न चान्या श्रुतात् सा, बुधैः संश्रितं तत् स्तुयात् को न विद्वः ? ॥

[उपजाति...वृत्तम्]

पयोविहीनं न सरो विभाति, सरोविहीनं नगरं न चाऽपि ।
जनेन हीनं नगरं जगत्यां, वृत्तेन हीनं श्रुतमेवमिद्धम् ॥

[वसंततिलका...वृत्तम्]

अध्यक्षमेतत् परपक्षिणां ब्रुवे, वचः सघण्टारवमुच्चकैर्ननु ।
श्रुतस्य साम्राज्यमिदं वरेण्यं, शिवस्य चारित्रमनंह उद्धृतम् ॥

[शिखरिणी...वृत्तम्]

इदं शास्त्रं भव्यैः शिवगतिपथाबद्धहृदयै—
रनन्यत् संचिन्त्यं नहि सुलभमेतद् भवजले ।
कुतीर्थ्यैराक्रान्ते विपुलतरपुण्यैरधिगतं,
समाराध्यैतद् भो ! व्रजत सदानन्दपदवीम् ॥

श्रीआगमोद्धारककृतिसन्दोह-द्वितीयभाग
[पत्र ५३ तः ५५] उद्धृतम्

श्रीआगमोद्धारकाऽऽलेखितप्रस्तावनासंग्रहस्वरूपे

# श्रीआनन्दरत्नाकरे

## चतुर्दशमं रत्नं

## धर्मपरीक्षायाः प्रस्तावना

॥ श्रीमद्गौतमगणधरेन्द्रोपासितपार्श्वा विजयन्ते श्रीवीरपादाः ॥

[१]साधयन्तु [२]सिद्धसाधननिबन्धनधृतिधौरेया धीमन्तः [३]पारगतगदिताऽऽगमाऽम्बर-विचरणावाप्तवैनतेयपतिविख्यातयः प्रस्तुते [४]श्रीमत्सागरशाखाविधातृविहितपद्मबन्धूयमान-पद्मसागरगण्युद्बोधिते धर्मपरीक्षापद्माकरे केलिमनघां [५]स्वान्यासाधारणधर्मधारणाधैर्य-प्रदां, [६]वसतिरत्र [७]क्षीरोदतनयाया इव पद्मे [८]भवभ्रान्तिदारिद्र्यदारणदब्धारम्भाया [९]विश्रम्भ-विधाननदीष्णाया [१०]निष्णातत्वनिबन्धनाया [११]यथार्थविश्वाधीशव्याहृताऽव्याहतवाङ्म-यज्ञप्त्याचरणमूलायास्तत्त्वार्थपारमार्थिकाऽध्यवसायनिश्चितिरूपायाः [१२]श्रद्धानलक्ष्म्या [१३]उज्झितगृहकुटुम्बदेहममत्वानां महात्मनामपि स्पृहणीयायाः, प्रवचनस्य च स्याद्युद्भूतिः [१५]श्रद्धायाश्चेत् [१६]तदाविर्भावकविषयभावुकभावान्वितं बोभूयेत [१७]चेतश्चतुरचक्रस्य ।

स्वरूपं च परमेश्वरस्य[१८] प्रत्यपीपदन् परमपूज्याः श्रीमद्धरिभद्राद्या [१९]लोकनिर्णयन-निपुणलोकतत्त्वनिर्णयाद्येषु यथायथं युक्त्युद्भावनादिना, श्रीमद्भिः पूज्यपादैरपि प्रकृते तदेव निर्व्यूढं, न च चर्वितचर्वणता, पुराणादीनां पराभिमतानां यदभिमतं वृत्तान्तं [२१]स्वाभियुक्तदब्धानां, तस्य परमेश्वरस्वरूपस्यैवाऽत्र प्रतिपिपादिषितत्वात्, प्रतिपादनमपि नाऽत्र केवलं [२२]तदीयाऽऽगमतदर्थमात्रदेशनेन, किन्तु ! प्रथमं [२३]तत्प्रतिनिधिमर्थं प्रतिपा-द्याऽनिष्ट[२४]तमत्वमश्रद्धेयतयोररीकार्यं पश्चात्तदभिमतत्वं प्रदर्श्य परमं [२५]निग्रहस्थानमानीय [२६]समीचीनाऽऽप्ताऽभ्युपगत्युपगमेन वादिनां, ततश्चेदमतीवाख्यायकं [२७]स्वरूपस्प [२८]नाट्य-मिवाऽनर्हदेवतानां [२९]कर्मवृक्षमूलकषणकरीन्द्राणां श्रीमतां जिनेश्वराणामपि, आवश्यकमेव पुराणप्रचुरे काले [३०]तदभिमतदेवताविशेषाणां [३१]तदितरेषां च स्वरूपाख्यानं, ग्रन्थविधान-विशेषफलमप्येतदेव ।

एवं च [32]देवपरीक्षायां प्रवणत्वेपि ग्रन्थस्याधिकृतस्य धर्मार्थमेव [33]तस्याः चेक्रियमाणत्वात्तत्प्रणीतस्य धर्मस्यापि परीक्षा संपनीपद्यते एत्राऽनायासमिति नाऽऽयुक्ताऽभिधाऽस्य "धर्मपरीक्षा" इति । [35]मित्रस्या[36]त्महितविधिपद्मप्रबोधपद्महस्तस्या[37]ऽव्ययपदाप्तिहेतुमा[38]प्तोदिताविरुद्धवृषावगतिं ज्ञापितुं यदनुष्ठितं पवनवेगस्य मनोवेगेनाऽसाधारणोपकृतये दिनानामष्टकेन तद् दृब्धमत्र तत्रभवद्भिः [39]शुभवद्भव्यवृन्दविज्ञानाय ।

ग्रन्थविरचनचतुरा ग्रन्थकृतः [40]तपोगणकल्पद्रुमावनवृतिकल्पप्रभुश्रीमद्धर्मसागरोपाध्यायचरणाऽन्तेवासिताऽवाप्ताऽव्याहतविज्ञानततयः स्वोपज्ञवृत्तियुक्तान् नयप्रकाशादीन[41]नन्यसाधारणारम्भानुद्भावयामासुः, श्रीमन्महोपाध्यायकालस्य च विदिततमत्वात् न तत्रायास आरब्धः ।

यद्यपि नोपलब्धिपथमायाता विहाय द्वित्रान्[42] प्रभुप्रणीतान् ग्रन्थान् परे ग्रन्थाः [43]वस्तुरत्नरत्नाकरास्तथाप्यवलोकनेनै[44]तेषां प्रभुपादानामतितमामनुमीयते एव शेमुषी [45]सिद्धान्ततर्कलक्षणादिगोचरा ।

अत एव [46]निर्वसनाऽमितगतिसूर्यातताया: विविधच्छन्दोमय्या अस्या अनुष्टुप्छन्दोभिर्विधाने [47]नोनता, समानविषये च [48]समानतन्त्ररचनायाः प्रकारान्तरेण विधानं तादृशो वाऽवस्थापनं [49]समानतन्त्रविद्दृब्धशास्त्रच्छायाविधानादिवन्न दोषायेति ध्येयं धीमद्भिः, [50]बालबोधादिसमप्रयोजनत्वात् [51]तथाविधानं गुणकृदिति निर्धारितं श्रीमद्भिरभविष्यदिति [52]तथाप्रवृत्तिमादधुर्धृत[53]धिषणाधौरेयाः इत्यनुमिमीमहे [54]उदन्वदन्ता आनन्दाः । मुद्रणादिवृत्तान्तस्तु मुद्रितपूर्वोऽनेकश इति न तत्राऽऽयासः ॥

नन्द' रसा' ङ्क' नि' शाधिप-(१९६९)

मितेऽसिते माघमासि शरदि दले ।
श्रीकर्यां श्रीपार्श्वप्रभावत्यां तताऽऽनन्दात् ॥१॥

पूज्यपादागमोद्धारकाचार्यश्री-लिखित—प्रस्तावना—

विषम—पदाऽर्थ—सूचिका

# श्रीआनन्द-लहरी-टिप्पणी

**(धर्मपरीक्षायाः प्रस्तावना)**

१. विधीयतामित्यर्थपरकस्याऽस्य पदस्याऽग्रेतनेन "अनघां केलि" इत्यनेन सहाऽन्वयोऽवगन्तव्यः ।

२. सिद्धानि च तानि साधनानि मोक्षाऽऽख्यपरमपुरुषार्थहेतुभूतानि ज्ञानाभ्यास—दर्शनविशुद्धयादीनि तेषां निबन्धनभूता=परमाधारभूता या धृतिः=मनसः स्वास्थ्यम्=श्रद्धादार्ढ्यम् एकाग्रता वा, तस्याः तस्यां वा धौरेयाः=वृषभसमाः, सुविशिष्टधृतिप्रधानान्तःकरणा इत्यर्थः ।

एतद्विशेषणस्याऽत्र हि साफल्यमेतद्ग्रन्थगतपुराणप्रतिपादित-चित्रविचित्रमततति-श्रवणेनाऽऽपाततः धृतिविकलानां हि पुंसां संशयदोलान्दोलितत्वनिवारणाय सुदृढश्रद्धापरिपूरितधृतिपदस्याऽत्यन्तमावश्यकतेति सूचनेन विज्ञेयम् ।

३. पारगताः=तीर्थकृतः, तैः गदिताः अर्थरुपेण ये आगमाः, त एव अम्बरम्=आकाशम्, आत्मशक्तिव्याप्तिप्रभूष्णुत्वात्, तत्र विचरणेन=विविधनयसापेक्षं चरणेन=वस्तुविचारणात्मकेन अवाप्ता वैनतेयाः=सुदीर्घोड्डयनशक्तिभाक्त्वेन विख्याताः गरुत्मन्तः, गरुडापरपर्यायाः, तेषां पतिः=सर्वातिशायिसुदीर्घतमोड्डयनशक्तिशाली, तस्य या विख्यातिः सा यैस्ते इति शब्दव्युत्पत्तिरत्राऽवसेया ।

अत्र वैनतेयपदवाच्य—गरुडोपमाप्रदर्शनद्वारेण जिनशासनाभ्यन्तरस्वरूपज्ञविदुषां नयसापेक्षं विविधपदार्थानां सुसूक्ष्मतात्त्विकविचारप्रभुत्वं व्यावर्ण्य सुविशालजैनागमाकाशविचरणक्षमत्वं ध्वनितमस्यागमोद्धारकैराचार्यपादैःबहुश्रुतसूरिवरोत्तंसैरिति ।

४. श्रीमती=विविधशासनप्रभावकविद्वन्मतल्लजमुनिपुङ्गवादिद्वारा शोभावती या सागरशाखा प्राक्कालीनविजय—चंद्र—निधान—रुचि—मुनि—हंस-तिलक-रत्न—सागरप्रभृतिशाखाऽष्टादशक-

भ्राजमुनिमण्डलरूपमहावटवृक्षप्रभेदरूपा, तस्याः ये विधातारः=प्रभावकत्वेन प्रथितत्वकर्त्तारः, तैः विहितानि=मान्यकृतानि सुन्दरोत्तमशासनसेवादीनि वस्तूनि, तान्येव पद्मानि, तेषां पद्मबन्धुः=सूर्यस्तद्वदाचरमाणा ये **पद्मसागरगणयः,** तैरुद्बोधिते इति व्युत्पत्तिरत्र तात्पर्यानुगुण्येन सङ्गमनीया ।

५. स्वस्य अन्यस्य वा असाधारणं विशिष्टं यत् धर्मस्य धारणायाः=सुदृढास्थायाः धैर्यं=धृत्तिमत्वं, तस्य प्रदामिति विग्रहः ।

६. **'वसतिः'** पदस्य अग्रेतनेन **'श्रद्धानलक्ष्म्याः'** इति पदेन सहाऽन्वयो ज्ञेयः ।

७. क्षीरोदः=क्षीरसमुद्रः, तस्य तनया=पुराणप्रथितदेवासुरविहितसमुद्रमथनप्रसङ्गोद्भूतरत्नचतुर्दशकमध्ये प्रादुर्भवनेन पुत्री=लक्ष्मीः, तस्याः ।

८. भवे=जन्मजरामरणादिविवर्त्तरूपे चातुर्गतिके संसारे या भ्रान्तिः=विविधयोनिसमुत्पादः, तदेव दारिद्र्यम्=आत्मलक्ष्मीराहित्यम्, तस्य दारणे=विनाशने दब्धः आरम्भः यया इति ।

एतद्धि विशेषणमग्रेतन–**"श्रद्धानलक्ष्म्याः"** पदस्य ज्ञेयम् ।

९. विश्रम्भः=सुदृढसमुचितविश्वासः, तस्य विधाने=समुत्पादने नदीष्णा=निपुणा, तस्याः ।

एतदपि **"श्रद्धानलक्ष्म्या"** इत्यस्य विशेषणम् ।

१०. निष्णातः=कुशलः, तस्य भावः=निष्णातत्वं, तस्य निबन्धनायाः=प्रबलहेतुरूपायाः ।

इदं हि पदं "श्रद्धानलक्ष्म्या" इति पदेन सह संयोज्यम् ।

एतत्पदेन पूज्यपादाऽऽगमोद्धारकाऽऽचार्यदेवा एवं ध्वनयन्ति यत् यस्मिन् कस्मिन्नपि वस्तुनि निष्णातत्वं न ज्ञानप्राचुर्यमूलमभिमन्येत सद्भिः, परं विशिष्टयथार्थश्रद्धानबलेनैव निष्णातत्वं निश्चप्रचं संगच्छते ।

११. यथार्थं च तत् विश्वाधीशेन=त्रिलोकनाथेन व्याहृतं च यद् अव्याहतं=न केनाऽपि प्रबलतर्कबुद्धिबलेनाऽपि विप्रकृष्टदेश–कालेऽपि वा प्रतिहन्तुं शक्यमेतादृशं वाङ्मयं=शास्त्रम्, तस्य ज्ञप्तिः=ज्ञानं, तथा तस्य तदानुगुण्येनाऽऽचरणं, एतद्द्वयं मूले यस्या इति ।

एतदपि पदं **"श्रद्धानलक्ष्म्या"** इत्यस्याऽवगन्तव्यम् ।

एतेन पदेनैवं सूच्यते–यत् श्रद्धाऽप्यव्यक्तरूपा न हि श्रेयस्करी, किन्तु शास्त्रीयज्ञान–तदनुकूलाऽऽचारशुद्धिद्वयसनाथैवाऽऽदरणीयेति ।

१२. तत्त्वभूता येऽर्थाः, तेषां पारमार्थिकः=याथार्थ्याञ्चितः योऽध्यवसायः, तद्बलेन निश्चितिः=टंकशाली निर्णयः, तदेव रूपं यस्याः ।

एतदपि "श्रद्धानलक्ष्म्याः" इत्यनेन पदेन सह संयोजनीयम् ।

१३. श्रद्धानम्=हार्दिकान्तरप्रतीतिरूपेण सैव लक्ष्मीः=आत्मशोभाविवर्द्धकत्वेन, तस्याः ।

१४. उज्झितं=परित्यक्तं गृहस्य कुटुम्बस्य देहस्य च ममत्वं=रागमूलकप्रीतिः यैः, तेषाम् ।

१५. एतत्पदस्य प्राक्तनेन "प्रवचनस्य" इति पदेन सहाऽन्वयः ।

१६. तस्याः श्रद्धाया आविर्भावकाः=प्रकटीकारका ये विषयाः, तेषां ये भवुकाः=चित्तस्य विशिष्टाऽवस्थाकारका भावाः=अवस्थाविशेषाः, तैरन्वितम्, इति व्युत्पत्तिरत्राऽवसेया ।

१७. चतुराः=साराऽसारनिर्णायकधीसहिताः, तेषां चक्रम्=समूहः, तस्य ।

१८. विशेषेण प्रतिपादितवन्त इत्यर्थः ।

१९. लोकस्य=समस्तविश्वस्य निर्णयनं=स्वरूपस्य याथार्थ्यावगमः, तस्मिन् प्रत्यलाः=समर्थाः ये लोकतत्त्वनिर्णयाद्याः=एतत्संज्ञितग्रन्थमुख्या ये ग्रन्थाः, तेषु ।

२०. चर्वितस्य=प्ररूपितस्य चर्वणम्=पुनर्निरूपुणम्, तस्य भावस्तत्ता ।

२१. स्वस्य सम्मता ये अभियुक्ताः=मान्यतमाः पुरुषाः, तैः दब्धाः=रचितास्तेषाम् ।

२२. तदीयाश्च ते आगमाश्च=तदीयाऽऽगमाः जैनेतरशास्त्राणि, तेषाम् अर्थमात्रस्य देशनम्=निरूपणम्, तेन ।

२३. तस्य तदीयाऽऽगमेषूपवर्णितस्य प्रतिनिधिम्=तत्सदृशम् इत्यर्थः ।

२४. अनिष्टतमत्वम् प्रस्तुतविषयेण सहाऽसम्बद्धत्वेन सुतरामनिष्टम् इत्यर्थः ।

२५. निग्रहस्थानम्=न्यायशास्त्रप्रसिद्धं वादिपराभवस्थानविशेषमित्यर्थः ।

२६. समीचीनानाम् आज्ञानां या अभ्युपगतिः=तस्या अभ्युपगमेन ।

२७. एतद्धि पदमग्रेतनेन "जिनेश्वराणामि"त्यनेन सह सम्बद्धं वर्त्तते ।

२८. अन्यदेवानां देवत्वाऽननुगुणक्रियाजातं हि नटकर्मतुल्यं विवक्ष्यैतत्पदप्रयोगोऽत्र विहित इति प्रतीयते ।

ततश्च देवत्वस्याऽनर्हाणाम्=योग्यतारहितानां देवानां नाट्यं हि यथा अत्र प्रस्तुतं तथा जिनेश्वराणां स्वरूपमपि प्रतिपादितमस्तीत्यर्थः ।

२९. कर्मरूपी यो वृक्षस्तस्य मूलानां वृक्षाधाररूपाणां कन्दविशेषाणाम्, कषणे=उत्खनने करीन्द्राः=मत्तगजेन्द्रतुल्याः, तेषाम् ।

३०. तैः = जैनेतरैः अभिमता ये देवताविशेषाः = हरिहराऽऽदयः, तेषाम् ।

३१. तेभ्यः = जैनेतरमान्यदेवेभ्य इतरे ये देवास्तीर्थंकराऽऽदयः, तेषामित्यर्थः ।

३२. देवस्य स्वरूपस्य परीक्षा, तस्यामिति मध्यमपदलोपी समासोऽत्र विज्ञेयः ।

३३. परीक्षाया इत्यर्थः ।

३४. अत्र 'तत्' पदेन 'देव' पदपरामर्शः, तात्पर्यगामिकया प्रज्ञयोहनीयः ।

३५. 'मित्रस्य' इति हि विशेषणमग्रेतनस्य 'पवनवेगस्ये'ति पदस्य विज्ञेयम् ।

३६. आत्मनः हितम् = परमार्थप्राप्तिः, तस्य या विधिः = पद्धतिः, सैव पद्मं = कमलं, तस्य प्रबोधाय = विकसनाय पद्महस्तः = सूर्यः, तत्समः, तस्येति विग्रहाऽनुसारिणी सङ्गतिः कार्या ।

३७. अव्ययम् = शाश्वतं यत् पदम्, तस्याऽऽप्तिः = प्रापणम्, तस्य हेतुः, तम् ।

३८. आप्तैः = सर्वजीवहितकृद्भिः ऊदितः = प्ररूपितः, यः अविरुद्धः = पूर्वाऽपरविरोधाऽऽदिरहितश्चासौ वृषः = धर्मः, तस्य अवगतिः = ज्ञानम्, ताम् ।

३९. शुभम् = पुण्यमस्ति येषां ते शुभवन्तः, पुण्यशालिनः, एते च ते भव्याः = धर्मार्हप्राणिनः, तेषां यत् वृन्दं = समूहः, तस्य वि = विशेषेण ज्ञानाय इति ।

४०. तपोगणः = 'तपागच्छे'ति संज्ञया रूढः यः साधुसमुदायः, स एव कल्पद्रुमः = मोक्षपुरुषार्थसाधकधर्माऽऽराधनविविधोपष्टम्भकसाधनप्रदत्वात् ।

तस्य अवनम् = कुमतिपरिकल्पितनानातर्कजालरूपाघातैः प्रतिपन्थिभिः रक्षणम् ।

तदर्थं या वृतिः रक्षककण्टकभित्तिः, तत्कल्पाः = तत्सदृशाः ये च प्रभवः श्रीमन्तो **धर्मसागरोपाध्यायाः ।**

तेषामन्तेवासितया = निकटोषणशैल्या अवाप्ता अव्याहता विज्ञानस्य = विशिष्टज्ञानस्य ततिः = परम्परा यैरिति ।

४१. ग्रन्थकृतं विहाय अन्यसाधारणः आरम्भः = सर्जनं न विद्यते येषाम्, तान् ।

४२. प्रभवः = प्रस्तुतग्रन्थकृतः, तैः प्रणीताः, तान् ।

४३. वस्तूनि = प्रतिपाद्यविषयसम्बन्धीनि एव रत्नानि, तेषां रत्नाकरः = समुद्रा इव ये ते ।

४४. एतेषाम् = ग्रन्थरत्नप्रणेतॄणाम् ।

४५. सिद्धान्तः = आगमः, तर्कः = न्यायशास्त्रम्, लक्षणम् = शब्दशास्त्रं व्याकरणमिति वा, तदादिगोचरा = एतद्विषयिणीति ।

४६. निर्वसनाः = दिगम्बराः ये अमितगतिसूरयः, तैराततां = विरचिता, तस्याः ।

४७. 'न ऊनता' इति सन्धिच्छेदः ।

४८. समानं च तत् तन्त्रम् = शास्त्रम्, तस्य या रचना, तस्याः ।

४९. समानं तन्त्रम् = शास्त्रं येषां तैर्विदब्धं यत् शास्त्रम्, तस्य छायायाः = संस्कृतादिभाषान्तरविधानम्, तस्याः विधानाऽऽदिवत् इति ।

५०. बालानां बोधः, तदादि समं प्रयोजनं येषाम्, तत्त्वम्, तस्मात् ।

५१. तथा = समानरचनादिरूपं विधानमिति ।

५२. तथा = सदृशरचनाऽऽदिना प्रवृत्तिः, ताम् ।

५३ धृता चाऽसौ धिषणा च, तस्याः धौरेयाः = वृषभा इति ।

५६. उदन्वान् = सागरः अन्ते येषाम् ते ।

स....म्य....क्....दृ....दि....धा....र....णी ...यं!!!

- विरागतासम्पत्त्यै स्वाध्यायः परमावश्यकः ।
- विरागता हि शास्त्रज्ञताकषोपलः ।
- गीतार्थत्वं वै सद्गुरूपास्तिगम्य–शास्त्रज्ञतोपजिवितमस्ति ।

श्रीआगमोद्धारकाऽऽलेखित-प्रस्तावना-संग्रहस्वरूपे

# श्री आनन्द-रत्नाकरे

## पञ्चदशमं रत्नं

## श्रीषद्पुरुषचरितोपक्रमः

विदिततममेतद् विदुषां [1]विदिततत्त्वाऽतत्त्वरूपाणां, यदुत [2]कर्मवैचित्र्यसामर्थ्योपपादिताऽवस्थावैचित्र्याणां जीवानां [3]जीवितमरण-सुखदुःखाऽऽदि-प्रियाऽप्रियपदार्थप्राप्ति-परिहारबद्धकक्षाणां न खल्वेकधैव प्रवृत्तिः, [4]तदभावे फलैक्यं तु दूरापास्तमेव, नितरां नियतिनियमितमदो यदुत कारणाऽनुसारि हि कार्यं, मान्यत्वाद् विपश्चितामेतत्सिद्धान्तस्य जायन्ते एव विचित्रप्रवृत्तिका असुमन्तो विचित्रफलभाज इहाऽमुत्र च ।

तदेवमास्थिते के के कीदृशं कीदृशं कर्म्मारभन्ते ? कीदृशं [5]चाऽवाप्नुवन्ति [6]भावुक-[7]मितरच्च ! इत्यादिका [8]जिज्ञासा लभमाना प्रादुर्भावं मनसि स्थानं [9]तत्त्वज्ञानामृतोदधि-लहरीयमाना समियृयात्, तस्यां च सत्यां [10]भावुकानां भविकानां स्यादे[11]वाऽऽत्माऽव-लोकनलम्पटा पटुता, न च दीपं विना यथाऽन्धकारे विद्यमानस्यार्थस्योपलब्धिस्तथा विना श्रुतोपदेशमाप्नुयादाप्तोपदिष्टा[12]मात्माऽवबोधसरणिमिति यथायथमुपदर्शयन्तो जीवानां विचित्राः प्रवृत्ती[13]रुपहितविविधफला ग्रन्थकारा भगवन्त उपचक्रुरनवधि [14]इष्टाऽनिष्ट-प्रवृत्ति-तत्तत्फलदर्शनाऽभीप्सितप्रियाऽप्रियसाधनोपादान-हानाः ।

यद्यपि विततमेतत्स्वरूपं पूज्यपादैः-

"कर्माहितमिह चाऽमुत्र चाऽधमतरो नरः समारभते ।
इहफलमेव त्वधमो, विमध्यमस्तूभयफलार्थम् ॥४॥
परलोकहितायैव, प्रवर्त्तते मध्यमः क्रियासु सदा ।
मोक्षायैव तु घटते, विशिष्टमतिरुत्तमः पुरुषः ॥५॥
यस्तु कृतार्थोऽप्युत्तममवाप्य धर्मं परेभ्य उपदिशति ।
नित्यं स उत्तमेभ्योऽप्युत्तम इति पूज्यतम एव ॥६॥"

इति तत्त्वार्थभाष्ये सम्बन्धकारिकाभिस्तिसृभिः कारिकाभिराख्यातं पुरुषषट्क-स्वरूपं यथायथम् ।

[15]परमार्षे श्रीमहानिशीथेऽपि अवितथमाख्यातं पुरुषषट्कं तदीयाऽऽचारसूचापुरस्सरं, तथापि न तावता [16]प्रथमकल्पिकानां [17]शब्दार्थप्राधान्यविवेकावकलानां [18]केवलरस-प्राधान्याऽनुजीविनामुपकृतिः समुद्भवति [19]भाविभव्यानामपि भव्यानामिति [20]रसप्राधा-न्यबोधोत्पत्तये प्रारब्धोऽयं ग्रन्थः [21]पूर्वकालीनगीतार्थगीताऽनवगीताऽर्थसार्थसंबोधबन्धुरैः क्षेमङ्करगणिभिः षड्विधपुरुषस्वरूपबोधकत्वाद्यथार्थाभिधानम् षट्पुरुषचरितमिति ।

तत्र प्रथमं षट्पुरुषाऽभिधानप्रस्तावदर्शनं, तदनु क्रमेण षण्णामपि अधमाधम-१ अधम २ विमध्यम ३ मध्यम ४ उत्तम ५ उत्तमोत्तमानां ६ स्वरूपं उपलक्षण–निश्च-याद्यर्थं नामनिर्देशः [22]तादृगाचार–तत्फलप्राप्तिप्रभृतिकं च यथार्हं निजगदुः ।

दृष्टान्तास्तावदत्र परिपाट्या पुलिन्द १ मोहरति २ श्रीपति ३ जिनचन्द्र ४ महेन्द्र-५ जिनेश्वरा ६ इति ।

भविष्यत्यवलोकनेनैतेषां कर्मविपाकबोधात् [23]प्रशस्ताऽदृष्टोपायेषु प्रवृत्तिर्भव्याना-मिति [24]फलेग्रहिरायासो नः,

श्रीमन्तः कदा कतमं भूमण्डलं मण्डयामासुरिति विचारणायां पूज्यैरेव प्रशस्तौ यत् स्वस्य श्रीदेवसुन्दरसूरिचरणाम्भोजषट्पदता प्रत्यपादि, तेन ज्ञायते श्रीमन्तः श्रीदेवसुन्दर-पादपद्मचञ्चरीकतामाभेजाना बभूवुः ।

"अथ सर्वशेखराह्वाः ख्याताः क्षेमङ्कराह्वाश्च ।
गच्छेशार्ककरा इव दिशि दिशि निघ्नन्ति मोहतमः ॥४३३॥ "

इति [25]श्रीमुनिसुन्दरसूरिहृदयहिमवदुद्भूतत्रिदशतरङ्गिणीतृतीयस्रोतसि गुर्वावलीमहा-ह्रदे विलोकनाज्ज्ञायतेतरामेतत् यदुत–

" श्रीमन्तो न केवलं देवसुन्दरयुगप्रधानक्रमकजलीनाः, किन्तु गच्छगगनोद्द्योतवि-धानविज्ञा अपि ।"

श्रीदेवसुन्दरसूरिपादाश्च

"श्रीदेवसुन्दरगणप्रभवोऽधुनेमे" ४९३ ।

–इति गुर्वावल्याः वचनात्, तस्याश्च–

"रसरसमनुमितवर्षे"–इतिवचनात् १४६६ वर्षेषु प्रणयनात् पञ्चदशतमे शतके तच्चरित्रविलोकनाद् गुर्जरायां च विजहुरिति प्रतीतेर्ग्रन्थकृतामपि तदैव तस्यामेव सत्तेति निःसंशयं प्रत्येयमार्हतैः ।

ग्रन्थस्याऽस्य प्राग्जातेऽपि मुद्रणे मूल्यबाहुल्यात् प्रसाराभावोऽशुद्धताप्राचुर्यं प्राकृतच्छायारहितत्वात्प्रस्तुतग्रन्थाधिकारिणां बालानामसुगमता चेति श्रेष्ठिदेवचन्द्रकोश-नियुक्तैरारब्धमस्य मुद्रणं भवतु सुखाकरं सर्वभव्यानामिति समस्तसत्त्वसुखाकाङ्क्षी काङ्क्षत आनन्दसागरः ।

श्रीमत्पत्तननगरे मार्गशीर्षकृष्णद्वादश्यां सोमवासरे लिखितम् ।

## गुरुनिश्रयोहनीयं सम्यक्........!!!

० ज्ञानावरणक्षयोपशमजबुद्धिपटुना – वाचोयुक्तिविस्तर – प्रवरोवदेशकफटा-टोपादिसम्प्राप्तावपि मोहनीयक्षयोपशमजान्तरदृष्टिवैशद्यं विना जिनवरेन्द्राणां शासने ज्ञानित्वं गीतार्थतोपनिबन्धनीभूतं न प्राप्यते.

न हि तद् विनाऽऽराधकपथि निष्प्रत्यवायं सञ्चरणं भावि,

अतः सम्यक् गुरुनिश्रया मोहक्षयोपयमार्थं समा प्रवृत्तिः परिकर्म-णीयेति सुनिगूढं तत्त्वम् सम्यक् परिभावनीयं परिपुष्टान्तरविशुद्धविवेकच-क्षुष्कैः धीमद्भिः स्वहितकामिभिः ॥

पूज्यपादाऽऽगमोद्धारकाऽऽचार्यश्रीलिखित-

प्रस्तावना-विषम-पदार्थसूचिका

# श्री आनन्द-लहरी-टिप्पणी

(षट्पुरुषचरित्रोपक्रमः)

१ विदितम्=ज्ञानविषयीकृतम्, तत्त्वम्=यथार्थम्, अतत्त्वम्=अयथार्थं च रूपम्=पदार्थस्वरूपं येषाम्, तेषाम्।

२ कर्मणाम्=जीवोपात्तपुद्गलविशेषाणाम्, वैचित्र्यस्यअध्यवसाय=निबन्धनभूतस्यवैविध्या-पादितस्य यत् सामर्थ्यम्, तेन उपपादितम् अवस्थानाम्=विविधदशाविशेषाणां वैचित्र्यं येषाम्, तेषाम्।

३ जीवितं च मरणं च, सुखं च दुःखं च, तदादयो ये प्रियाश्च अप्रियाश्च पदार्थाः, तेषां क्रमशः प्राप्तये परिहाराय च बद्धः कक्षः यैस्तेषामिति अर्थानुसारिणी व्युत्पत्तिरत्राऽवबोद्धव्या।

४ 'तत्' पदेन एकधा प्रवृत्तेः परामर्शः, ततश्च "एकधा प्रवृत्तेरभावे" इत्यर्थः।

५ अत्र 'फलम्' इत्यर्थानुसन्धानतो विवक्ष्यम्, विवक्षावशात् शैलीवैचित्र्याद्वाऽत्राऽप्रयुक्तमपि।

६ भावयति मनः स्वश्रेष्ठतादिगुणैः यत तत्, प्रशस्यमित्यर्थः।

७ अभावुकम्=अप्रशस्यमित्यर्थः।

८ अत्र ह्येवमन्वयसङ्गतिः कार्या, "°दिका जिज्ञासा प्रादुर्भावं लभमाना तत्त्वज्ञाना.... लहरीयमाना (सती) मनसि स्थानं समियूयात्",

९ तत्त्वानाम्=हितकारिसत्यपदार्थानां ज्ञानम्=स्वरूपावबोधः, तदेवाऽमृतम, तस्य य उदधिः =समुद्रः, तस्य लहरीवदाचरमाणा इत्यर्थः।

१० भावसम्पन्नानामित्यर्थः।

११ आत्मनः=चैतन्यशक्तिविशिष्टस्य अवलोकनम्=अन्तश्चक्षुषा अनुभवेन वा स्वरूपनिर्धारणम्, तस्मै लम्पटा=उत्कण्ठावती वृत्तिरिति व्युत्पत्तिरत्राऽवसेया।

१२ आत्मनः=जीवद्रव्यस्य, अवबोधः=याथार्थ्येन स्वरूपनिर्णयः, तस्य या सरणिस्ताम्।

१३ उपहितम्=प्रवृत्तिविशेषतः विविधं फलं यासां ताः।

१४ इष्टाश्च अनिष्टाश्च प्रवृत्तयः तासां तानि तानि च फलानि, तेषां दर्शनम्, तेन च अभीप्सिते प्रियाणाम् अप्रियाणां साधनानामुपादानहाने येषां ते इति व्युत्पत्तिः।

१५ ऋषिभिः=तत्त्वदर्शिभिः, सर्वज्ञैरिति यावत्, प्रणीतम्=आर्षम्, परमं च तत् आर्षं च परमार्षम्, तस्मिन्।

१६ प्रथमः=भूमिकारूपः कल्पः=सामर्थ्यानुरूपाचारः विद्यते येषाम्, तेषाम्, बालजीवानामित्यर्थः।

१७ शब्दानामर्थः, तस्य प्राधान्यं यत्रैतादृशो यो विवेकस्तेन विकलास्तेषाम्।

१८ केवलं रसस्य प्राधान्यं यत्र, तेन अनुजीवन्ति ये ते, तेषाम्।

१९ भावि भव्यं=कल्याणं येषाम्—तेषाम्।

२० रसस्य प्राधान्यं यत्र स चासौ बोधस्तदुत्पत्तिः, तस्मै।

२१ पूर्वकालीना ये गीतार्थाः, तैः गीतः अनवगीतः=अनिन्दितः स चासौ अर्थः, तस्य सार्थः=समूहः, तस्य सम्बोधेन=सम्यग्ज्ञानेन बन्धुराः=मनोहराः तैरिति।

२२ तादृक्=स्वस्य दशाऽनुरूपः, स चासौ आचारः, तस्य यत् मलम्, तस्य प्राप्तिप्रभृतिकमिति।

२३ प्रशस्ताः ये अदृष्टाश्च ते उपायाश्च, तेषु।

२४ सफल इत्यर्थः।

२५ श्रीमुनिसुन्दरसूरीणां हृदयं तदेव हिमवान्, तत उद्भूता या त्रिदशतरङ्गिणी, तस्याः तृतीये श्रोतसि इति।

# वि....शो....ध्य....प....ठ....न्तु....!!!

| पत्रम् | पङ्क्तिः | शुद्धः पाठः |
|---|---|---|
| १ | १५ | तथा व्यसनीयो |
| २ | ४ | प्रयोजनं, परं |
| २ | ५ | र्व्यलक्षि, यदि |
| २ | १८ | °नूद्यते, तद° |
| ६ | ८ | विद्याः, तासां |
| ६ | १० | त्रिविधं, स्वार्थे |
| ६ | २९ | °जुहूषायाः पापस्य |
| ७ | २ | विस्वं, |
| ७ | ३ | इत्यर्थः । |
| ७ | ४ | व्युत्पत्त्या |
| ७ | १० | °सूचकः, अतो० |
| ७ | ११ | पूज्याचार्य० |
| ७ | १२ | °प्रसङ्गे गुर्वा० |
| ७ | १६ | °कल्पद्रुम० |
| ७ | २० | ततश्च गुरु० |
| ७ | ३० | °टृङ्कोऽत्राव० |
| ७ | ३७ | निष्पन्न "श्रीयुत" शब्दस्य |
| ८ | २७ | योऽङ्कः = उत्सङ्ग० |
| १२ | २ | °मनादृत्याऽन्यपुस्तक० |
| १२ | ७ | °धारणाधीधनैः० |
| १२ | २३ | °व्यलङ्कृतानां |
| १३ | ३० | °निबन्धनतया |
| १४ | ४ | °त्वेनाऽनङ्गवदूक्तृत्व० |
| १५ | ९ | प्राचख्युः |
| १६ | ३ | स्वत्फलभूतान् |
| १६ | ७ | °कामलिपरीताना० |
| १७ | ५ | प्रक्ष्यतते— |
| १७ | २५ | तमपङ्क्तेरूर्द्ध्वं द्वादशतमःटिप्पणे पूर्तिरेवं ज्ञेया "चरमतीर्थङ्कररूपो यो हिमवान्=गङ्गाप्रवहस्थानम्, तत आविर्भूता भागीरथी=गङ्गारूपा या द्वादशाङ्गीति व्युत्पत्तिरत्रावसेया । |
| १८ | | तमपत्रे मुद्रणदोषपतितं १३ संख्यं टिप्पणमेवमव-बोध्यम्— "द्वादशाङ्गीरूपं यत् तीर्थम्=भवसमुद्रोत्तारणकल्पं तदेवाऽन्यत् तीर्थं शास्त्ररूपतीर्थापेक्षया तीर्थान्तरभूतद्वादशाङ्गीरूपं द्वितीयतीर्थगतं यत् इति विग्रहः । |
| १८ | ११ | छदिः, तद्रूपा या, तस्याम् । |
| १९ | १८ | °न्यते बाहुल्ये० |
| २० | ४ | इत्येतद्धि |
| २० | ६ | उत्कृष्टम्, |
| २२ | ५ | °ऽर्द्दुद्धः । |
| २३ | ९ | °चिद्ग्रन्थाः |
| २३ | २५ | अल्पा |
| २६ | ६ | °कयादिप्रभेदेन |
| २६ | ११ | °भृत्पादैरविकल० |
| २६ | २० | °वादिनाम्, यतो |
| २७ | १० | °जिह्वासेव, अवाप्ता० |
| २७ | १९ | अण्णेसु वे—" |
| २७ | २१ | °भावात्, अविधानेऽपि प्रायश्चित्ताऽऽसेवनानेहोऽभावाच्च । |
| २८ | ५ | पऽक्रान्तम् |
| २८ | ९ | °हिताय, सम्प्रति० |

| पत्रम् | पङ्क्तिः | शुद्धः पाठः |
|---|---|---|
| २८ | १५ | °पादाः, संकलितं |
| | | ६१ |
| २९ | २ | स्फातिमग्नि |
| | | ६२ |
| २९ | ३ | सिद्धा° |
| | | ६३ |
| २९ | ४ | गुणरत्न° |
| २९ | ६ | °जणषष्ठानि |
| ३० | ६ | स्थैर्या° |
| ३० | १५ | आवश्यकादीनां |
| ३० | १५ | °भियाऽप्रस्तुतादे° |
| ३० | १६ | विध्युपयोगि° |
| ३० | १२ | °पयोगिता° |
| ३० | २२ | ग्रन्थो, यदि |
| ३० | २४ | मुद्रितपूर्वे° |
| ३० | २८ | शुद्धतममेव |
| ३१ | ५ | सद्धर्माऽऽनन्दे° |
| ३२ | ३२ | आवश्यक° |
| ३३ | १३ | परतैतेषां |
| ३३ | २२ | °बुद्धेरिति |
| ३३ | २५ | °रुत्तरोत्तर° |
| ३३ | ३३ | प्रयत्ने |
| ३४ | १४ | पृ० २ |
| ३४ | १७ | कारणे ३ |
| ३४ | ३३ | °ल्लनामित्यर्थः |
| ३५ | ३ | °वद्दस्वरूप° |
| ३५ | ४ | स्वाभिप्रायो° |
| ३५ | १२ | °र्वाक्तन° |
| ३५ | १५ | अभिधेयत्वेन |
| ३५ | २० | गणभृत्° |
| ३५ | २१ | °मत्र व्यति° |
| ३६ | ६ | °भिधान° |
| ३७ | २९ | विप्रवृन्दा° |
| ३८ | १ | °संग्रहे |
| ३९ | १ | कल्प°उपक्रमः |
| ३९ | ५ | असंत चेला |
| ३९ | १० | °योपाध्यायाः |
| ४० | ६ | °तद्व्यति° |
| ४० | ८ | °धीरेण। पश्चाद् वस्तु° |
| ४० | १४ | °स्तवानन्त° |
| ४० | १६ | कृता परावृत्ति° |
| ४० | ३१ | व्रतोच्चारण° |
| ४१ | ९ | यथा यादृशमुत्पन्नम्, |
| ४१ | ९ | जातश्च (?) यथा |
| ४२ | ११ | देवर्द्धि° |
| ४२ | २७ | शोधिता |
| ४३ | २ | मागधीभाषा° |
| ४३ | १५ | विबोध° |
| ४४ | १३ | मौलिकरचना° |
| ४४ | १६ | °कृतां तत्तच्छासनो° |
| ४५ | ४ | अनन्तर° |
| ४५ | ४ | हि |
| ४५ | ९ | रुषितत्वं |
| ४६ | २४ | 'सुधर्मा' पदेन |
| ४७ | ४ | अश्रद्धान° |
| ४८ | ८ | °श्रुतस्कन्धीया° |
| ४८ | १९ | °शुद्धेरंग° |
| ४८ | २२ | वृद्धे° |
| ४८ | २२ | °णामनन्त° |
| ४९ | २ | °परमावश्यक° |
| ४९ | ५ | °मूर्धन्या° |
| ४९ | २७ | शास्त्रवस्तु° |
| ५० | १३ | °व्यात्मिकतां |
| ५२ | १२ | °नुयायिना° |
| ५४ | २१ | °णुट्ठाण° |
| ५५ | ६ | तद्वदत्रे° |

५६ तमपत्रे २४ तमटिप्पणादूर्ध्वे २५तमं टिप्पणं मुद्रणदोषतः पतितं तद्वयेवं ज्ञेयम्—

२५-'स्था' धातोः परस्मैपदित्वेऽपि शाब्दार्थावबि—

| पत्रम् | पङ्क्तिः | शुद्धः पाठः |
|---|---|---|
| | | बोधायात्रात्मनेपदप्रयोगः परिदृश्यते । |
| | | "ज्ञीप्सा–स्थेये" (३-३-६४ सिद्धहेम०) |
| | | इति सूत्रेण निर्णायकार्थद्योतनायाऽत्राऽऽत्म |
| | | नेपदं सङ्गतं परिदृश्यते । |
| ५६ | २५ | २६ |
| ५६ | ३१ | २७ |
| ५६ | ३२ | २८ |
| ५६ | ३३ | २९ |
| ५७ | १३ | °रूपाः |
| ५७ | १५ | रूप० |
| ५७ | १७ | °मतीतं यस्मा इति । |
| ६१ | १९ | १९६८ |
| ६४ | १२ | °त्पन्नमात्रै० |
| ६५ | १ | वंदारुवृत्ति...। |
| ६५ | १० | °युगीनी या जनता |
| ६७ | १७ | °शांहिपूत० |
| ६९ | २८ | °प्लुताया० |
| ७५ | ९ | °दशा, तयाऽवष्टब्धाव्याप्त' |
| ७७ | १४ | क्रुद्द्रुहेर्ष्या० |
| ८१ | १४ | असार्वश्या० |
| ८१ | २४ | °पत्रेऽत्रोचाम |
| ८१ | २५ | निपुणैर्ज्ञाप० |
| ८८ | ६ | नतिततयः |
| ८८ | ८ | °मेतदुपदो० |
| ८८ | २१ | भामिनी० |
| ८८ | २२ | यदुत''न, |

| पत्रम् | पङ्क्तिः | शुद्धः पाठः |
|---|---|---|
| | | ६३ |
| ९७ | २७ | तदायति० |
| | | ७३ |
| १०० | ५ | नृतवाद० |
| १०० | ८ | संन्यस्तधर्म० |
| १०० | १८ | °मिवाऽनौचिती |
| १०० | २३ | विवेचनेनाक्ता |
| १०१ | १८ | मंडित० |
| १०४ | १२ | तृतीयोंऽशः । |
| १०४ | १८ | °क्तांशपंचकम् । |
| १०५ | २५ | °रूहणीया । |
| १०६ | २४ | सिद्धहेम०) |
| १०७ | ३ | °प्राग्भार–सरल० |
| ११० | १२ | अवबोधः कार्यः । |
| ११० | १८ | शङ्कराचार्य० |
| १११ | २ | बुद्धिस्तस्या |
| ११२ | ७ | तस्य व्याप्ताः |
| ११२ | २५ | शुचिता |
| ११७ | ३ | द्वादशं |
| १२२ | ७ | मुकुटाः |
| १२४ | २ | भट्टाः विद्वांसः |
| १२४ | ६ | संवत्सरेषु बालकत्वेन गुरु० |
| १२४ | ६ | प्रवर्त्तिनीमित्यर्थः |
| १२९ | ३ | त्रयोदशं रत्नं |
| १३९ | ५ | धुरायाः |
| १४० | ५ | °धीषणादिबलेन |



॥ नमः श्रीजिनशासनाय ॥

## पूज्यपादागमोद्धारकाचार्यश्रीविरचित–
## चमत्कृतिपूर्ण–स्तोत्रसाहित्य–
## परिचायकानि कतिपयपद्यानि

卐 卐 卐

उदयपुरनिकटवर्ति
समीनाखेडातीर्थपति–
श्रीसमीनापार्श्वनाथ–स्तुतिः

खेचर्या खचिते खगोद्भगिपथेऽखंडात्ममार्गाद्दतिः,
खाताशेषकलंकदान्तनिपुणाद्दष्टावलिखण्डकः ।
खानां खर्वितजन्तुजातसुविदां खानिः खराणां न यः,
खाद्यात् खर्वगणं खगाधमकृतं पार्श्वः समीनाधिपः। ॥९॥

शान्तं शान्तिमये शमे शरणगं शान्तातपे स्थापितं,
स्थैर्यं स्थैर्यभृतं सदोदितपदं साध्यैकरूपं शिवं ।
साधु–श्राद्धनिकायनिश्रितपदं शान्त्येकहेतौ शिवे,
संस्थातु सततं सपर्यति सदाश्रद्धः शमीशोऽपि यः ॥१॥

तत् किं नाम पुरं ? समं वदति यत् हीनं क्रमादक्षरैः,
भूपं वल्लभया युतं वमनयुक् यदा भवेत् सान्तरं ।
यत् सन्तं नृपभ्रूघने उशति च प्राहोद्वहन्तं नरं,
मर्यादा बुध ? मासमाश्रितमते ब्रूयात् विचिन्त्योत्तरम् ॥

॥ आगमदर्पणं सर्वभावावभासकम् ॥

આવરણ • દીપક પ્રિન્ટરી • અમદાવાદ-૧